27 G2 om. 27^{abc}. —^{a}) Ś2 प्रहत्य; M3 निपात्य (for निहत्य). B3 राक्षसान् (for राक्षस-). Ś V1 D1.2.4.5.8.9.12 -श्रेष्ठ (for -श्रेष्ठान्). —^{b}) Ś Ñ1 V1.3 D1–5.8.9.12 T3 सचिवांस् (for अमात्यांस्). D1.4 स च; D2 तत्र; D5 तस्य; D10.11 T1.2 G3 M1.3 Cg.k.t इह (for तव). Ñ2 B3.4 वल्लभान् ; D1.4 सं(D4 तां)गतान् ; D5 संभवान् ; D7 सत्तमान् (for संमतान्). B1 वल्लभांस्तव (for तव संमतान्). —^{c}) Ś D8.12 हतं (for हृता). Ś Ñ1 V1.3 D1–5.8.9.12 T4 तेन; K (ed.) सा तु (for राजन्). —G2 reads 27^{d} in place of 26^{b}. —^{d}) Ñ1 D6.7.10.11 [अ]पि; V3 G2 च (for हि). D9 तदा (for तव). Ś Ñ2 V1 B1.3.4 D1–5.8.12 गु(D5 सु)समंतःपुरं तव (B1 महत्); M5 गुप्तानंतःपुरे तव.

28 ^{a}) Ñ1 क्षांतं (for श्रुत्वा). Ś D2.8.9.12 चेदं; Ñ1 V1.3 D3 M3 चै(Ñ1 V1 वै)तन् ; Ñ2 B1.3.4 G1 [अ]प्येतन् ;

G 7. 33. 30
B. 7. 25. 30
L 7. 31. 32

ततोऽब्रवीद्दशग्रीवः क्रुद्धः संरक्तलोचनः ।
कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु च ॥ २९

भ्राता मे कुम्भकर्णश्च ये च मुख्या निशाचराः ।
वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः ॥ ३०

अद्य तं समरे हत्वा मधुं रावणनिर्भयम् ।
इन्द्रलोकं गमिष्यामि युद्धकाङ्क्षी सुहृद्वृतः ॥ ३१

ततो विजित्य त्रिदिवं वशे स्थाप्य पुरंदरम् ।
निर्वृतो विहरिष्यामि त्रैलोक्यैश्वर्यशोभितः ॥ ३२

D1.4 तस्य; D5 चेदं; D6.7.10.11 T3 M10 [अ]पि तन्; T1 M1 ह्येवं; T2 त्विमं; T4 चैतन्; M6 ह्येतन् (for ह्येतन्). Ś Ñ V1.3 B1.3.4 D1–6.8.9.12 T4 M3.6.7 मया सर्वं (Ś2.3 Ñ2 B1.4 क्षांतं; B3 ख्यातं; D6 M6.7 राजन्); M8 महाराजन् (for महाराज). —^{b}) Ś2.3 om.; Ñ2 B1.3.4 पूर्वम् (for क्षान्तम्). Ś V1.3 D1–5.8.9.12 T4 तस्य; T3 मम (for एव). Ś1 D12 कृतैनसः; Ś3 D3.8 हतैनसः; D1 हतायुषः; D5 तु रक्षसः; T2 हितं स्म सः; T4 हतात्मनः; M5 हतौजसः (for हतो न सः). Ñ1 तस्य रक्षो दुरात्मनः; G2 तमेवं हितो न संशयः (sic). —^{c}) G2 त्ववश्यं. T4 तस्मादेतस्य दातव्या. —^{d}) M5 transp. कन्या and भर्त्रे. B1 च; G2 [ऽ]ति-; M5.8 [ऽ]भि- (for हि). B1 बंधुभिः; D7.10.11 M6.7 Cg.k.t भ्रातृभिः (for दातृभिः). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 सेयं धर्मेण वै हृता (D2 कृता; T4 स्वसा); Ñ2 B3.4 कन्यान्यस्मै स्व (Ñ2 सु) बंधुभिः. ❀ Cg: भ्रातृभिरस्माभिरित्यर्थः ।; Ck: भ्रातृभिरिति गुरुवैषम्यमार्षम् । भ्रातृभिरस्माभिरित्यर्थः ।; Ct: भ्रातृभिरिति गुरुपरम्. ❀ —After 28^{cd}, Ñ B1.3.4 D6.7.10.11 S (except T4) ins.:

507* तदेतत्कर्मणो ह्यस्य फलं पापस्य दुर्मतेः ।

[T3 तव तत्-; Cg.k.t as above (for तदेतत्). B4 damaged for कर्मणो ह्य. Ñ B1.3 तस्य (for ह्यस्य). D6.7 T2.3 G1.2 M5–8 दुर्मते (for दुर्मतेः). Ñ B1.3.4 पापस्य फलमागतं (for the post. half).]

—^{e}) B4 D5 तस्मिन्. Ñ2 B1.3.4 तु; M5 हि (for [अ]भि-). Ś Ñ1 V1.3 D1–5.8.9.12 T4 -संप्राप्ते (for -संप्राप्तं). —^{f}) Ñ1 V3 D1.3–5 T3.4 काले; Cg.k.t as in text (for लोके). G2 आशु (for अस्तु). Ś D3.12 वः; D2 च; D11 मे (for ते). —After 28, Ś Ñ V1.3 B3 D1–5.7–12 T3.4 ins.:

508* विभीषणवचः श्रुत्वा राक्षसेन्द्रः स रावणः ।
दौरात्म्येनात्मनोद्धूतस्तप्ताम्भा इव सागरः ।

[(l. 1) D3r eads from श्रुत्वा up to 29^{b} in marg. Ñ2 B3 प्रतापवान् (for स रावणः). —(l. 2) Ś2.3 D8 धूर्तस् (for [उ]द्धतस्). Ñ2 D9 दौरात्म्यवा (D9 °त्म्याद्वा) युनोद्धतस्; B3 वारिणा वारिणोद्धतस् (for the prior half). Ś D2.8.9.12 तपांतेने (Ś D8.12 °नै) व; Ñ1 V1.3 तपांते इव; B3 तटांत इव; D3 तप्तांत इव; L (ed.) तपोंतेनेव (for तप्ताम्भा इव). D1.4 तपन्निव दिवाकरः; D5 तपांते सागरो यथा (for the post. half).]

29 D3 reads 29^{ab} in marg. (cf. v.l. 28). —^{a}) D1.4 [ऽ]वदद् (for ऽब्रवीद्). —^{b}) Ś D1.2.4.5.8.9.12 क्रोधात्; D3 T3.4 क्रोध- (for क्रुद्धः). —^{c}) T3.4 वै (for मे). Ś Ñ1 V1.3 D2.3.5.8.9.12 संकल्प्य (D2.5 °ल्प; D3 °ल्प्यं) तां; D1.4 स कल्पतां; D6.7 कल्पतां मे (for कल्प्यतां मे). D2.9 M5.7 रथं; D3 रथाः. G2 रथश्रेष्ठः (for रथः शीघ्रं). —^{d}) B3.4 योधाः (for शूराः). T1.2 सज्जा (for सज्जी-). Ś Ñ2 B1.4 D2.3.5–12 T2 M6 नः; Ñ1 वै; B3 मे; T1 G1.3 M3 [इ]ह (for च). —After 29, Ś2.3 Ñ1 V1.3 D1–5.8.9.12 T3.4 ins.:

509* वर्मभिश्चित्रसंनाहैः प्राव्रियन्तां गजोत्तमाः ।

[Ś2.3 D8 वर्मिभिश्; Ñ1 बद्धैः सु-; D3 चर्मभिश् (for वर्मभिश्). Ś2.3 Ñ1 V1.3 T3.4 -संनादैः (for -संनाहैः). D1.4 संनद्धाश्चित्रसंनाहाः (for the prior half). Ś2.3 D8 व्याव्रियंतां; D1.4 आह्रियंतां (for प्राव्रियन्तां).]

30 ^{a}) Ś V1.3 D2.3.8.12 पुत्रो मे; Ñ1 D1.4 पुत्रा मे; Ñ2 B1.3.4 D5 इंद्रजित् (for भ्राता मे). V3 तु (for च). —^{b}) M1.2.9 ते (for ये). G2 दुःखा (for मुख्या). Ś D2.5.8.9.12 मुख्या ये वै; Ñ1 V1.3 D3 T3.4 मुख्या ये च (by transp.) (for ये च मुख्या). —^{cd}) Ś V1.3 D2.3.5.8.9.12 T3.4 [अ]व (V1 D3 T3.4 [अ]धि) रुह्याशु; Ñ1 D1.4 [अ]भिरुह्याशु (for [अ]धिरोहन्तु). M5 -प्रहरणैर्युताः; M6 °णोद्यताः (for -प्रहरणायुधाः). Ś Ñ1 V1 D1–5.8.9.12 T3.4 निर्यान्त्वेते (Ñ1 V1 T3.4 °त्विह; D1 °तु ते; D3 °त्वद्य; D9 °त्विमे) ममाज्ञया; V3 निर्गच्छंतु ममाज्ञया (for ^{d}). Ñ2 B1.3.4 नानाप्रहरणाः सर्वे वाहनेष्वधिरोहत (B3 °हिताः).

31 ^{a}) D1.4 M6 [अ]हं (for तं). D5 अयुतं; T2 पश्यतः (for अद्य तं). —^{b}) D8 om. मधुं. V1 राक्षस-; D9 सर्वत्र (for रावण-). ❀ Cg: रावणान्निर्भयो रावणनिर्भयः तम् ।; so also Ck.t. ❀ —^{c}) D6.7.10.11 M6.10 सुरलोकं. —D4.6 om. (hapl.) 31^{d} – 32^{c}. —^{d}) Ś Ñ V1.3 B1.3.4 D2.3.5.7–12 T1.2 M6 युद्धाकांक्षी.

32 D4.6 om. 32^{abc} (cf. v.l. 31). D7.10.11 om. 32. K (ed.) reads 32 within brackets. —^{a}) D2 विचिंत्य; G (ed.) निर्जित्य (for विजित्य). V3 त्रिदशान् (for त्रिदिवं). —^{b}) B1.3 वशं (for वशे). Ñ1 B1.3 कृत्वा; Ñ2 B4 कृत्य (for स्थाप्य). Ś V1.3 D1–3.5.8.9.12 T3 स्था (D12 प्रा) प्य चें (V3 आस्थाप्ये) द्रं बलाद्वशे; T4 स्थाप्य चेंद्रं बलान्वितः. —^{c}) Ś Ñ V1.3 B1.3.4 D1–3.5.8.9.12 T3.4 M2.3.7.8 निवृ (Ñ1 M8 °र्वृ) त्तो; K (ed.) निर्भयो (for निर्वृतो). Ñ2 V1 B1.3.4 T2 विचरिष्यामि. —^{d}) V3 -वर- (for -[ऐ]श्वर्य-).

अक्षौहिणीसहस्राणि चत्वार्युग्राणि रक्षसाम् ।
नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम् ॥ ३३
इन्द्रजित्त्वग्रतः सैन्यं सैनिकान्परिगृह्य च ।
रावणो मध्यतः शूरः कुम्भकर्णश्च पृष्ठतः ॥ ३४
विभीषणस्तु धर्मात्मा लङ्कायां धर्ममाचरत् ।
ते तु सर्वे महाभागा ययुर्मधुपुरं प्रति ॥ ३५
रथैर्नागैः खरैरुष्ट्रैर्हयैर्दीप्तैर्महोरगैः ।
राक्षसाः प्रययुः सर्वे कृत्वाकाशं निरन्तरम् ॥ ३६
दैत्याश्च शतशस्तत्र कृतवैराः सुरैः सह ।
रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन्त पृष्ठतः ॥ ३७
स तु गत्वा मधुपुरं प्रविश्य च दशाननः ।
न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान् ॥ ३८
सा प्रह्वा प्राञ्जलिर्भूत्वा शिरसा पादयोर्गता ।
तस्य राक्षसराजस्य त्रस्ता कुम्भीनसी स्वसा ॥ ३९ G. 7. 33. 40 B. 7. 25. 39 L. 7. 31. 42

Ś Ñ V1.3 B1.3.4 D2.3.5.8.9.12 T3 -दर्पित:; D1.4 -गर्वित:; D6 M10 -मोहित: (for -शोभित:). T4 त्रैलोक्याश्चर्यदर्पित: .

33 M8 om. 33–34. —^{a}) D1.4.6.10.12 T2-4 G2 M1.2.4.5.7.9 अक्षोहिणी-(T3 °णि-) (sic); G1 अक्षोहिण्यां (sic) (for अक्षौहिणी-). G3 अक्षोहिणी च सहसा —^{b}) D5.7 G2 M2.5.9 [अ]ग्राणि; D6 [अ]न्यानि; D10.11 Ct [अ]क्ष्याणि (for [उ]ग्राणि). Ś D1–4.8.9.12 दश तस्य तु(D8 सु) रक्षस:(Ś D8 राक्षसा:); Ñ B1.3.4 तत्र चत्वारि रक्षसां (Ñ राक्षसा:); V1.3 T3 राक्षसानां महात्मनां. —^{c}) Ś Ñ1 V1.3 D1.2.4.8.9.12 नानाप्रहरणा हृष्टा(D8 om.); Ñ2 नानायुधा: प्रहृष्टाश्च; B1.3.4 नानायुधानां हृष्टानि(B4 दीप्तानां). —^{d}) B4 प्रययुर्. Ś Ñ V1.3 D1–6.8.9.12 T1.2 G1.2 M1.6.7.9 -कांक्षिण: (for -काङ्क्षिणाम्).

34 M8 om. 34 (cf. v.l. 33). —^{a}) G1 मेघनादो (for इन्द्रजित्तु). D6.7.10.11 T4 M10 Ct सैन्यात् (for सैन्यं). —^{b}) M6 जगाम प्रहर्षं महत् (unmetric). —For 34^{ab}, Ś Ñ1 V1 D1–5.8.9.12 T3 subst. :

510* इन्द्रजिच्चाग्रतस्तस्य रक्ष:सैन्यस्य सोऽभ्ययात् ।

[Ñ1 V1 D1–5.9 तु (for च). T3 इंद्रजेता (for इन्द्रजिच्च). D1 सोभवत्; D3.5 सोभ्यगात्; D9 चाभ्यधात् (for सोऽभ्ययात्).];
while Ñ2 V3 B1.3.4 subst. :

511* मेघनादस्तु सेनाग्रे सैनिक: प्रययौ तदा ।

[B3 सेनाग्र: ; B4 संग्रामे (for सेनाग्रे). V3 सरथ: सैन्यसंयुत: (for the post. half).]
—^{c}) Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T3 पृष्ठतो वीर: ; M6 मध्यग: शूर: (for मध्यत: शूर:). D6.7.10.11 T4 M10 जगाम रावणो मध्ये. —^{d}) D3 T3 G2 M1.10 तु (for च). Ś D2.5.8.9.12 वीर्यवान् ; Ñ V1.3 D1.3.4 T3 मध्यत: ; B1.3.4 राक्षस: (for पृष्ठत:).

35 ^{ab}) Ñ2 B4 D6.8(before corr.).10.11 च (for तु). Ñ2 D5 transp. धर्मात्मा and लङ्कायां. Ñ2 संस्थितो हि स: ; V3 D1.2.4–6.9.10 T3.4 G3 M3–10 Ct धर्ममाचरन् (for धर्ममाचरत्). B1.3.4 धर्ममेव समाचरत् (for ^{b}). ❀ Ct : लङ्कायां धर्ममाचरन् । तत्रैव स्थित इत्यर्थ: . ❀
—G1 transp. 35^{cd} and 36^{ab}. —^{c}) B1 ये तु; D6.7.10.11 M6.10 शेषा: (for ते तु). Ñ2 B1.3 महावेगा; M1 °वीरा (for महाभागा). —^{d}) B1.3.4 गता (for ययुर्). B1.3 मधुवनं; M4.7 °पुरीं (for मधुपुरं). —For 35^{cd}, Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 subst. :

512* शेषा राक्षसशार्दूला गता: सुरपुरं प्रति ।

[Ś D2.8.9.12 एते; D9 शेषात् (for शेषा). Ñ1 D3.5 T3.4 मधुपुरं(Ñ1 °वनं) (for सुरपुरं).]

36 G1 transp. 35^{cd} and 36^{ab}. —^{ab}) Ñ2 B1.3.4 transp. खैरर् and हयैर् . G1 भीमैर् ; G3 उग्रैर् (for दीप्तैर्). G2 दीप्तैरन्यैर् (for हयैर्दीप्तैर्). Ś2.3 मनोरथै: (for महोरगै:). Ñ2 B1.3.4 चैव महारथै:(B3 °जवै:) (for दीप्तैर्महोरगै:). —For 36^{ab}, D1.6–8.10.11 M10 subst. :

513* खरैरुष्ट्रैर्हयैर्दीप्तै: शिशुमारैर्महोरगै: ।

[D1 हृष्टैर् (for उष्ट्रैर्). D7 दीपै: ; (for दीप्तै:). D1.8 om. ; M10 शिशुमारैर् (for शिशुमारैर्).]
—^{c}) Ś Ñ V1.3 B1.4 D1–5.8.9.12 T3.4 निर्ययु: ; B3 निर्गता: (for प्रययु:).

37 ^{a}) Ñ2 B1.3.4 बहवस् (for शतशस्). —^{b}) Ś Ñ1 V1.3 D1–5.8.9.12 बद्ध- (for कृत-). V3 corrupt; D6.7.10.11 T4 M10 च दैवतै: (for सुरै: सह). —^{c}) Ñ2 G1 वीक्ष्य (for प्रेक्ष्य). —^{d}) D7.10.11 अन्वगच्छन्हि; G2 अनुगच्छंति; M3 °गच्छंस्तु (for अन्वगच्छन्त). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 पृष्ठतोनुय(V3 °तो निर्य)युस्त(D1.3.4 T3.4 °र्मु)दा; Ñ2 B1.3.4 ते चा(Ñ2 ये चा; B4 तं ते)प्यनुसमीयिरे; M6 पृष्ठत: सहसैनिका: .

38 ^{a}) V3 च (for तु). D3 transp. तु and गत्वा. D5 M4–7 -पुरीं (for -पुरं). —^{b}) M8 तु (for च). D1.4 प्रविवेश (for प्रविश्य च). —^{cd}) Ñ2 B1.3.4 G (ed.) [अ]पश्यत्तं(G [ed.] °त्तु) (for ददर्श). M1 ददर्श मधुरं तत्र (sic) (for ^{c}). Ñ2 illeg. for ^{d}. B1.4 एव चैक्षत; B3 तामवैक्षत; G2 दृष्टवांस्तदा (for तत्र दृष्टवान्). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 अ(D1.4 सो)पश्यद्भगिनीं तत्र मधुं तत्र न दृष्टवान् .

39 ^{a}) Ś V1.3 D2.3.5.8.9.12 T3.4 भ्रातु: सा; Ñ1 प्रह्वा सा (by transp.) ; B1 साप्युक्ता; M3 सा तदा (for सा प्रह्वा).

G. 7. 33. 41 B. 7. 25. 40 L. 7. 31. 43 तां समुत्थापयामास न भेतव्यमिति ब्रुवन् ।
रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते ॥ ४०
साब्रवीद्यदि मे राजन्प्रसन्नस्त्वं महाबल ।
भर्तारं न ममेहाद्य हन्तुमर्हसि मानद ॥ ४१
सत्यवाग्भव राजेन्द्र मामवेक्षस्व याचतीम् ।
त्वया ह्युक्तं महाबाहो न भेतव्यमिति स्वयम् ॥ ४२
रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थिताम् ।
क्व चासौ तव भर्ता वै मम शीघ्रं निवेद्यताम् ॥ ४३
सह तेन गमिष्यामि सुरलोकं जयाय वै ।
तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात् ॥ ४४
इत्युक्ता सा प्रसुप्तं तं समुत्थाप्य निशाचरम् ।
अब्रवीत्संप्रहृष्टेव राक्षसी सुविपश्चितम् ॥ ४५

Ñ2 B3 D6.7.10.11 M5.10 सा च(M5 तु) प्रह्वां(B3 प्रबद्धां)-जलिर्भूत्वा; D1.4 भ्रातुः प्रांजलि सा भूत्वा (metri causa). ❀ Ct : प्रह्वाञ्जलिः कृतनम्रत्वचिह्नाञ्जलिः. ❀ —^{b}) D6.7.10.11 M6 चरणौ (for पादयोर्). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 transp. शिरसा and पादयोर्. —^{c}) V3 तत्र; D1.4 यस्य (for तस्य). —^{d}) Ś Ñ1 V1 D1–5.8.9.12 T3.4 भयात्; V3 तदा; M1 प्रह्वा; M5 तस्थौ (for त्रस्ता). Ś Ñ1 V3 D1.2.4.5.8.9.12 T3.4 शुभा; Ñ2 B1.3.4 D6.7.10.11 तदा; V1 D3 सुता (for स्वसा).

40 ^{a}) Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 स ताम्; M1 तासाम् (sic) (for तां सम्-). M3 सा तमुत्पातयामास (sic). —^{b}) V1 om. (hapl.) from ब्रुवन् up to इति in 42^{d}. D3 ब्रुवं (for ब्रुवन्). ❀ Cv : न भेतव्यमिति ब्रुवन्नित्यत्र इतिशब्दः किं चापि करवाणि त इत्यत्र संनिवेश्यः. ❀ —^{c}) Ś D12 उवाच (for रावणो). D1 T3 राक्षसः (for राक्षस-). V3 राक्षसो रावणस्तत्र. —^{d}) Ś V3 D1–5.8.9.12 T3.4 किं ददामि तवेप्सितं; Ñ1 किं ददामीति चाब्रवीत्; Ñ2 B1.3.4 किं च ते करवाण्यहं; M6 किं च ते क्रियतामिति; G (ed.) किं च वै ते करोम्यहं.

41 V1 om. 41 (cf. v.l. 40). —^{a}) Ñ1 दास्यं; B4 देव (for राजन्). —^{b}) Ś Ñ1 V3 D1.2.4.5.8.9.12 T3.4 [ऽ]सि; D3 हि (for त्वं). Ñ2 B1.3.4 दशानन; D1–3.8.12 T3 महाबलः(T3 °लं); D6.7.10.11 G3 °भुज (for महाबल). —^{cd}) Ñ1 हि; D9 T3 तु; T1.2 तं; T4 च; M3 मे (for न). D7 transp. न and मम. Ñ1 D1.3–5.9 T1.3.4 M3 मधुं मह्यं (Ñ1 मेद्य; T1 M3 नाद्य); T2 म**द्य (damaged); M10 च मेहाद्य (for ममेहाद्य). M6 हतुंम् (for हन्तुम्). G2 इच्छसि (for अर्हसि). D1.3–5 [अ]रिंदम (for मानद). Ñ1 T3 न त्वं हंतुमिहार्हसि; D9 नैव हंतुं त्वमर्हसि; T4 हंतुं नार्हस्यरिंदम (for ^{d}). Ś D2.8.12 भर्तारं मधुरं मह्यं(D12 मधुरेषोद्य) न हंतव्यम- (Ś1 °व्यो ह्य)रिंदम (sic); L (ed.) भर्ता मे मधुरेषोद्य न हंतव्यो ह्यरिंदम. —After 41, D3.6.7.10.11 S (G3 damaged) ins. :

514* न हीदृशं भयं किंचित्कुलस्त्रीणामिहोच्यते ।
भयानामपि सर्वेषां वैधव्यं व्यसनं महत् ।

[(l. 1) T3 मानं (for कुल-). G1 न विद्यते (sic) (for इहोच्यते). ❀ Cg : ईदृशं भयं भर्तृवधसंभवं भयमित्यर्थः ।; so also Ck.t. ❀ —(l. 2) M6 सर्वासां (for सर्वेषां). D3 भयांतमिति सर्वस्वं (for the prior half). T3 G2 M3 वैधव्य- (for वैधव्यं). D3 G1 तथा; D6.7 T3.4 G2 M1.2.4–10 यथा (for महत्).]

42 V1 om. up to इति in 42^{d} (cf. v.l. 40). —^{a}) G2 सत्यभाग्. Ś2 moth-eaten for ग्भव राजेन्द्र. ❀ Cg.k : सत्यवाग्भवेति । न भेतव्यमिति वचनं सत्यं कुर्वित्यर्थः. ❀ —^{b}) D2 ममैवेक्षस्व; D4 मामेवेक्षस्व; D5 °क्ष च (for मामवेक्षस्व). Ñ2 B1.3.4 याचमानामवेक्ष(B4 °क्ष्य) मां; V3 मामवेक्ष प्रजावतीं. —^{c}) Ñ1 V3 D6.7.10.11 T3.4 G2 M2.4–10 [अ]प्युक्तं; Ñ2 B1.3.4 [उ]क्तास्मि (for ह्युक्तं). Ś1 V3 D1.3–7.9–12 T1.3.4 M10 महाराज; Ś2.3 Ñ1 D2.8 °राजन्; G2 °भाग (for महाबाहो). —^{d}) B1 प्रभो (for स्वयम्).

43 ^{a}) B1.3.4 [ऽ]थ; D9 च (for तु). Ś Ñ2 V1.3 D1–5.8.9.12 T3.4 वाक्यं (for हृष्टः). —^{b}) B1.3.4 अभितः (for तत्र सं-). B4 स्थितः (for -स्थिताम्). Ś Ñ V1.3 D1–5.8.9.12 T3.4 ततः(Ś3 D8 कुतः) कुंभी(D2 °भ)नसीं बली (Ñ1 V3 स्थितां). —^{c}) M1 [अ]सौ (for वै). —^{d}) M8 अवेद्यतां. —For 43^{cd}, Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 subst. :

515* क्व गतो राक्षसेन्द्रोऽसौ तव कान्तो निवेद्यताम् ।

[Ś2 moth-eaten from सेन्द्रो up to कान्तो. Ś1.3 D8 वै (for ऽसौ). Ñ1 [ऽ]स्ति राक्षसश्रेष्ठस् (hypm.) (for राक्षसेन्द्रोऽसौ). Ñ1 V1.3 D1.3.4 T3.4 भर्ता (for कान्तो). Ś3 D8 निबोध्यतां (for निवेद्यताम्).];
while Ñ2 B1.3.4 subst. :

516* क्व ते भर्ता गतो भद्रे तन्मे शीघ्रं निवेदय ।

[B3 त्वं; B4 तं (for तन्). Ñ2 निवेद्यतां.]

44 ^{ab}) D12 प्रयास्यामि; M6 हि यास्यामि (for गमिष्यामि). G2 देव- (for सुर-). D7 T1–3 M3.7.9 -लोक- (for -लोकं). G1 transp. सह तेन and सुरलोकं. D6.7.10.11 T1.2 G2.3 M2–5.7–10 हि (for वै). K (ed.) जयावहे (for जयाय वै). Ñ2 B1.3.4 तेन सार्धं प्रयास्यामि सुराणां विजयाय वै. —^{c}) Ś3 D2.5.8.9 -मोहात्मा(D5 °च्च) (for -सौहार्दान्). —^{d}) G3 [ऽ]हं (for ऽस्मि). V3 ह्यवधारय (for ऽस्मि मधोर्वधात्). —After 44, V3 ins. :

517* भगिन्याश्च ममत्वं हि जायतेऽतीव सौहृदात् ।

45 ^{ab}) D6.7 समुत्थाय (for प्रसुप्तं तं). Ś Ñ1 D1–5.

एष प्राप्तो दशग्रीवो मम भ्राता निशाचरः ।
सुरलोकजयाकाङ्क्षी साहाय्ये त्वां वृणोति च ॥ ४६
तदस्य त्वं सहायार्थं सबन्धुर्गच्छ राक्षस ।
स्निग्धस्य भजमानस्य युक्तमर्थाय कल्पितुम् ॥ ४७
तस्यास्तद्वचनं श्रुत्वा तथेत्याह मधुर्वचः ।
ददर्श राक्षसश्रेष्ठं यथान्यायमुपेत्य सः ॥ ४८
पूजयामास धर्मेण रावणं राक्षसाधिपम् ।
प्राप्तपूजो दशग्रीवो मधुवेश्मनि वीर्यवान् ।
तत्र चैकां निशामुष्य गमनायोपचक्रमे ॥ ४९
ततः कैलासमासाद्य शैलं वैश्रवणालयम् ।
राक्षसेन्द्रो महेन्द्राभः सेनामुपनिवेशयत् ॥ ५० G. 7. 33. 51 B. 7. 25. 52 L. 7. 31. 53

इति श्रीरामायणे उत्तरकाण्डे पञ्चविंशः सर्गः ॥ २५ ॥

8.9.12 शयानं (D5 शायिनं) शयने तं तु (Ñ1 शूरं; D1.3.4 तत्र); Ñ2 V1.3 T3 ततः शयानं शयने; B1.3.4 शयने तं प्रसुप्तं तु (B1 °सुप्तस्य) (for ^{a}). Ś1.3 V3 D1.4.8 समुत्थाय; Ś2 moth-eaten; D6.7 प्रसुप्तं तं (for समुत्थाप्य). D10.11 T4 M10 transp. प्रसुप्तं तं and समुत्थाप्य. Ñ2 B1.3.4 तदासुरं; M8 निशाचरी (for निशाचरम्). —^{c}) Ś Ñ1 V1.3 D1–5.8.9.12 T3 सा (for सं-). Ñ2 B1.3.4 सा; G1 M2.3.5 Ck [ए]व (for [इ]व). V3 -हृष्टेन; D1.3.4 T3 -हर्षेण (for -हृष्टेव). —^{d}) Ś V1.3 D1–5.8.9.12 T3 सु (D1.4 च)विपश्चिता; Ñ2 B1.3.4 °चक्षणा; D7.10.11 T4 M6.10 सा (M10 स्व-) पतिं (M6 मुदिता) वचः; M8 स्वपतिं तदा; Ck as in text (for सुविपश्चितम्). Ñ1 राक्षसेंद्रं पतिं वचः.

46 ^{b}) Ñ1 भर्ता; D8 धाता (for भ्राता). Ñ2 B3.4 M6 भ्राता मम (by transp.); B1 गेहं मम (for मम भ्राता). D6.7.10.11 M6.10 महाबलः; G2 दशाननः (for निशाचरः). —^{c}) Ś Ñ2 V1.3 B1.3.4 D1–5.8.9.12 T3.4 देव- (for सुर-). —^{d}) Ś Ñ V1.3 B1.3.4 D1.3.4 सहायं; D9.12 T3.4 G1 M5.7 साहायं (for साहाय्ये). Ś Ñ1 V1.3 D1–5.8.9.12 T3 सः; Ñ2 B1.3.4 हि; M6 वे (for च).

47 ^{a}) Ñ V1.3 D9 T3 तस्य त्वं हि (Ñ2 तु) (for तदस्य त्वं). Ś D2.12 सहार्थे (D12 °र्थे)न; V3 D5 महाकार्ये (D5 °र्यं); D1.4.8 T3 सहायार्थे (D4 °यार्थों; D8 °येर्थेन [hypm.]) (for सहायार्थं). —^{b}) G2 स्व- (for स-). M10 सहंघोर. G2 राक्षसः; M8 राक्षसं (for राक्षस). Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 रक्षः संबंधिनो व्रज. —D1.4 om. 47^{cd}. —^{c}) V3 स्निग्धं सं-; T1.2 स्निग्धत्वं (for स्निग्धस्य). T3 याचमानस्य (for भजमानस्य). G1 राक्षसस्य सहायार्थं. —^{d}) D5 गच्छ युद्धाय; G2 M1 युद्धमर्थाय; M5 युक्तमास्थाय; Ck.t as in text (for युक्तमर्थाय). Ś D2.5.8.9.12 रक्षितुं; T4 कल्पितं (for कल्पितुम्). ❀ Ck : अर्थाय प्रयोजनाय साहाय्यं कल्पितुं संपादयितुं युक्तम् ।; so also Ct.❀

48 ^{a}) T3 तु (for तद्). Ś V1.3 D1–5.8.9.12 T3 पत्न्यास्तु (V1.3 °श्च; D1.4 °स्तु) (for तस्यास्तद्). D1.4 स्तुत्वा (for श्रुत्वा). —^{b}) Ñ2 V3 B1.3.4 स (V3 च) तां मधुः (for मधुर्वचः). Ś Ñ1 V1 D1–5.8.9.12 T3 तथेत्युक्त्वा मधुस्तदा (D3 T3 °था). —B1.3 om. 48^{c}–49^{d}. —^{d}) G1 च (for सः). —For 48^{cd}, Ś Ñ V1.3 B4 D1–5.8.9.12 T3 M6 subst. :

518* दृष्ट्वा स रावणं तत्र समेत्य च यथा वयः ।

[M6 ततः (for दृष्ट्वा). Ñ2 V1 B4 D1.3.4 T3 च; V3 तु (for स). M6 दृश्य (for तत्र). T3 रावणस्तस्या (sic) (for रावणं तत्र). Ś D2.8.9.12 संमान्य; V3 संमंत्र्य (for समेत्य). Ñ2 B4 D5 यथाविधि (for यथा वयः). T3 यथान्याय्यं समेत्य सः (for the post. half).]

49 B1.3 om. 49^{a-d} (cf. v.l. 48). —^{b}) M4.7 -[ई]-श्वरं; M6 -[उ]त्तमं; (for -[अ]धिपम्). Ś Ñ V1.3 B4 D1–5.8.9.12 राक्षसं राक्षस (B4 दानव)र्षभः. —^{c}) Ś1.2 Ñ2 प्राप्य वै तु; Ś3 Ñ1 V1.3 B4 D2.5.8.9.12 प्राप्यैव तु; D1.4 प्राप्यैव च; D3 प्रेक्ष्यैव तु; D6.7.10.11 T3.4 M6.10 प्राप्य पूजां (for प्राप्तपूजो). —^{d}) Ś Ñ V1.3 B4 D1–5.8.9.12 मधोर्गृ (B4 °र्गे)हमनु (Ñ2 °स्तु गृहसु)त्तमं. —After 49^{cd}, D6.7 T1.2 G3 M3.5 read $7.26.1^{cd}$ for the first time, repeating it in its proper place. —^{e}) M8 om. चैकां. B1.3.4 उषित्वैकां निशां तत्र.

50 ^{d}) T1 -निवेशयन् (for -निवेशयत्). Ś D2.5.8.9.12 सैन्यमु (D2.5.9.12 °न्यान्यु)पन्य (D5 °नि)वेशयत्; Ñ1 V1.3 D3 ससैन्यः प्र (V3 सं; D3 स)विवेश ह; Ñ2 B1.3.4 ससैन्यः समुपाविशत्; D1.4 T3 स्वसैन्यान्युपवेशयत्; M8 सोवतीर्य निवेशयत्.

Colophon. —*Kāṇḍa name*: Ś1 D2 M7 om. —*Sarga name* : Ś D3 सैन्योपनिवेशनो (D3 °नं); Ñ B1.3.4 मधुपुर (Ñ1 °वन)गमनं; V1 सैन्यनिवेशो; V3 D2.5.12 सैन्योपवेशनो (D12 °नं); D1.4.9 सैन्योपवेशो; D8 सैन्योपनिवेशो. —*Sarga no.* (figures, words or both) : Ś Ñ1 V3 B1 D2.12 om.; Ñ2 B3.4 33; V1 26; D1.4.5 32; D3.9 T4 31; D8 T3 30; M6 29. —After colophon, D2 concludes with राम; T4 with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः ; M10 with श्रीरामचन्द्राय नमः.

२६

G 7.34.1 B 7.26.1 L 7.32.1

स तु तत्र दशग्रीवः सह सैन्येन वीर्यवान् ।
अस्तं प्राप्ते दिनकरे निवासं समरोचयत् ॥ १
उदिते विमले चन्द्रे तुल्यपर्वतवर्चसि ।
स ददर्श गुणांस्तत्र चन्द्रपादोपशोभितान् ॥ २
कर्णिकारवनैर्दिव्यैः कदम्बगहनैस्तथा ।
पद्मिनीभिश्च फुल्लाभिर्मन्दाकिन्या जलैरपि ॥ ३

26

☞ V2 missing for Sarga 26 (cf. v.l. 7.12.2). B2 om. Sarga 26 (cf. v.l. 7.24.1). D12 begins with ॐ.

1 ᵃ) Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 तस्मिन्गिरौ; Ck.t as in text (for स तु तत्र). D1.4 दर्शनीये (for दशग्रीवः). —ᵇ) Ñ1 ससैन्यः स ह; V3 सहसैन्यः सः; T1.2 G3 M1.3 सैन्येन सह (by transp.) (for सह सैन्येन). V1 T3.4 सहसैन्यः प्रतापवान्. —D6.7 T1.2 G3 M3.5 read 1ᶜᵈ for the first time after 7.25.49ᶜᵈ and repeat it here. —ᶜ) Ś Ñ1 D2.5.8.9.12 T3.4 गते (for प्राप्ते). D4 [ऽ]हिमकरे. B3 दिनकरे प्राप्ते (by transp.). —ᵈ) G2 समचोदयत्; M3 (second time) समरोचत.

2 ᵃ) T3 च तथा (for विमले). —ᵇ) Ś Ñ1 D1–5.8.9.12 T3.4 तुंगे; V1 दिव्य-; V3 दुर्गे; D7 गंतुं; G1 हिम-; M3 तुंग-; M5.6 तुल्ये; Cv.g.k.t as in text (for तुल्य-). Ñ2 B1.3.4 सवितुस्तुल्य- (for तुल्यपर्वत-). Ś Ñ1 V1.3 D1–5.7–9.12 T3.4 -मूर्धनि; M6 -वर्चसा; Cv.g.k.t as in text (for -वर्चसि). ❀ Cv: तुल्यपर्वतवर्चसि तुल्यकैलासवर्चसि।; Cg.k.t: तुल्यपर्वतवर्चसि स्वनिविष्टकैलासपर्वततुल्यप्रभे (Cg °ष्टकैलासवत्तुल्याभे). ❀ —After 2ᵃᵇ, Ñ V1.3 B1.3.4 D1–7.9–12 S ins.:

519* प्रसुप्तं सुमहत्सैन्यं नानाप्रहरणायुधम् ।
रावणस्तु महावीर्यो निषण्णः शैलमूर्धनि ।

[V3 om. l. 1. —(l. 1) M6 तन् (for सु-). Ñ V1 B1.3.4 D1–5.9.12 T3.4 प्रसुप्ते च महा(T3 तथा)सैन्ये(Ñ1 °भागे) (for the prior half). Ñ1 T4 -[उ]द्यते; Ñ2 M5 -[अ]न्विते(M5 °तं); V1 B1.3.4 D5 -[आ]युधे; D1–4.9.12 G2 M7 -[आ]युते(G2 M7 °तं) (for -[आ]युधम्). T3 नानाप्रहरणैर्युते (for the post. half). —(l. 2) V1 B1.3.4 D1–4.9.12 G1 सु- (for तु). D2.5.9.12 विचरन् (for निषण्णः). M1 नग- (for शैल-).]

—ᶜ) T1 गुहास्; G1 गिरिं; M8.9 गणांस्; Cg.k.t as in text (for गुणांस्). M3 बहून्भागांश्च (for गुणांस्तत्र). ❀ Cg: गुणान्भोगार्हधर्मान्।; Ck.t: गुणान्कैलासपर्वतीयसकलकामभोगार्हधर्मान्. ❀ —M3 om. from 2ᵈ up to the prior half of l. 1 of 521*. —ᵈ) D10.11 T1 G2.3 -पादप-; G1 -ह्लासोप-; K (ed.) -पादसु- (for -पादोप-). T1 -शोभिताः; G1 °तं; M6 °ते (for -शोभितान्). —For 2ᶜᵈ, Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T4 subst.:

520* अपश्यत्सुबहून्भावान्प्रदोषे विमले गिरौ ।

[V3 विमलान् (for सुबहून्). Ñ1 भागान् (for भावान्). Ñ2 स च तत्रस्थः; B1.3.4 गग(B4 नंद)नं तत्र; D9 तु प्रसुप्ते च (for सुबहून्भावान्). Ś D8 विमलेंबरे; Ñ2 समये गिरौ (for विमले गिरौ).]

—Thereafter, D12 cont. l. 2 only of 524*.

3 D12 M3 om. 3 (for M3, cf. v.l. 2). —ᵃ) Ś2 कर्णिकारैर्. D6.7.10.11 T4 M10 दीप्तैः (for दिव्यैः). Ñ1 -वनोद्देशे; Ñ2 -वनं दिव्यं; V1.3 T3 -वने दिव्ये (for -वनैर्दिव्यैः). —ᵇ) Ñ1 V1.3 T3 -गहने; Ñ2 -गहनं; D6 -बहुलैस्; D7.10.11 M2.9.10 -बकुलैस्; T4 -कमलैस्; M5 -शाखैस्; Cg as in text (for -गहनैस्). Ñ1 तदा. —ᶜ) Ś Ñ V1.3 B1.3.4 D2.3.5.8.9 T3 सरिद्भिश्च; D1.4 सपद्माभिर् (for च फुल्लाभिर्). ❀ Cv: पद्मिनीभिरिति। सुरस्त्रीणा(सरसीना?)मुपलक्षणमेतत्। न हि केवला पद्मिनी चन्द्रोदये विकसति।; Ck: फुल्लाभिः पद्मिनीभिश्चेति। सरस्यः पद्मिन्यः। तासां फुल्लत्वं तत्कालविकासोचितकल्हारकैरवेन्दीवरादिभिः।; Ct: पद्मिन्यः सरांसि तासां फुल्लत्वं तत्कालोचितविकासवत्कल्हारादिभिर्बोध्यम्. ❀ —ᵈ) G M1.2.4.6.9.10 मंदाकिनि- (for मन्दाकिन्या). Ś Ñ V1.3 B1.3.4 D1–5.8.9 T3.4 मंदाकिन्यादिभिर्युतैः(Ñ2 D2 °तं; V1.3 B1 D3 T3.4 °ते; D9 °तः). —After 3, Ś Ñ V1 B1.3.4 D1–5.8.9 read 524*. —After 3, V3 D6.7.10.11 S (M3 after 2ᶜ owing to om.) ins.:

521* चम्पकाशोकपुंनागमन्दारतरुभिस्तथा ।
चूतपाटललोध्रैश्च प्रियङ्ग्वर्जुनकेतकैः ।
आरग्वधतमालैश्च प्रियालबकुलैरपि ।
एतैरन्यैश्च तरुभिरुद्भासितवनान्तरे ।
किंनरा मदनेनार्ता रक्ता मधुरकण्ठिनः । [5]
समं संप्रजगुर्गेयं मनस्तुष्टिविवर्धनम् ।
विद्याधरा मदक्षीबा मदरक्तान्तलोचनाः ।
योषिद्भिः सह संक्रान्ताश्चिक्रीडुर्जहृषुश्च ह ।

[M3 om. the prior half of l. 1 (cf. v.l. 2). —(l. 2) T3 बकुलैश्चूत- (for चूतपाटल-). —K (ed.) reads l. 3 twice (second time in marg.). —(l. 3) V3 कंकोलैश्च; G2 सालैस्तालैस्; M2.4.6–9 तगरैश्च; M5 सालताल-; K (ed.) (second time) आरग्वधैस् (for आरग्वध-). D6.7 सुरगैर्नारि(D7 °लि)केरैश्च; D10.11 T4 M10 K (ed.; first time) तगरै(T4 सुगतै)र्नारि(D11 M10 °लि)केरै(K [ed.] °लै)श्च; T3 खर्जूरैर्नारिकेलैश्च (for the prior half). V3 प्रियंगु-; M6 प्रियालैर् (for प्रियाल-). V3 तथा (for अपि). D6.7.10.11

घण्टानामिव संनादः शुश्रुवे मधुरस्वनः ।
अप्सरोगणसंघानां गायतां धनदालये ॥ ४
पुष्पवर्षाणि मुञ्चन्तो नगाः पवनताडिताः ।
शैलं तं वासयन्तीव मधुमाधवगन्धिनः ॥ ५
मधुपुष्परजःपृक्तं गन्धमादाय पुष्कलम् ।
प्रववौ वर्धयन्कामं रावणस्य सुखोऽनिलः ॥ ६

गेयात्पुष्पसमृद्ध्या च शैत्याद्वायोर्गुणैर्गिरेः ।
प्रवृत्तायां रजन्यां च चन्द्रस्योदयनेन च ॥ ७
रावणः सुमहावीर्यः कामबाणवशं गतः ।
विनिश्वस्य विनिश्वस्य शशिनं समवैक्षत ॥ ८
एतस्मिन्नन्तरे तत्र दिव्यपुष्पविभूषिता ।
सर्वाप्सरोवरा रम्भा पूर्णचन्द्रनिभानना ॥ ९

G. 7. 34. 10
B. 7. 26. 14
L. 7. 32. 10

T3.4 M10 K (ed.; first time) -पनसैस्तथा. —(l. 4) D6 चूतैर् (for एतैर्). M5 चान्यैश्च (for अन्यैश्च). T4 M1 बहुभिर् (for तरुभिर्). V3 बहुभिश्च मनोहरैः (for the post. half). —(l. 5) V3 मदगंभीराः (for मदनेनार्ता). M1.5 -कर्णिनः; Cg.k.t as above (for -कण्ठिनः). V3 कमलोत्फुल्ललोचनाः (for the post. half). ❀ Cg.t : मधुरकण्ठिनः मधुरकण्ठध्वनयः ।; so also Ck. ❀ —V3 om. l. 6–7. —(l. 6) G1 नित्यं; Cg.k.t as above (for समं). M6 -जहुर् (for -जगुर्). D7.10.11 यत्र (for गेयं). —(l. 7) G3 मदक्षीबा; M3 मधुक्षीबा. —(l. 8) V3 कांक्षन्किश; T4 संभ्रांताश्; M6 ते कांताश् (for संक्रान्ताश्). D8 बहुशश्; G2 M6 जहसुश् (for जहृषुश्). D6.7.10.11 T3.4 वै; M10 ते (for ह). T1.2 G1.3 M5 तत्र पर्वते; M1 जहृष्श्च ह (sic) (for जहृषुश्च ह). V3 चित्रीवन्किश्च सर्वशः (sic) (for the post. half).]

4 Before 4, V3 reads 524*. —^{a}) Ñ2 B1.3 संह्लादः; M10 नादस्तु (for संनादः). —^{b}) B4 T1.2 G3 श्रूयते (for शुश्रुवे). Ś Ñ1 V1.3 D3–5.8.9.12 T3 मधुरः पटुः; D1 मधुरो बहुः; D2 स मधुः पटुः; M4.7–10 मधुरस्वरः (M10 °रं) (for मधुरस्वनः). —For 4^{cd}, Ś V1.3 D1–5.8.9.12 subst. :

522* गायन्तीनामप्सरसां शब्देनापूरयन्गिरिम् ।

[G (ed.) नृत्यंतीनां (for अप्सरसां). D2.3.5 [आ]पूरयद्; D9 [आ]पूरितं (for °रयन्). V1.3 D1.4 धनदोपासिते (V1 D1.4 °श्रये) गिरौ (for the post. half).];

while Ñ B1.3.4 subst. for 4^{cd} :

523* गायतामुपनृत्यानां गन्धर्वाप्सरसां प्रभो ।

[Ñ1 नृत्यतां चैव (for उपनृत्यानां). Ñ1 गिरौ (for प्रभो).]

5 ^{a}) V3 lacuna for पुष्पवर्षाणि. Ś Ñ1 V1.3 D1–5.8.9.12 वर्षंतो (Ñ1 V1.3 °ति; D1.4 °ते) (for मुञ्चन्तो). Ñ2 B1.3.4 ववृषुः पुष्पवर्षाणि. —^{b}) D6 नक्तं (for नगाः). Ñ2 B1.3.4 -घूर्णिताः (for -ताडिताः). —^{c}) D8 ते; T3 तु (for तं). V3 तं शैलं (by transp.). M6 शैलांतं. T3.4 वासयंतो; Ck.t as in text (for वासयन्ति). D1.4.5 च; T3.4 वै (for [इ]व). Ñ2 B1.3.4 G (ed.) वासयंतोथ तं शैलं (B4 शैलं ते; G [ed.] शैलं तं). —^{d}) V3 M6 मधुवासमु- (for मधु-माधव-). V1 -गंधिनं; M9 -गंधिभिः. B3 माधवमधुगंधिनः (unmetric). ❀ Cv : मधुमाधवगन्धिनः, मधुगन्धिनो माधवगन्धिनश्च । माधवं माध्वीकं तच्च शर्कराप्रकृतिकम् । ' मधु शार्करो माधवो स्त्रिया 'मिति वैजयन्ती ।; Cg : मधुमाधवगन्धिनः नित्यमेव मधुमाधवाभ्यां चैत्रवैशाखाभ्यां वसन्तमासाभ्यां गन्धिनः तत्कृतपुष्पगन्धा इत्यर्थः ।; Ck : मधुमाधवगन्धिनः नित्यमेव तूत्कट्टिमासमयवसन्तसर्वपुष्पसुगन्धिनः ।; Ct : मधुमाधवगन्धिनो वसन्तीयसर्वपुष्पसुगन्धयः. ❀

6 D12 om. 6; Ś Ñ V1.3 B1.3.4 D1–5.8.9 om. 6^{ab}. —^{a}) M6 मृदुः (for मधु-). —^{c}) G2 M1 प्रययौ (for प्रववौ). —^{d}) T3 M1.3.9 सुखानिलः (for सुखोऽनिलः). —For 6^{cd}, Ś Ñ V1.3 B1.3.4 D1–5.8.9 subst. and read after 3 (V3 subst. and reads before 4); D12 cont. l. 2 only after 520* (owing to om.):

524* प्रववौ सुसुखो वायुः पुष्पगन्धवहस्तथा ।
तस्मिन्गिरिवरे रम्ये चन्द्रपादोपशोभिते ।

[D3 om. l. 1. —(l. 1) Ñ2 B1.3.4 च (for सु-). D5 पुण्य- (for पुष्प-). Ñ2 B1.3.4 शुचिः (for तथा).]

7 ^{a}) Ś Ñ2 B1.3.4 D1.2.4.8.9 स तु; Ñ1 V1.3 तत्र; D3.5 तेषां; D12 मधु- (for गेयात्). T3 पुष्पवृष्टि- (for गेयात्पुष्प-). V3 -समृद्धं. Ś2 moth-eaten; D1.4 वै; T3 [अ]थ (for च). —^{b}) D6.7.10.11 T4 M10 गिरेर्गुणाद्; T1.2 M1.6 गिरेर्गुणैः (by transp.); G2 गुणाद्गिरेः; M3 गुणादपि (for गुणैर्गिरेः). Ś Ñ1 V1.3 D1–5.8.9.12 T3 वातस्य (Ś2 moth-eaten) शिशिरस्य च; Ñ2 B1.3.4 शिशिरस्यानिलस्य च. —^{c}) D6 प्रव्यक्तायां; M6 प्रवृत्तया (for प्रवृत्तायां). Ñ B1.3.4 T3 G3 तु (for च). M6 रजन्या च. —^{d}) L (ed.) तु (for च). Ñ B1.3.4 D1.4 [उ]दयनं प्रति (for °नेन च).

8 ^{a}) Ś3 D1.6.7.10.11 T G1.3 M1–3.6.8.9 स; V3 M10 तु (for सु-). Ñ2 B3.4 महातेजाः (for °वीर्यः). —^{b}) Ñ V1.3 B1.3.4 -मोह-; D1.4 -लोभ-; G1 -पाश- (for -बाण-). M4.5.7 -प्रपीडितः (for -वशं गतः). D6.7.10.11 कामस्य वशमागतः. —^{c}) Ś Ñ V1.3 B1.3.4 D1.4.8.9 विनिःश्वस्य विनिःश्वस्य (Ś2 moth-eaten; V3 च चंद्रं च). —^{d}) T1.2 G3 M1.2.4.9 अवेक्ष्य च; M5 उदैक्षत (for अवैक्षत). Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 चंद्रं (V3 मुहुर्) मुहुरु (Ś2 moth-eaten) दै (D3 °रवे) क्षत.

9 ^{a}) Ñ2 B1.3.4 राम; M1 तात (for तत्र). —^{b}) D1.3.4 -गंध-; M8 -[उ]त्सव- (for -पुष्प-). Ñ2 B1.3.4 दिव्यमाल्या (B4 °गंधा) नुलेपना; D6.7.10.11 T1–3 G M1–5.

G. 7. 34. 11 B. 7. 26. 17 L. 7. 32. 11

कृतैर्विशेषकैरार्द्रैः षडर्तुकुसुमोत्सवैः ।
नीलं सतोयमेघाभं वस्त्रं समवगुण्ठिता ॥ १०

यस्या वक्त्रं शशिनिभं भ्रुवौ चापनिभे शुभे ।
ऊरू करिकराकारौ करौ पल्लवकोमलौ ।
सैन्यमध्येन गच्छन्ती रावणेनोपलक्षिता ॥ ११

7.9.10 दिव्या(G2 सर्वा)भरणभूषिता. —V1 om. 9^{cd}. —^{c}) M10 तत्र (for सर्व-). G1.3 M2 -[अ]प्सर- (for -[अ]-प्सरो-). —^{d}) Ś Ñ V3 B1.3.4 D1–5.8.9.12 T4 गच्छंती तेन लक्षिता. —After 9, V3 D3.5–7.10.11 T1–3 G M ins.:

525* दिव्यचन्दनलिप्ताङ्गी मन्दारकृतमूर्धजा ।
रतोत्सवकृता रम्भा दिव्यपुष्पविभूषिता ।
चक्षुर्मनोहरं पीनं मेखलादामभूषितम् ।
समुद्वहन्ती जघनं रतिप्राभृतमुत्तमम् ।

[(l. 1) D3 M6 -दिव्यांगी; M3 -लिप्ता च (for -लिप्ताङ्गी). G1 मंथरा; Cv.g.k.t as above (for मन्दार-). —(l. 2) V3 वन-; D3 ऋतु-; D5–7.10.11 T3 दिव्य- (for रत-). M5 -क्षमा (for -कृता). M2 दिव्या (for दिव्य-). M4.7 -[उ]त्सववि-; M6 -भूषण-; Cv as above (for -पुष्पवि-). M1 दिव्याभरणभूषिता; M5 दिव्यांबरधरा शुभा; K (ed.) पूर्णचंद्रनिभानना (for the post. half). —(l. 3) M2.8.9 मनोरमं (for °हरं). V3 T2 M1 स्फीतं (for पीनं). G1 M5 -शोभितं (for -भूषितम्). —(l. 4) T1 G1 M3 -प्रावृतम् (for -प्राभृतम्). V3 रतिप्राभृति चोत्तमं; T3 गच्छंती तेन लक्षिता (for the post. half). ❀ Cv: रतिप्राभृतकं प्राभृतमुपदा ।; Cg: रतिप्राभृतं रत्युपदाभूतम्, रतिवर्धकमित्यर्थः ।; so also Ck.t. ❀

10 Ś2 moth-eaten from वि in ^{a} up to सो in ^{b}. —^{a}) T4 G2 विशेषणैर्; Cg.t as in text (for °कैर्). Ś1.3 D8 हृद्यैः; B1 गात्रैः; B3.4 चेशैः; D5 T4 सांद्रैः; D9 संघैः; D12 पद्यैः; M3 रम्यैः; M8 आद्यैः (for आर्द्रैः). ❀ Cg: विशेषकैरलङ्कारैरित्यर्थः ।; Ct: विशेषकैर्हरिचन्दनादिकल्पितैः कपोलादिषु चित्रकैः. ❀ —^{b}) Ś1.3 Ñ V1.3 B1.3.4 D1–5.7–9.12 T3.4 G1.2 M8–10 सर्वर्तु-(D3 °त्र); Cv.g.k.t as in text (for षडर्तु-). Ś Ñ V3 B1.3.4 D2.8.9.12 M6 -[उ]ज्वलैः; V1 D1.3–5 T3.4 -[उ]ज्वला; D6 M4.10 -[उ]त्करैः; D7.10.11 T1.2 G M5 Cg.k.t -[उ]द्भवैः; M3 -[उ]त्तमैः (for -[उ]त्सवैः). ❀ Cv: षडर्तुकुसुमोत्सवैः षडर्तुकुसुमानां शृङ्गारैः ।; Cg: षडर्तुकुसुमोद्भवैरित्यर्थः । ऋकारस्य गुणश्छान्दसः ।; so also Ck.t. ❀ —After 10^{ab}, Ñ B1.3.4 ins.:

526* बिभ्रती कान्तिमद्रूपं कान्तिद्युतिमतिश्रियम् ।

[Ñ1 -कांतिम् (for -द्युतिम्). Ñ2 कांतिद्युतिसमाश्रयं; G (ed.) कांता कांतिमतीं श्रियं (for the post. half).];

while D5–7.10.11 T1.2 G M1–5.7–10 ins. after 10^{ab}:

527* बभावन्यतमेव श्रीः कान्तिद्युतिमतिश्रियाम् ।

[T1 M2.3 ह्रीः; G2 स्त्री (for श्रीः). G M4.5.8 -श्रिया; M7 -ह्रिया (for -श्रियाम्). D5–7.10.11 M10 कांतिश्रीद्युतिकीर्तिभिः (for the post. half). ❀ Cg: श्रीकान्तिद्युतिमतिह्रियां देवस्त्रीविशेषाणामन्यतमेव स्थिता ।; Ct: कान्त्या प्रत्यवयवशोभारूपसौन्दर्येण श्रियाभरणसंपदा द्युत्या लावण्येन कीर्त्या च । अन्यतमा स्वार्थे तमः । अन्या श्रीरिव लक्ष्मीरिव बभावित्यर्थः. ❀]

—^{c}) T1.2 G3 -मेघाभ- (for -मेघाभं). Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T3.4 नीलतोयदसंकाशैः(Ñ B1.3.4 °वर्णेन; V1.3 D1–5 T3.4 °संकाशं [D1.4 °शा]); M6 नीलनिर्मलतोयाभं. —^{d}) Ś V3 D1.8.9.12 वस्त्रैः; D5 वासः; M6 वक्त्रं (for वस्त्रं). V3 G1 -[अ]भि- (for -[अ]व-). T3.4 G2 M1.2.4.6.7.9.10 -कुंठिता; G1 M3 -कुंठितं; M8 -गुंठयत् (for -गुण्ठिता). Ñ B1.3.4 सा पटेनावगुंठिता; T1.2 G3 -वस्त्रेणैवावकुंठिता; M5 कौशेयं परिवेष्ट्य सा. ❀ Cg.k.t: समवकु(Ct °गु)ण्ठिता प्रावृतवती. ❀ —After 10, D3 ins.:

528* काञ्चीभूषणशब्देन भूषणोन्मिश्रितेन च ।
वित्रासयन्ती पतगान्मृगानपि च भामिनी ।

11 ^{a}) Ñ1 V1.3 T3.4 तस्या (for यस्या). D4 G2 वस्त्रं. Ñ2 B1.3.4 वक्त्रं यस्याः (by transp.); G (ed.) वक्त्रमस्याः (for यस्या वक्त्रं). Ñ2 B3.4 -प्रख्यं (for -निभं). D4 तथा कृष्णं (for शशिनिभं). —^{b}) T1.2 G1.3 M7 चाप(T1 G3 M7 °व)नते; M4 चाप्यायते (for चापनिभे). Ś Ñ1 V1.3 D1–5.8.9.12 T3 गात्रं(Ñ1 वपुश्) चामीकरप्रभं; Ñ2 B1.3.4 मध्यं चापि (B1 चाप; B3 बाण)लतोपमं; T4 विशाले जलजेक्षणे; M6 गात्रं चावनतोत्तमं. —^{c}) Ś D1.4.8.12 कुचौ(Ś2 moth-eaten) (for ऊरू). Ś1.3 V1 D1–5.8.9.12 T3.4 -करोद्भौ (for -कराकारौ). Ś2 * * * रोद्भौ (moth-eaten) (for करिकराकारौ). V3 सुवर्णनिकराकारौ. —^{d}) M6 हस्तौ; M10 पाणी (for करौ). V1 परम-; B3 उत्पल-; D12 पद्मसु-; L (ed.) कमल- (for पल्लव-). Ñ1 V3 कोमलपल्लवौ (by transp.) (for पल्लवकोमलौ). —After 11^{cd}, Ś Ñ1 V1.3 B4 D1–5.8.9.12 T3.4 ins.; while M6 ins. l. 5 only after 11^{cd}:

529* वज्रमध्योपमं मध्यं श्रोणी पुलिनविस्तृता ।
पादौ फुल्लारविन्दाभौ स्वङ्गुलीतललक्षणौ ।
रुते वीणा गतौ हंसी कुन्दपुष्पनिभा द्विजाः ।
इत्येषा ह्युपमा स्त्रीणां स्वर्गे च वरवर्णिनी ।
द्वितीया श्रीरिवोदग्रा श्रीरिवोदग्रगामिनी । [5]

[(l. 1) T3.4 वेदि- (for वज्र-). Ñ1 वीरं (sic); V3 corrupt; D8 (m.) वज्रं (for मध्यं). B4 गात्रं चामीकरप्रख्यं; D5 घनस्तनी वज्रमध्या (for the prior half). V1 परम-; B4 D5 विपुल- (for पुलिन-). —(l. 2) Ś2.3 पदौ (for पादौ). Ñ1 T3.4 रक्त-; V3 D1.2.4.5 न्युब्ज-; B4 अपि (for फुल्ल-). D12 च (for सु-). T3.4 -शुभ- (for -तल-). Ñ1 -लक्षिणौ; D2.8 -लक्ष्मणौ (for -लक्षणौ). B4 अंगुली शुभलक्षणा;

तां समुत्थाय रक्षेन्द्रः कामबाणबलार्दितः ।
करे गृहीत्वा गच्छन्तीं स्मयमानोऽभ्यभाषत ॥ १२
क्व गच्छसि वरारोहे कां सिद्धिं भजसे स्वयम् ।
कस्याभ्युदयकालोऽयं यस्त्वां समुपभोक्ष्यते ॥ १३
तवाननरसस्याद्य पद्मोत्पलसुगन्धिनः ।
सुधामृतरसस्येव कोऽद्य तृप्तिं गमिष्यति ॥ १४
स्वर्णकुम्भनिभौ पीनौ शुभौ भीरु निरन्तरौ ।
कस्योरस्थलसंस्पर्शं दास्यतस्ते कुचाविमौ ॥ १५
सुवर्णचक्रप्रतिमं स्वर्णदामचितं पृथु ।
अध्यारोक्ष्यति कस्तेऽद्य स्वर्गं जघनरूपिणम् ॥ १६ G. 7. 34. 0 B. 7. 26. 24 L. 7. 32. 20

(for the post. half). —(l. 3) V3 स्वरे (for रुते). D5 सततं च (for रुते वीणा). D5 -समा (for -निभा). —(l. 4) V1 सकामा; V3 D1.3–5 T3.4 इह (T4 °यं) या (D1.4 हि); B4 ईहया (for इत्येषा). V1 B4 D2.5 T3.4 [अ]नु (D2 [अ]प्यु; T3.4 [अ]त्यु)पमा; D1.4 [अ]नुत्तमा (for ह्युपमा). G (ed.) ईदृशाप्युत्तमस्त्रीणां (for the prior half). Ś D2.5.8.12 स्वर्गेपि; V3 स्वर्गेषु; T3.4 स्वर्गेथ (for स्वर्गे च). Ś V1 D8.12 -वर्णिनां (for -वर्णिनी). —(l. 5) D5 M6 [आ]भाति (for [उ]दग्रा). V3 lacuna for second श्रीरिवो. D1–5.9 T3 ह्रीर् (for second श्रीर्). T4 कांतिश्रीद्युतिकीर्तिभिः; M6 साध्वी ह्रीमत्तया च सा (for the post. half). —For l. 5, Ñ2 B1.3.4 subst.:

529(A)* बभासे श्रीर्द्वितीया सा तदा श्रीरिव रूपिणी ।

[B3.4 कृता (for तदा). B1 गताश्रादिव (for तदा श्रीरिव).]

—^{e}) V3 नेतृ- (for सैन्य-) B3 D2.5.9 -मध्ये च (for -मध्येन). V3 lacuna for न गच्छंती. Ś Ñ V1 B1.3.4 D1–5.8.9.12 T3.4 सा रंभा (for गच्छन्ती). —^{f}) B3 गच्छंती तेन (for रावणेनोप-). K (ed.) -वीक्षिता (for -लक्षिता). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 गंगेव (T3.4 वेगेन) त्वरिता ययौ; Ñ2 B1.4 शीघ्रं गंगेव गच्छती.

12 ^{a}) B3 समुत्थाप्य; M3 समा*य (for समुत्थाय). Ñ1 पौलस्त्यः; Ñ2 B1.3.4 D3 T3.4 लंकेशः; V1 राक्षसेंद्रः (hypm.); V3 तद्रक्षः; D6.7.10.11 T1.2 G M2–10 गच्छंतीं (for रक्षेन्द्रः). M1 तां निरीक्ष्य समुत्थाय. —^{b}) Ñ1 -वेग-; B3 -राग-; T3.4 -बाणैः (for -बाण-). V3 -प्रपीडितः; D3.6.7.10.11 -वशं गतः; T3.4 समाहतः (for -बलार्दितः). —^{c}) G1 करैर्; M6 करं (for करे). Ñ B1.3.4 सव्रीडां; V1.3 D3.5 गच्छंत्या; D6.7.10.11 T1.2 G M4.5.7.8.10 लज्जंतीं; Ct as in text (for गच्छन्तीं). —^{d}) G2 ह्यभाषत; M6 [ऽ]ब्रवीदिदं; Ct as in text (for ऽभ्यभाषत). Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T3.4 वदनं वीक्ष्य सो (D1.4 चा)ब्रवीत्.

13 ^{a}) V1 महाभागे (for वरारोहे). —^{b}) M6 क्व सिद्धं; Cg.k.t as in text (for कां सिद्धिं). Ś Ñ1 V1.3 D1–5.8.9.12 T3.4 रंभे (D1.4 भद्रे) तत्त्वं (V3 सत्यं; T3 तथ्यं) ब्रवीहि मे; Ñ2 B1.3.4 रंभे त्वं ब्रूहि तत्त्वतः. —^{c}) Ñ2 B1.3.4 [ऽ]द्य (for ऽयं). —^{d}) T1.2 M3.5 कस् (for यस्). M6 -भोक्ष्यति. —After 13, B4 reads 17.

14 Ñ2 B1.3 om. 14–16. —^{a}) D6.7.10.11 त्वदानन-. D3 G1 M1.5.6 [अ]स्य (for [अ]द्य). —^{b}) D6 -सुगंधिभिः. —^{c}) T2 स्निग्ध-; M3 वृथा-; M5 पीत्वा (for सुधा-). T1 G3 M3 [इ]ह (for [इ]व). ❀ Cg: सुधामृतरसस्येव अमृतादमृतरसस्येवेत्यर्थः। तृप्तियोगे षष्ठी. ❀ —^{d}) M8 तृप्यन् (for तृप्तिं). —For 14, Ś Ñ1 V1.3 B4 D1.2.4.5.8.9.12 T3.4 subst.; while D3 M3 ins. after 14:

530* क इदं पूर्णचन्द्राभं निरवद्योपलक्षणम् ।
मुखामृतं पास्यति ते ह्यमृतं देवराडिव ।

[(l. 1) Ś D8 यत्रेदं; V3 वदनं; B4 कस्यायं; D2.9.12 य इदं (for क इदं). D8 -चंद्राभे. V3 lacuna for निरवद्यो. V1 -[उ]पलक्षणे; V3 D1.3–5 T4 M3 -[उ]त्पलेक्षणं; T3 -[उ]त्स-वेक्षणं (for -[उ]पलक्षणम्). D2 निवाद्योत्पललक्षणं (sic) (for the post. half). —(l. 2) Ś D1.2.4.5.8.12 पास्यते. Ś D8.12 को; D1.4 वा; D5 [ऽ]द्य (for ते). Ñ1 ह्युच्छितं; D2 (with hiatus) अमृतं; D9 पीयूषं (for ह्यमृतं).]

15 Ñ2 B1.3 D9 om. 15 (for Ñ2 B1.3, cf. v.l. 14). —^{a}) V1 कुचौ; D1.2.4 पूर्ण- (for स्वर्ण-). D3 -गतौ (for -निभौ). Ś D8 पीतौ (for पीनौ). M6 सुवर्णकुंभोपनिभौ. —^{b}) Ś D2.5.8.12 उभावपि; Ñ1 V1.3 B4 D3 T3 उभौ भीरु (Ñ1 पीनौ); D1.4 मध्ये भीरु; G1 M6 शुभौ पीनौ (for शुभौ भीरु). M1 निरुत्तरौ (for निरन्तरौ). —^{c}) Ś Ñ1 V1 D1–6.8.10–12 कस्योरः- (Ś D2.8.12 °रु-) (for कस्योर-). Ś Ñ1 V1 D1–4.8.12 -कर- (for -स्थल-). V3 कस्य पुण्यैः करस्पर्शौ; M1 कस्योरस्थ संस्पर्शं (sic). —^{d}) Ś Ñ1 D8 T3.4 संप्राप्स्येते; V1 प्राप्स्येते तौ; B4 प्राप्स्येते च; D1–5.12 संप्राप्स्येते; D7 T2 G3 M2.6.9 दास्येते ते (for दास्यतस्ते). Ś Ñ1 V1 B4 D1–5.8.12 T3.4 तव; D6 उभौ; M5 om. (for इमौ). G1 कुचोत्तमौ (for कुचाविमौ). V3 दृश्येते रुचिरौ तव.

16 Ñ2 B1.3.4 om. 16 (for Ñ2 B1.3, cf. v.l. 14). —^{a}) M3 सुवक्र- (for सुवर्ण-). M5.9 -चंद्र- (for -चक्र-). —^{b}) M6 -[आ]लिकं (for -चितं). T4 स्वर्णदाम्ना परिष्कृतं (cf. the post. half of 531*). —For 16^{ab}, Ś Ñ1 V1.3 D1–5.8.9.12 T3 subst.:

531* स्वर्णचक्रप्रतीकाशं स्वर्णदाम्ना परिष्कृतम् ।

[V1 पूर्णचंद्र- (for स्वर्णचक्र-). V3 D1.4 -दाम- (for -दाम्ना). Ś3 D8 परिस्थितं.]

—^{c}) T3 अध्यारोहति. Ś D2.8.9.12 अध्यारोहयते कस्ते; Ñ1 V1.3 D1.3–5 T4 अध्या (T4 °धि)रोहिष्यते (D1.4 °ति) कस्ते. —^{d}) Ś Ñ1 V1.3 D6.8.9.12 जघनं स्वर्ण-; D2.5.7.10.11 M10

G. 7.34.18 B. 7.26.25 L. 7.32.21

मद्विशिष्टः पुमान्कोऽन्यः शक्रो विष्णुरथाश्विनौ ।
मामतीत्य हि यस्य त्वं यासि भीरु न शोभनम् ॥ १७
विश्रम त्वं पृथुश्रोणि शिलातलमिदं शुभम् ।
त्रैलोक्ये यः प्रभुश्चैव तुल्यो मम न विद्यते ॥ १८
तदेष प्राञ्जलिः प्रह्वो याचते त्वां दशाननः ।
यः प्रभुश्चापि भर्ता च त्रैलोक्यस्य भजस्व माम् ॥ १९
एवमुक्ताब्रवीद्रम्भा वेपमाना कृताञ्जलिः ।
प्रसीद नार्हसे वक्तुमीदृशं त्वं हि मे गुरुः ॥ २०
अन्येभ्योऽपि त्वया रक्ष्या प्राप्नुयां धर्षणं यदि ।
धर्मतश्च स्नुषा तेऽहं तत्त्वमेतद्ब्रवीमि ते ॥ २१
अब्रवीत्तां दशग्रीवश्चरणाधोमुखीं स्थिताम् ।
सुतस्य यदि मे भार्या ततस्त्वं मे स्नुषा भवेः ॥ २२

जघनं स्वर्ग- (by transp.) (for स्वर्गं जघन-). T3.4 जघनं वरवर्णिनि. ❀ Ct : स्वर्गरूपिणं स्वर्गो निरतिशयसुखं तस्य रूपं यस्यास्ति। निरतिशयसुखहेतुभूतमित्यर्थः. ❀

17 B4 reads 17 after 13. —^{a}) Ñ1 D2.5 T4 [ऽ]यम्; V1 D6.7.10.11 T1-3 G3 M1.3.4.6.7.10 [ऽ]द्य; D1.4 [ऽ]सौ (for ऽन्यः). D3 नान्य (for कोऽन्यः). Ñ2 B1.3.4 मद्विशिष्टतरः कोन्य(B1 °द्य). —^{b}) Ñ2 B1.3.4 इंद्रो (for शक्रो). Ś Ñ1 V1.3 D1-5.8.9.12 T3.4 इंद्रो(V3 शक्रो)-ग्निर्व(Ñ1 °थ व; D5 T3.4 वा व)रुणो यमः (V3 D1.3.5.8 °णोपमः). —D1.4 om. 17^{c}–18^{b}. —^{c}) D5 यम् (for माम्). Ś Ñ1 V1.3 D2.3.5.8.9 तु; D12 [ए]व; T3.4 च (for हि). Ś D8 कस्य; Ñ1 D10.11 यच्च; V3 D6.7 T3 M10 यं च(V3 मा [sic]); T4 यत्त्वं; M8 यस्मात् (for यस्य). T4 च (for त्वं). —^{d}) M8 याता (for यासि). D6 शोभसे (for शोभनम्). Ś Ñ1 V1.3 D2.3.5.8.9.12 T3.4 गच्छसीं(Ś3 D3 °च्छंतीं)-दुनिभानने. —For 17^{cd}, Ñ2 B1.3.4 subst. :

532* गच्छसि त्वमतिक्रम्य यन्मां तत्ते न शोभनम् ।

18 D1.4 om. 18^{ab} (cf. v.l. 17). —^{a}) Ś B4 D8.12 विश्राम्यतु(B4 °म्यतां; D12 °म्य त्वं); Ñ2 B1.3 विश्रम्यतां; D2 निशाम्य त्वं (sic); D3.5 T1.2 G3 M3.10 विश्रमस्व (for विश्रम त्वं). Ś Ñ V1.3 B1.3.4 D2.5.8.9.12 T3.4 वरारोहे; D3 विशालाक्षि (for पृथुश्रोणि). —^{b}) Ś D8.12 -तटम् (for -तलम्). —G2 om. 18^{c}–20^{b}. —^{c}) M6 यस्य पुरुषस्; Cv as in text (for यः प्रभुश्चैव). —^{d}) D6.7.10.11 मदन्यो नैव; Cv as in text (for तुल्यो मम न). ❀ Cv : त्रैलोक्ये मम तुल्यो यः प्रभुः स च न विद्यते. ❀ —For 18^{cd}, Ś Ñ V1.3 B1.3.4 D1-5.8.9.12 T3.4 subst. :

533* त्रिषु लोकेषु न ह्यस्ति यो मे तुल्यबलो भवेत् ।

[D2.12 कालेषु (for लोकेषु). V3 न ह्यत्र; D12 न ह्यास्ते; T3.4 नान्योस्ति (for न ह्यस्ति). B1 मत्तुल्यः; B3.4 मे तुल्यः; D5 मे प्रति- (for मे तुल्य-). Ñ2 -पराक्रमः; B1.3.4 पराक्रमे (for -बलो भवेत्). T3 यो मे तुल्यो भवेदिति (for the post. half).]

19 G2 om. 19 (cf. v.l. 18). —^{a}) M1.5 स (for तद्). V1.3 B1 D6.7.10.11 एवं; G1 एतत्; G (ed.) एव (for एष). Ś Ñ1 V1.3 D1-5.8.9.12 T3.4 भूत्वा (for प्रह्वो). —^{b}) D1.4 याचे त्वां वै (for याचते त्वां). —^{c}) Ñ2 B1.3.4 सं- (for first च). Ś D2.8.12 [ए]व भर्ता; Ñ V1 B1.3.4 D3.5 विभक्ता; V3 निहंता; D1.4 T3.4 M3 विभोक्ता; T1.2 विकर्ता; G1.3 M1.4.5.7 वि(G1 [अ]प)हर्ता; M6 विधाता (for [अ]पि भर्ता). D6.7.10.11 Ct भर्तुर्भ(D6 हर्ता भ)र्ता विधाता च; D9 प्रभुश्चैव च भर्ता च. ❀ Ct : त्रैलोक्यस्य भर्तुरपि भर्ता विधाता च। तं मां भजस्वेत्यर्थः. ❀

20 G2 om. 20^{ab} (cf. v.l. 18). —^{a}) Ś Ñ V1.3 B1.3.4 D1-5.8.9.12 तु सा (for [अ]ब्रवीद्). —^{b}) B1.3.4 [अ]ब्रवीद्वचः (for कृताञ्जलिः). Ś Ñ1 V1.3 D1-5.8.9.12 T4 वेपंती प्रांजलिः स्थिता(Ñ1 V1.3 D3 T4 °लिर्भृशं; D1.4 °लिर्भयात्). —D3 om. 20^{c}–21. B1.3.4 om. 20^{c}–21^{b}. D11 reads 20^{cd} in marg. —For 20^{cd}, Ś Ñ V1.3 D1.2.4.5.8.9.12 subst. :

534* अब्रवीन्नार्हसे राजन्याचितुं त्वं गुरुर्हि मे ।

[Ñ याचितं; V1 श्राचितुं (for याचितुं). D1.4 श्वशुरो (hypm.) (for गुरुर्). V3 हि गुरुर्मम (for त्वं गुरुर्हि मे).]

21 D3 om. 21; B1.3.4 om. 21^{ab} (for both, cf. v.l. 20). D9 repeats 21 (both times ^{ab} and ^{cd} transp.) after 24. Ś Ñ V1.3 D1.2.4.5.8.12 transp. ^{ab} and ^{cd}. —^{a}) D12 [ऽ]स्मि; M2.7 हि; Ck.t as in text (for ऽपि). —^{b}) T4 G1.3 M10 धर्षणां; Ct धर्षणं (as in text). T1.2 G3 M2.4.6-10 यतः; G2 प्रति; Ck.t as in text (for यदि). Ś Ñ V1.3 D1.2.4.5.8.9(both times).12 नार्हसे वक्तुमीदृशं. —After 21^{ab} (transp.), V1 ins.; D3 ins. after 23^{ab} :

535* ततोऽब्रवीद्रावणस्तां मत्पुत्रः कः प्रियं तव ।

[D3 प्रियस्.]

—Thereafter, V1 D3 (followed by 539*) cont. 538*.

—^{c}) D6.7.10.11 T3.4 M10 तद्धर्मतः (for धर्मतश्च). M1 देव (for तेऽहं). Ś Ñ V1.3 B1.3.4 D1.2.4.5.8.9(both times).12 G (ed.) स्नुषाहं तव राजेंद्र (Ñ2 रक्षेंद्र; V1 राक्षसेंद्र [hypm.]; B1.3.4 मा मैवं; G [ed.] मा चैवं). —^{d}) Ñ2 D5 M2.8 सत्यम्; D9 (second time) T3 तथ्यम् (for तत्त्वम्). D6.7.10.11 T3 M10 एव (for एतद्). M1 धर्मतश्च (for तत्त्वमेतद्). Ñ2 [अ]हं; G2 च (for ते). B1.3.4 भाषिष्ठास्त्वं हि मे गुरुः.

22 ^{a}) V1.3 D6.7.10.11 S (except M6) अथाब्रवीद् (for अब्रवीत्तां). Ñ1 ततोब्रवीद्रावणस्तां. —After 22^{ab}, D6.7.10.11 S (except M6) ins. :

बाढमित्येव सा रम्भा प्राह रावणमुत्तरम् ।
धर्मतस्ते सुतस्याहं भार्या राक्षसपुंगव ॥ २३
पुत्रः प्रियतरः प्राणैर्भ्रातुर्वैश्रवणस्य ते ।
ख्यातो यस्त्रिषु लोकेषु नलकूबर इत्यसौ ॥ २४
धर्मतो यो भवेद्विप्रः क्षत्रियो वीर्यतो भवेत् ।
क्रोधाद्यश्च भवेदग्निः क्षान्त्या च वसुधासमः ॥ २५
तस्यास्मि कृतसंकेता लोकपालसुतस्य वै ।
तमुद्दिश्य च मे सर्वं विभूषणमिदं कृतम् ॥ २६
यथा तस्य हि नान्यस्य भावो मां प्रति तिष्ठति ।
तेन सत्येन मां राजन्मोक्तुमर्हस्यरिंदम ॥ २७
स हि तिष्ठति धर्मात्मा साम्प्रतं मत्समुत्सुकः ।
तन्न विघ्नं सुतस्येह कर्तुमर्हसि मुञ्च माम् ॥ २८ G. 7. 34. 29 B. 7. 25. 37 L. 7. 32. 32

536* रोमहर्षमनुप्राप्तां दृष्टमात्रेण तां तदा ।

[T1.2 G3 M3 -प्राप्तः (for -प्राप्तां). T1.2 G2.3 M1–3.5.10 स्पृष्ट- (for दृष्ट-). T3 G1 तथा (for तदा).]

—V1 om. 22^{c}–23^{b}. —^{c}) Ś Ñ1 V3 D3.5.8.9.12 कस्य; D1.2.4 M4 किं त्वं (for यदि). Ñ1 D1.3–5 M6 भार्या मे (by transp.). —^{d}) Ś Ñ1 D1–5.8.9.12 येन त्वं; M8 तस्त्वतो (for ततस्त्वं). Ś V3 D2.3.8.9.12 सत्-; D6.7.10.11 हि (for मे). Ś D1–5.8.12 -स्नुषाप्सराः; D9 -स्नुषायसे; T2 M8.9 स्नुषा भवेत् (for स्नुषा भवेः). M6 स्नुषा भवसि मे यतः. —For 22, Ñ2 B1.3.4 subst. :

537* एवमुक्तो राक्षसेन्द्रः प्रत्युवाच शुभाननाम् ।
किं त्वं सुतस्य मे भार्या येन त्वं भवसि स्नुषा ।

[(l. 2) B1 मे (for second त्वं).]

—After 22, Ś Ñ1 D5.8.9.12 ins. ; V1 D3 cont. after 535* :

538* इन्द्रजित्त्वतिकायो वा यो वान्यः स निगद्यताम् ।

[D3.5 वा (for तु). Ś om. (subm.); V1 D3.5 च (for second वा). Ñ1 V1 D3.5 निवेद्यतां.]

—D3 further cont. :

539* अथाब्रवीद्दशग्रीवं रम्भा चाधोमुखी स्थिता ।

23 V1 om. 23^{ab} (cf. v.l. 22). —^{a}) Ś Ñ V3 B1.3.4 D2.3.5.8.9.12 M6 तं (for सा). D1.4 वाचमेवंविधां (for बाढमित्येव सा). Ś1.2 Ñ1 D1.4.5 प्राह; Ś3 V3 D2.3.8.9.12 चाह (for रम्भा). —^{b}) D6 T3.4 उत्तमं (for उत्तरम्). Ś Ñ1 V3 D1–5.8.9.12 रंभा कमललोचना; Ñ2 B1.3.4 प्रत्युवाच शुभानना; M6 वेपंती प्राह रावणं. —After 23^{ab}, D3 ins. 535*, 538* and 539*. —^{c}) V3 तु (for ते). Ñ1 V1 भवेयं वै; D2 सुतः स्वामी (for सुतस्याहं). —^{d}) Ñ1 V1 स्नुषा (for भार्या).

24 ^{a}) Ñ1 D8 प्रियतरैः ; M6 °तमः (for प्रियतरः). —^{b}) V3 B1 च; D5.7 वै (for ते). —^{c}) Ś1.2 D2.8.9.12 T G1 [ऽ]यं; Ś3 [ऽ]हं; Ñ1 [ऽ]पि (for यस्). V1 यः ख्यातस् (by transp.); D6.7.10.11 M10 विख्यातस् (for ख्यातो यस्). —^{d}) Ñ2 B1.3.4 [उ]त; D6.7.10.11 [अ]यं (for [अ]सौ). —After 24, D9 repeats 21 (both times ^{ab} and ^{cd} transp.).

25 ^{a}) Ś2 moth-eaten for यो भवेद्विप्रः. D2 T2 [ऽ]भवद् (for भवेद्). —^{b}) D2.9 [ऽ]भवत् (for भवेत्). —^{c}) G1 क्रोधतश् (for क्रोधाद्यश्). M3 तु (for च). Ś1 Ñ2 B1.3.4 क्रोधेन(Ñ2 °धतो) यो(Ś1 चा)ग्निना तुल्यः ; Ś2.3 Ñ1 V1.3 D1–5.9.12 L (ed.) क्रोधो यस्या(Ś2 °धस्तस्याः; L [ed.] °धेनास्त्य)ग्निना तुल्यः ; D8 क्रोधोस्याग्निवरस्तुल्यः ; M6 क्रोधाद्देशश्च यस्तुल्यः . —^{d}) Ś3 D1–5.8.9.12 क्षांतिश् (for क्षान्त्या). Ñ1 यो (for च). Ś1.2 Ñ2 B1.3.4 D2.5.8.12 -[उ]पमः (for -समः). V3 यस्य क्षांतिश्च नोपमा.

26 ^{a}) V3 यस्य (for तस्य). D6 [अ]भि- ; D8 [अ]स्मिन् (for [अ]स्मि). G1 -संकल्पा; Cg.k.t as in text (for -संकेता). —^{b}) B3 M6 ह; B4 हि (for वै). D9 लोकपालेषु तस्य वै. —^{c}) Ś1.3 D2.8.9.12 हि; D5–7.10.11 T3.4 M10 तु; M5 om. (subm.) (for च). Ś2 moth-eaten ; V1 च सर्वं हि; V3 महात्मानं (for च मे सर्वं). B1.3.4 तमेव च समुद्दिश्य.

27 D1.4 om. 27^{ab}. —^{a}) Ś D2.8.12 M1 तथा; T3 तदा; M7 तस्य; Cg.k.t as in text (for यथा). Ś Ñ1 V1.3 D2.3.5.8.9.12 T4 तत्र; Ñ2 B1.3.4 तस्माद् (for तस्य). Ś Ñ V1.3 B1.3.4 D2.3.8.9.12 M6.10 हि नान्यत्र; D5 हि भावोत्र; T3.4 विनान्यस्य(T4 °त्र) ; Cg.k.t as in text (for हि नान्यस्य). —^{b}) Ś D8.12 सर्वं मे; Ñ1 V3 D2.3.7.9 T3.4 M9.10 भावो मे; D5 नान्यत्र; Cg.k.t as in text (for भावो मां). M3 (after corr. as in text) पथि (for प्रति). Ñ2 तिष्ठते (for तिष्ठति). B1.3.4 भावो मे न प्रतिष्ठति (B4 °ते) ; G3 भावो मामप्रतिष्ठति; M6 भावः संप्रति वर्तते. —V3 lacuna for ^{c}. —^{c}) Ś D8 L (ed.) हेतुना ते (L [ed.] °ने)न; D12 धर्मेण तेन (for तेन सत्येन). Ś B1.4 D3.8 T3 M7 मे (for मां). —^{d}) V3 M8 वक्तुम् ; D9 त्यक्तुम् (for मोक्तुम्). B1 रावण (for [अ]रिंदम).

28 Ś2 moth-eaten from ^{a} up to मत्प्रतीक्षो (see var.) in ^{b}. —^{a}) Ś1.3 Ñ1 V1.3 D1.2.4.5.8.9.12 संप्रति; D3 मां प्रति (for तिष्ठति). Ñ2 B1.3.4 संप्रति हि (for हि तिष्ठति). —^{b}) D6.7.10.11 K (ed.) मां प्रतीक्ष्य (K [ed.] °क्षन्) (for साम्प्रतं मत्-). Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 मत्प्रतीक्षो(Ś2 moth-eaten up to °क्षो)वतिष्ठते (Ñ1 V3 D5 °ति). —^{c}) V3 D5 T3 G3 M2 तन्निर्विघ्नं; B3 D7.9–12 M10 तत्र(M10 न त्वं) विघ्नं; D8 तत्तु** (for तन्न विघ्नं).

G. 7. 34. 29
B. 7. 26. 37
L. 7. 32. 33

सद्भिराचरितं मार्गं गच्छ राक्षसपुंगव ।
माननीयो मया हि त्वं लालनीया तथास्मि ते ॥ २९
एवं ब्रुवाणां रम्भां तां धर्मार्थसहितं वचः ।
निर्भर्त्स्य राक्षसो मोहात्प्रतिगृह्य बलाद्बली ।
काममोहाभिसंरब्धो मैथुनायोपचक्रमे ॥ ३०
सा विमुक्ता ततो रम्भा भ्रष्टमाल्यविभूषणा ।
गजेन्द्राक्रीडमथिता नदीवाकुलतां गता ॥ ३१
सा वेपमाना लज्जन्ती भीता करकृताञ्जलिः ।
नलकूबरमासाद्य पादयोर्निपपात ह ॥ ३२
तदवस्थां च तां दृष्ट्वा महात्मा नलकूबरः ।
अब्रवीत्किमिदं भद्रे पादयोः पतितासि मे ॥ ३३
सा तु निश्वसमाना च वेपमानाथ साञ्जलिः ।
तस्मै सर्वं यथातथ्यमाख्यातुमुपचक्रमे ॥ ३४

V_3 $D_{5.6.10}$ T_3 तु(T_3 न) तस्येह. —^{d}) $\tilde{N}_2$ V_1 $B_{1.3}$ $D_{7.9–12}$ नार्हसि (for अर्हसि). D_5 सस्वरं (for मुञ्च माम्).

29 ^{a}) V_3 आचरिते. Ś $D_{8.12}$ पूर्वं; V_3 मार्गे (for मार्गं). —G_2 om. from व in 29^{b} up to विनीत in l. 1 of 541*. —^{c}) $Ś_2$ मा * * यो(moth-eaten) (for माननीयो). $D_{6.7.10.11}$ मम (for मया). $D_{6.7.10.11}$ $M_{5.6}$ त्वं हि (by transp.). $B_{1.3.4}$ त्वं मया माननीयो हि. —^{d}) V_1 $B_{1.3}$ $D_{6.7.10.11}$ $T_{3.4}$ $M_{5.10}$ पालनीया. $\tilde{N}_1$ $B_{1.3.4}$ त्वयाप्यहं; V_1 भवाम्यहं; V_3 मे नषु ते (corrupt); T_3 तवास्मि ते (for तथास्मि ते).

30 ^{a}) $\tilde{N}_1$ V_1 $D_{1–4.9.12}$ तु (for तां). V_3 एवं ब्रुवाणं तं सा च. —^{b}) V_3 रंभा तु (for धर्मार्थ-). —For 30^{ab}, $\tilde{N}_2$ $B_{1.3.4}$ subst. :

540* एवंप्रकारान्सुबहून्याचमानां तपस्विनीम् ।

—^{c}) $\tilde{N}_2$ $B_{1.3.4}$ वेपमानां तां (for राक्षसो मोहात्). —^{d}) $\tilde{N}_2$ V_3 $B_{1.2.4}$ प्रगृह्य च (for प्रतिगृह्य). —For 30^{abcd}, $D_{5–7.10.11}$ S subst. :

541* एवमुक्तो दशग्रीवः प्रत्युवाच विनीतवत् ।
स्नुषास्मि यदवोचस्त्वमेकपत्नीष्वयं क्रमः ।
देवलोकस्थितिरियं सुराणां शाश्वती स्थिता ।
पतिरप्सरसां नास्ति न चैकस्त्रीपरिग्रहः ।
एवमुक्त्वा स तां रक्षो निवेश्य च शिलातले । [5]

[(l. 1) G_2 om. up to विनीत (cf. v.l. 29). —(l. 2) M_{10} स्नुषेति. —(l. 3) $M_{1.6}$ -लोके (for -लोक-). M_8 रावणं (sic) (for सुराणां). $D_{5–7.10.11}$ मता; M_{10} स्मृता (for स्थिता). —(l. 4) $D_{5–7}$ T_3 M_6 [ए]कोस्ति; $T_{1.2}$ G_3 $M_{1.3.10}$ [ए]कस्य; $G_{1.2}$ $M_{2.4.5.7–9}$ [ए]कोत्र (for [ए]कस्त्री-). —(l. 5) $M_{4.7}$ तु(for स). D_5 दशग्रीवो (for स तां रक्षो). M_6 संनिवेश्य. D_5 तामाश्लिष्य बलाद्बली (for the post. half).]

—^{e}) $D_{6.7.10.11}$ $T_{3.4}$ -भोग- (for -मोह-). G_2 M_5 [अ]ति- (for [अ]भि-). Ś $D_{2.8.9.12}$ M_7 -[अ]भिसंतप्तो; Ñ $B_{1.3.4}$ -परीतात्मा; V_3 M_4 -[आ]दिसंतप्तो; D_5 -[अ]तिसंलुब्धो; $D_{6.7.10.11}$ $T_{1.3.4}$ K(ed.) -[अ]सिसंर(K[ed.] °स)क्तो (for -[अ]भिसंरब्धो). —After 30, D_3 ins. :

542* अकार्यं तु ततो रक्षः कृतवान्दुष्टचेतनः ।

31 ^{a}) $\tilde{N}_1$ विलज्जा; B_3 विरक्ता; $D_{6.7}$ [अ]पि मुक्ता; M_{10} तु भुक्ता (for विमुक्ता). Ś $D_{2.8.9.12}$ भयाद् (for ततो). $D_{6.7}$ रक्षो- (for रम्भा). —^{b}) M_2 -विभीषणा. Ś $\tilde{N}_1$ $D_{2.8.9.12}$ भ्रष्टमाल्यांतरांबरा; $V_{1.3}$ $D_{1.3–5}$ M_6 भ्रष्टमाल्योत्तरांबरा(V_3 °शुका). —^{c}) D_7 -क्रीडा-; $G_{1.2}$ $M_{1.2.8–10}$ -क्रीड-; M_3 -लीला- (for -[आ]क्रीड-). —^{d}) Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1.2.4.5.12}$ वापी (for नदी). $\tilde{N}_1$ G_2 [आ]कुलितां. Ś $D_{3.8.9}$ बाष्प($D_{3.9}$ वापी)व्याकुलतां गता; M_7 नलिनीवाकुलीकृता. —After 31, Ñ V_3 $B_{1.3.4}$ $D_{6.7.10.11}$ S ins. :

543* लुलितालककेशान्ता करवेपितपल्लवा ।
पवनेनावधूतेव लता कुसुमशालिनी ।

[(l. 1) V_3 lacuna for ककेशान्ता कर. B_1 G_2 M_5 ल(B_1 लो)लितालक-; B_3 $D_{6.7.10.11}$ T_3 M_6 लुलिताकुल- (B_3 °नेक-). ❀ Cv : करवेपितपल्लवा वेपितकरपल्लवा ।; so also Cg.k.t. ❀ —(l. 2) Ñ $B_{1.3.4}$ विधूतेव(B_3 °न); V_3 विनिर्भूता (for [अ]वधूतेव). Ñ V_3 $B_{1.3.4}$ -शोभिता; T_3 -मालिनी (for -शालिनी).]

32 ^{a}) M_6 प्र- (for सा). $\tilde{N}_2$ $B_{1.3.4}$ लज्जया वेपमानाथ. —^{b}) Ś Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1–6.8.9.12}$ रंभा(D_6 भीता) कृत- ; T_4 रंभा कर- (for भीता कर-). $\tilde{N}_1$ V_1 B_4 $D_{1–6.9.12}$ -कर- (for -कृत-). —G_3 om. (hapl.) 32^{c} – 34^{b}. —^{d}) D_6 पदयोर्. M_{10} पादोपरि पपात ह. —For 32^{cd}, Ś Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1–5.8.9.12}$ subst. :

544* पादयोः पतिता गत्वा ततो वैश्रवणात्मजम् ।

[$B_{1.3.4}$ पतिता शिरसा (for पादयोः पतिता). B_4 नत्वा. $B_{1.3}$ तत्र; B_4 यत्र; D_3 तदा (for ततो).]

33 G_3 om. 33 (cf. v.l. 32). —^{a}) Ś B_4 $D_{8.9.12}$ तदा ध्वस्तां(B_4 रंभां) (for तदवस्थां). $Ś_{2.3}$ $\tilde{N}_1$ $D_{1–5.8.9.12}$ T_3 $M_{3.5.6}$ तु (for च). —V_3 lacuna for ^{cd} except पतितासि मे. —^{d}) $Ś_{2.3}$ किं (for मे).

34 G_3 om. 34^{ab} (cf. v.l. 32). —^{a}) V_1 वि- ; $D_{6.7.10.11}$ वै (for तु). Ś $\tilde{N}_1$ $V_{1.3}$ $D_{1.4.6–9.12}$ $T_{3.4}$ M_9 निःश्व(D_6 T_4 M_9 निश्वा)समाना. $D_{6.7.10.11}$ T_6 तु; $T_{1.2}$ $M_{1–3.6.8.9}$ [अ]थ; G_2 M_{10} वै; M_7 हि (for च). $\tilde{N}_2$ $B_{1.3.4}$ सा तु (B_3 वि)निःश्वसती तत्र. —^{b}) Ś $D_{2.8.9.12}$ च प्रांजलिः ; Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{1.3.4.6.7.10.11}$ $T_{2–4}$ $G_{1.2}$ $M_{3.4.6.10}$ कृतां°;

एष देव दशग्रीवः प्राप्तो गन्तुं त्रिविष्टपम् ।
तेन सैन्यसहायेन निशेह परिणाम्यते ॥ ३५
आयान्ती तेन दृष्टास्मि त्वत्सकाशमरिंदम ।
गृहीत्वा तेन पृष्टास्मि कस्य त्वमिति रक्षसा ॥ ३६
मया तु सर्वं यत्सत्यं तद्धि तस्मै निवेदितम् ।
काममोहाभिभूतात्मा नाश्रौषीत्तद्वचो मम ॥ ३७
याच्यमानो मया देव स्नुषा तेऽहमिति प्रभो ।
तत्सर्वं पृष्ठतः कृत्वा बलात्तेनास्मि धर्षिता ॥ ३८
एवं त्वमपराधं मे क्षन्तुमर्हसि मानद ।
न हि तुल्यं बलं सौम्य स्त्रियाश्च पुरुषस्य च ॥ ३९
35 G_{2} om. 35; D_{9} om. 35^{ab} (for both, cf. v.l. 34). —^{a}) T_{4} ततो; M_{2} कृते (for तु ते). Ś $D_{2.8.12}$ भृत्याः (for ऽमात्याः). Ñ B अथ ते रावणामात्याः. —^{c}) Ś V_{1} $D_{2.8.9.12}$ -बले क्रुद्धा; $Ñ_{1}$ -[अ]र्जुनबलम्; $Ñ_{2}$ V_{3} B -बलं सर्वम्; D_{5} -बलं युद्धा (for -बलं क्रुद्धा). —^{d}) M_{3} न्यदहन्; M_{8} निर्मथंति. —G_{3} damaged from ग्नि up to सम in 36^{b}. M_{10} [अ]ति- (for [अ]ग्नि-). Ś $D_{2.8.9.12}$ ज्वलंत इव तेजसा; Ñ V_{3} $B_{1.2.4}$ अदहन्न(B_{2} °न्श)स्वतेजसा; V_{1} प्रज्वलंत इवौजसा; B_{3} अदहंस्तत्र तेजसा; D_{5} दहंत इव तेजसा; $D_{6.7.10.11}$ निहंति स्म स्वतेजसा; M_{6} K (ed.) निर्दहंति च(K [ed.] स्म) तेजसा; G (ed.) निजघ्नुस्ते महौजसः.

36 G_{2} om. 36^{ab} (cf. v.l. 34). G_{3} damaged up to सम in ^{b} (cf. v.l. 35). —^{a}) D_{5} अर्जुनस्य. Ś $D_{1-4.8.9.12}$ [अ]थ; B_{4} च (for तु). V_{1} अर्जुनस्य रणे कर्म. —^{b}) Ś $Ñ_{1}$ $D_{2.5.8.12}$ M_{3} तु; V_{1} B_{2} $D_{1.3.4}$ T_{3} च; D_{9} [अ]नु- (for स-). Ś $Ñ_{1}$ V_{1} $D_{2.3.5.8.9.12}$ T_{3} मंत्रिणां. —B_{3} om. 36^{cd}. —^{c}) V_{1} D_{5} क्रीडमानस्य. Ñ $B_{1.2.4}$ क्रीडते कथितं तस्मै. —^{d}) Ś $V_{1.3}$ $D_{1-5.8.9.12}$ $G_{2.3}$ $M_{5-7.10}$ दा(Ś$_{1.2}$ $V_{1.3}$ $M_{5-7.10}$ द्वा)रदर्शि($G_{2.3}$ °रक्षि)भिः; $D_{6.7.10.11}$ भयविह्वलैः; $M_{2.4.8.9}$ जितकाशिभिः; G (ed.) नाररक्षिभिः (for द्वाररक्षिभिः). —After 36, T_{3} $M_{1.3}$ ins.:

670* तेषां तद्वचनं श्रुत्वा जलक्रीडावसक्तधीः ।

[M_{3} तु (for तद्).]

37 ^{a}) $D_{6.7.10.11}$ श्रुत्वा (for उक्त्वा). Ś $Ñ_{1}$ V_{1} $D_{2.5.8.9.12}$ न भेतव्यमिति ह्युक्त्वा; V_{3} नैव भेतव्यमित्युक्त्वा. —^{b}) $Ñ_{1}$ V_{1} स तम्; B_{2} सर्वतो; B_{3} शतशो; $D_{1.3.4.6.7.10.11}$ T_{3} M_{5} स तदा; T_{4} तं ततो (for स ततो). —^{d}) V_{1} -तोयम् (for -तोयाद्). Ś $V_{1.3}$ $D_{1-5.8.9.12}$ T_{4} द्विपः; M_{6} [अं]बुदः; Ck.t as in text (for [अ]ञ्जनः).

38 ^{a}) Ś$_{1}$ $D_{2.8}$ -[आ]विष्टित-; Ś$_{2.3}$ $D_{9.12}$ -[अ]धिष्ठित-; $Ñ_{1}$ -मूर्छित-; T_{1-3} M_{3} -रू(T_{1} -*)षित- (for -दूषित-). V_{3} -देहस् (for -नेत्रस्). —^{b}) V_{1} B_{3} $D_{1.5.7.9-11}$ $T_{3.4}$ $M_{8.10}$ स तदा; M_{1} ततो हि (for स ततो). ❀ Ck: अर्जुनरूपपावकस्तथा। ; Ct: अर्जुनरूपः पावक इति रूपकम्. ❀ —Ś$_{1}$ D_{8} M_{6} om. (hapl.); G_{3} damaged for 38^{cd}. —^{c}) $T_{1.2}$ जज्वाल सु- (for प्रजज्वाल). Ś$_{2.3}$ Ñ $V_{1.3}$ $B_{1.2.4}$ $D_{1-5.9.12}$ T_{4} यथा घोरो(Ś$_{3}$ °रे); B_{3} तथा घोरो; G_{1} महावेगो; L (ed.) यथा धीरो. —^{d}) Ś$_{3}$ $Ñ_{2}$ V_{1} $D_{1.2.4.5.9.12}$ युगांतार्णव-; $Ñ_{1}$ युगांतादिव; $B_{1.2}$ D_{3} युगांतेर्णव-; B_{3} वो भ्रांतार्णव (sic) (for युगान्त इव). M_{5} युगांताग्निरिवार्णवे. ❀ Cv: 'महाघोरो युगान्त इव पावक' इति पाठः। ; Cg.k: युगान्ते युगान्तकाले उत्थितो घोरः पावक इव. ❀

39 ^{b}) Ś $D_{1-3.5.8.9.12}$ T_{3} वरां; D_{4} वरा (for वर-). Ś $Ñ_{1}$ V_{3} B $D_{1-3.5.8.9.12}$ -हेमांगदां. D_{4} गदाः (for गदाम्). —^{c}) Ś V_{1} D_{12} अभ्यद्रवच्च; Ñ V_{3} B $D_{10.11}$ अभिदुद्राव; D_{1-5} अभ्यद्रवत; $D_{6.9}$ अभिद्रवत; D_{8} अन्यत्र वर-; T_{4} अभ्यद्रावत; L (ed.) अभ्याद्रवद् (subm.) (for अभिद्रवति).

G. 7. 21. 41
B. 7. 32. 41
L. 7. 20. 40

बाहुविक्षेपकरणां समुद्यम्य महागदाम् ।
गारुडं वेगमास्थाय आपपातैव सोऽर्जुनः ॥ ४०
तस्य मार्गं समावृत्य विन्ध्योऽर्कस्येव पर्वतः ।
स्थितो विन्ध्य इवाकम्प्यः प्रहस्तो मुसलायुधः ॥ ४१
ततोऽस्य मुसलं घोरं लोहबद्धं मदोद्धतः ।
प्रहस्तः प्रेषयन्क्रुद्धो ररास च यथाम्बुदः ॥ ४२
तस्याग्रे मुसलस्याग्निरशोकापीडसंनिभः ।
प्रहस्तकरमुक्तस्य बभूव प्रदहन्निव ॥ ४३
आधावमानं मुसलं कार्तवीर्यस्तदार्जुनः ।
निपुणं वञ्चयामास सगदो गजविक्रमः ॥ ४४
ततस्तमभिदुद्राव प्रहस्तं हैहयाधिपः ।
भ्रामयाणो गदां गुर्वीं पञ्चबाहुशतोच्छ्रयाम् ॥ ४५
तेनाहतोऽतिवेगेन प्रहस्तो गदया तदा ।
निपपात स्थितः शैलो वज्रिवज्रहतो यथा ॥ ४६

40 ^{a}) Ś $D_{2.5.8.9.12}$ -करणैः; Ñ $V_{1.3}$ B M_6 -करणः; $D_{6.7}$ T_3 -करणीं; T_4 -करणं; G_3 -करुणं (for -करणां). $D_{1.3.4}$ बाहुविक्षिप्तकिरणः. ❀ Cv : बाहुविक्षेपकरणं(णां ?) बाहुविक्षेपैर्बाहुव्यायामैः करणं निर्माणं यस्याः ।; Cg.k.t : बाहुभिर्विक्षेपकरणं भ्रमणं(Ck भ्रमणसंपादनं; Ct भ्रमसंपादनं) यस्यास्ताम् (Ck °स्याः सा तथा). ❀ —^{b}) Ś Ñ $V_{1.3}$ B $D_{1-5.8.9.12}$ समुद्यतमहागदः (Ś$_{2.3}$ D_{12} °दैः) (for °गदाम्). —V_3 lacuna for ^{cd}. Note hiatus between ^{c} and ^{d}. —^{c}) M_8 स्वारुत्सं (sic) (for गारुडं). Ś Ñ V_1 $B_{1.3.4}$ $D_{1-6.7}$(marg. also as in text)$_{.8.9.12}$ T_{1-3} G $M_{2-8.10}$ रूपम्; M_9 om.; Cg.k.t as in text (for वेगम्). —G_3 damaged from मास्थाय up to 41^{a}. —^{d}) Ś$_{1.3}$ V_1 $D_{1-4.8.9.12}$ T_4 K (ed.) नि(K [ed.] चा)पपातै(D_2 °ते)व; Ñ B उत्पपाताथ; D_6 T_1 $G_{1.2}$ M_{2-10} आपपातेव(M_1 °तेथ; M_6 °ते च); $T_{2.3}$ आ(T_3 त्वा)पपात च; Cg.k.t as in text (for आपपातैव). D_5 निपपात स चार्जुनः.

41 G_3 damaged for ^{a} (cf. v.l. 40). —^{a}) B_2 अपावृत्य; B_3 समाश्रित्य; D_6 °रुंध्यन्; $D_{7.10.11}$ °रुध्य (for समावृत्य). —^{c}) Ś V_1 $D_{1-5.8.9.12}$ M_3 मेरुर् (for विन्ध्य). B_2 [अ]कल्पः; $D_{1.4}$ [अ]कंपः. ❀ Ck : विन्ध्यः पर्वतोऽर्कस्य मार्गमावृत्येति । तथास्ति पौराणिकी कथा ।; Ct : विन्ध्यपर्वतोऽर्कमार्गं रुद्ध्वा स्थित इति पौराणिकी कथा. ❀ —^{d}) D_8 प्रहस्य.

42 V_3 om. 42^{ab}. —^{a}) Ñ$_1$ तं तस्य; Ñ$_2$ B तत्तस्य; V_1 स ततो; M_{10} ततः स (for ततोऽस्य). —^{b}) $D_{1.3.4}$ -नद्धं; $T_{1.2}$ M_6 -बंधं (for -बद्धं). Ñ V_1 B D_3 महोत्कटं(Ñ$_1$ V_1 B °टः); $D_{1.3-5}$ बलोत्कटः (D_3 °टं); G_1 मदोत्कटं; M_4 °द्धतं; M_5 महोद्धतः; M_6 महोद्युतं (for मदोद्धतः). —For 42^{ab}, Ś $D_{2.8.9.12}$ subst.:

671* ततोऽस्य लोहमुसलं नर्दयित्वा बलोत्कटः ।

[D_9 -मुसलैर्. Ś$_3$ D_8 नंदयित्वा; D_{12} भ्रामयित्वा (for नर्दयित्वा). Ś$_1$ मदोत्कटः; D_8 महोत्कटः.]

—^{c}) Ś$_3$ D_{12} प्रैषयत्; B_4 T_4 प्रेरयन् (for प्रेषयन्). Ñ$_2$ B क्रोधान्. —^{d}) Ś Ñ $V_{1.3}$ $B_{1.3.4}$ $D_{2.8.9.12}$ T_4 ननाद च; B_2 वज्रमेव; $D_{1.3-5}$ विननाद (for ररास च). $D_{6.7.10.11}$ यथांतकः.

43 G_3 damaged for 43^{abc}. —^{a}) Ś$_1$ V_1 D_5 T_4 [अ]ग्निम्. —^{b}) Ñ$_1$ आकाश-; D_8 सशोक- (for अशोक-). Ś$_1$ V_1 D_5 T_4 -संनिभं. B_3 शोकापीडसमन्वितः. —^{c}) Ñ$_2$ V_3 B बभूव (for प्रहस्त-). D_2 T_1 -मुक्तश्च (for -मुक्तस्य). —Ś$_1$ D_8 om. 43^{d}–44^{c}. —^{d}) D_3 वह्निश्च (for बभूव). M_8 प्रहसन् (for प्रदहन्). Ś$_{2.3}$ निरीक्ष्यत हसन्निव; Ñ V_3 B कुर्वाणो विमला दिशः; V_1 $D_{2.5.9.12}$ T_4 निरीक्ष्य प्रहसन्निव.

44 Ś$_1$ D_8 om. 44^{abc} (cf. v.l. 43). —^{a}) Ś$_{2.3}$ $D_{2.9.12}$ अथापतंतं; Ñ V_3 $B_{1.2.4}$ आपतंतं च; D_3 आत्मावमानं; K (ed.) अथायांतं तु (for आधावमानं). B_3 बलवान्दर्शयामास. —^{b}) Ñ$_1$ कार्तिवीर्यस्; B_3 बाहुवीर्यं (for कार्तवीर्यस्). Ñ$_1$ $M_{2.4.7-9}$ ततोर्जुनः; $T_{1.2}$ तथार्जुनः (for तदा°). Ñ$_2$ V_3 कार्तवीर्यंजनस्तदा; T_4 G_1 कार्तवीर्यार्जुनस्तदा. —^{c}) Ñ B लाघवाद्; T_3 निपुणो (for निपुणं). Ś$_2$ मुंचयामास; Ś$_3$ D_{12} चूर्णयामास. —^{d}) Ś Ñ $V_{1.3}$ B D $T_{1.2.4}$ G_3 M_3 गदया; Cg as in text (for सगदो). Ś$_2$ Ñ$_2$ चातिविक्रमः; V_1 T_4 [अ]मितविक्रमः; $D_{6.7.10.11}$ गतविक्लवः; M_8 [ऽ]गदविक्रमः. ❀ Cg : वञ्चयामास प्रतिहतवानित्यर्थः । सगदः गदासहितः । अगदः अरोगः अप्रतिबन्ध इति यावत्, विक्रमो यस्येति विग्रहः ।; Ck : सगदः गदासहितः. ❀

45 ^{a}) B_2 सम्- (for तम्). —^{b}) $D_{10.11}$ सगदो; M_3 प्रहसन् (for प्रहस्तं). —^{c}) Ś$_{1.2}$ $V_{1.3}$ D_8 भ्रामयंतं; Ś$_3$ $D_{1-5.12}$ भ्रामयंस्तां; Ñ$_1$ भ्रामयित्वा; Ñ$_2$ B D_9 भ्रामयन्वै (B_2 °न्स); $D_{6.7}$ S भ्रामयानो (for भ्रामयाणो). —G_3 damaged from वीं up to गद् in 46^{b}. —^{d}) Ś$_{1.2}$ $D_{8.12}$ तस्य (for पञ्च-). Ś$_{1.2}$ $V_{1.3}$ D_8 -समुच्छ्रितां; Ś$_3$ $D_{2.12}$ -समुत्थितां; Ñ B $D_{1.3.4.9}$ M_6 -शतोच्छ्रितां; D_5 -समुच्छ्रयां; T_2 -शतायुतां; G_3 -शताश्रितां; M_3 -शतोद्यतां; Cg.k.t as in text (for -शतोच्छ्रयाम्).

46 G_3 damaged up to गद् in ^{b} (cf. v.l. 45). —^{a}) Ś$_3$ $D_{6.7.10.11}$ ततो हतो; K (ed.) तथा हतो (for तेनाहतो). B_3 [अ]भिहतो (for [आ]हतोऽति-). —^{b}) Ñ$_2$ $D_{1.3-5}$ तया; M_9 सदा (for तदा). —^{c}) Ś B_2 $D_{1.3-5.8.9.12}$ M_2 ततः; V_1 T_4 M_3 महा-; B_1 [अ]र्दितः; B_4 [अ]मितः; M_6 [अ]सितः; K (ed.) हतः (for स्थितः). —D_{11} reads from लो up to ^{d} in marg. $D_{4.9}$ शैले (for शैलो). —^{d}) $B_{1.3.4}$ $D_{3.5.8.9.12}$ -[आ]हतो (for -हतो.).

प्रहस्तं पतितं दृष्ट्वा मारीचशुकसारणाः ।
समहोदरधूम्राक्षा अपसृप्ता रणाजिरात् ॥ ४७
अपक्रान्तेष्वमात्येषु प्रहस्ते च निपातिते ।
रावणोऽभ्यद्रवत्तूर्णमर्जुनं नृपसत्तमम् ॥ ४८
सहस्रबाहोस्तद्युद्धं विंशद्बाहोश्च दारुणम् ।
नृपराक्षसयोस्तत्र आरब्धं लोमहर्षणम् ॥ ४९
सागराविव संक्षुब्धौ चलमूलाविवाचलौ ।
तेजोयुक्ताविवादित्यौ प्रदहन्ताविवानलौ ॥ ५०
बलोद्धतौ यथा नागौ वाशितार्थे यथा वृषौ ।
मेघाविव विनर्दन्तौ सिंहाविव बलोत्कटौ ॥ ५१
रुद्रकालाविव क्रुद्धौ तौ तथा राक्षसार्जुनौ ।
परस्परं गदाभ्यां तौ ताडयामासतुर्भृशम् ॥ ५२
वज्रप्रहारानचला यथा घोरान्विषेहिरे ।
गदाप्रहारांस्तद्वत्तौ सहेते नरराक्षसौ ॥ ५३
यथाशनिरवेभ्यस्तु जायते वै प्रतिश्रुतिः ।
तथा ताभ्यां गदापातैर्दिशः सर्वाः प्रतिश्रुताः ॥ ५४

G. 7. 21. 36
B. 7. 32. 55
L. 7. 20. 54

47 ^{a}) V_3 निहतं (for पतितं).—^{d}) Ś $D_{2.8.9.12}$ M_6 अप($Ś_1$ $D_{8.12}$ °पा)क्रांता; Ñ B °याता; V_1 °सृत्य; V_3 $D_{6.7.10.11}$ T_4 °सृष्टा; $D_{1.3.4}$ नेशुस्तूर्णं; T_3 अपवृत्ता; G_1 अपावृत्ता; M_1 अपपाता; M_{10} °स्रस्ता; K (ed.) ह्यपसृष्टा (for अपसृप्ता). $Ñ_1$ रणाजिरे.

48 G_3 damaged for 48^{ab}.—^{a}) Ś $D_{8.12}$ अपयातेषु; D_2 अपाक्रांतेषु.—^{b}) K (ed.) वि- (for च). B_2 निशाचरे (for निपातिते).—^{c}) G_2 $M_{1.2.4.6.7-9}$ [ऽ]भिद्रवत्; B_2 [ऽ]भ्यपतत् (for ऽभ्यद्रवत्).—^{d}) B_3 नृपनंदनं.

49 ^{a}) G_3 damaged from स्तद् up to बाहो in ^{b}.—^{b}) Ś $V_{1.3}$ $D_{1-5.8.9.12}$ रावणस्य (for विंशद्बाहोश्च). V_3 सुदारुणं; T_4 तथैव च (for च दारुणम्).—Note hiatus between ^{c} and ^{d}.—^{d}) Ś $V_{1.3}$ $D_{1-5.8.9.12}$ T_4 विषमं; Ñ $B_{1.3.4}$ G_1 संरब्धं; B_2 सशब्दं; D_6 प्रारब्धं; T_3 स्वारब्धं; G_2 चारब्धं (for आरब्धं). Ś $Ñ_2$ $V_{1.3}$ B_3 $D_{2.6-12}$ S रोमहर्षणं.

50 G_3 damaged from ^{a} up to प्रदहन्ता in 50^{d}.—^{a}) Ñ V_3 B_{2-4} $D_{6.9}$ T_4 G_1 $M_{5.9}$ संक्रुद्धौ; M_6 संरब्धौ (for संक्षुब्धौ).—^{b}) $D_{3.6}$ $T_{1.2.4}$ M_3 चलनू- (for चल-). $Ñ_1$ सपक्षाविव चाचलौ.—D_5 om. (hapl.?) 50^{c}–51^{b}. M_5 om. (hapl.?) 50^{cd}. Ś $Ñ_1$ $V_{1.3}$ $D_{2.8.9.12}$ transp. 50^{cd} and 51^{ab}. T_4 partly damaged for ^{c}.—^{c}) $Ś_{1.2}$ D_9 तेजोदृप्ताव्; $Ś_3$ $D_{2.8.12}$ ओजोदृप्ताव्; $Ñ_1$ V_1 तेजोवृद्धाव्; $D_{1.3.4}$ °न्वित्ताव्; M_3 °वंताव् (for तेजोयुक्ताव्).

51 D_5 om. 51^{ab} (cf. v.l. 50). Ś $Ñ_1$ $V_{1.3}$ $D_{2.8.9.12}$ transp. 50^{cd} and 51^{ab}.—^{a}) $Ś_{2.3}$ D_{12} बद्धयुद्धौ; $D_{1.4}$ बलोद्धतौ; D_9 बलोद्गणौ; G_2 बलवंतौ (for बलोद्धतौ). T_3 यदा (for यथा). M_{10} गावौ (for नागौ).—^{b}) G_3 damaged from ता up to ^{c}. Ś $Ñ_2$ $V_{1.3}$ B $D_{1.2.4.6.7.9-11}$ Ct वासितार्थे; $Ñ_1$ D_3 वासितार्थौ; Cg.k as in text (for वाशितार्थे). Ś $Ñ_1$ $V_{1.3}$ $D_{1-4.8.9.12}$ महाबलौ; $B_{2.3}$ यथा द्विपौ; B_4 $M_{9.10}$ यथा गजौ (for यथा वृषौ). M_5 (with hiatus) बाह्लिकार्थी इवर्षभौ. ❀ Cg : वाशितार्थे करेण्वर्थे, युध्यन्ताविति शेषः ।; Ck : वाशितार्थे करिणीप्रयोजनाय युध्यन्ताविति शेषः ।; Ct : वासितार्थे करिणीरूपप्रयोजनाय । युयुधाते इति शेषः. ❀ —^{c}) D_6 घनाविव. $Ś_{1.2}$ D_2 प्रनदंतौ; $Ś_3$ प्रणादंतौ; $Ñ_1$ T_4 च गर्जंतौ; $B_{1.3}$ D_3 च नदंतौ; D_8 प्रनंदंतौ; D_{12} प्रनादंतौ; T_3 विवर्षंतौ (for विनर्दन्तौ).—^{d}) $D_{1.3.4}$ महोत्कटौ; T_4 मदोद्धतौ; $M_{4.8}$ मदोत्कटौ (for बलोत्कटौ).

52 ^{a}) D_2 भद्रकालाव्. $Ś_1$ $D_{2.8.9.12}$ [अ]त्युग्रौ; $Ś_{2.3}$ [आ]दित्यौ; $Ñ_1$ $B_{1.4}$ $D_{1.4.5}$ [अ]श्रांतौ; $Ñ_2$ V_1 $B_{2.3}$ M_6 श्रांतौ; V_3 भ्रांतौ; D_3 क्रांतौ (for क्रुद्धौ).—G_3 damaged for 52^{bcd}.—^{b}) B_2 यथा; B_3 अथ; $D_{6.7.10.11}$ $T_{1.4}$ G_2 $M_{1.3.5}$ तदा (for तथा). $D_{1.3-5}$ तथा तौ (by transp.). $Ś_1$ D_8 नृपराक्षसौ; $Ñ_1$ B [अ]र्जुनरावणौ; $Ñ_2$ G_1 M_6 रावणार्जुनौ; M_3 [अ]र्जुनराक्षसौ (by transp.) (for राक्षसार्जुनौ). ❀ Cv : तौ तथेत्यत्र तौशब्दो रुद्रकालयोर्विशेषणम् । इतरथा अतिरिच्येत. ❀ —^{c}) $Ñ_1$ D_5 T_3 परस्पर-. $Ś_1$ गदामिश्र; $Ś_{2.3}$ $D_{2.8.9.12}$ गदाभ्यां च; Ñ V_1 B_{2-4} $D_{1.3.4}$ M_6 °ग्राभ्यां; V_3 $D_{6.7.10.11}$ T_4 गदां गृह्य; B_1 गदापातैर्; G_1 M_1 गदाभ्यां तु; G_2 गदावंतौ (for गदाभ्यां तौ).—^{d}) $Ñ_1$ B_1 दारयामासतुर्; B_2 द्राव°; T_4 ताड * * * तुर् (for ताडयामासतुर्).

53 $Ñ_2$ $B_{1.3.4}$ transp. ^{ab} and ^{cd}.—^{a}) Ś $D_{8.9.12}$ अतुलान्; Ñ $V_{1.3}$ B D_{1-5} M_6 अचलौ($B_{2.4}$ °लो); D_7 T_2 G_3 अचलान् (for अचला).—^{b}) T_1 विद्धा (for यथा). M_6 घोषान् (for घोरान्). $Ñ_1$ $V_{1.3}$ $D_{1.3-5}$ विषेहतुः; D_7 निषेविरे; T_3 हि सेहिरे (for विषेहिरे). Ś $D_{8.12}$ यथा मेघौ विषेहतुः; $Ñ_2$ B यथैव हि(B_4 च) सुदुःसहान्; $D_{2.9}$ यथा मेघौ विनेदतुः.—^{c}) B_4 D_6 -प्रहारं; D_2 -प्रहारैस्. $Ś_1$ D_8 तांस्तद्वद्; $Ś_{2.3}$ V_1 B_1 $D_{1-4.9.12}$ M_6 तौ तद्वत् (by transp.); $Ñ_1$ V_3 B_4 $D_{6.7.10.11}$ T G $M_{1.3.5.8.10}$ तौ तत्र; $Ñ_2$ B_3 तौ दत्तान्; B_2 तौ दत्त्वा (for तद्वत्तौ). D_5 तथा प्रहरतौ तद्वत्.—^{d}) $Ñ_1$ V_3 $B_{1.2.4}$ $D_{6.7.10.11}$ $M_{3.5.8-10}$ सेहाते; $Ñ_2$ B_3 सहाते; V_1 सेहातां; $D_{1-5.9}$ T_4 सहेतां; G_1 सहेतो; M_6 सेहतां (for सहेते). D_6 नृप- (for नर-). $Ś_1$ D_8 असहेतां परस्परं.

54 ^{a}) $Ś_1$ $Ñ_2$ B_4 च (for तु). M_6 यथाशने रवेभ्यस्तु.—^{b}) B_2 $D_{7.10.11}$ [ऽ]थ (for वै). $Ś_1$ $Ñ_2$ V_3 B $D_{2.8}$

G. 7.21.56
B. 7.32.56
L. 7.30.55

अर्जुनस्य गदा सा तु पात्यमानाहितोरसि ।
काञ्चनाभं नभश्चक्रे विद्युत्सौदामिनी यथा ॥ ५५
तथैव रावणेनापि पात्यमाना मुहुर्मुहुः ।
अर्जुनोरसि निर्भाति गदोल्केव महागिरौ ॥ ५६
नार्जुनः खेदमाप्नोति न राक्षसगणेश्वरः ।
सममासीत्तयोर्युद्धं यथा पूर्वं बलीन्द्रयोः ॥ ५७
शृङ्गैर्महर्षभौ यद्वद्दन्ताग्रैरिव कुञ्जरौ ।
परस्परं विनिघ्नन्तौ नरराक्षससत्तमौ ॥ ५८
ततोऽर्जुनेन क्रुद्धेन सर्वप्राणेन सा गदा ।
स्तनयोरन्तरे मुक्ता रावणस्य महाहवे ॥ ५९
वरदानकृतत्राणे सा गदा रावणोरसि ।
दुर्बलेव यथा सेना द्विधाभूतापतत्क्षितौ ॥ ६०
स त्वर्जुनप्रमुक्तेन गदापातेन रावणः ।
अपासर्पद्धनुर्मात्रं निषसाद च निष्टनन् ॥ ६१

-स्वन: (for -श्रुति:). Ś2.3 Ñ1 V1 D1.3–5.9.12 T4 जायंते वै (V1 °थ) प्रतिस्वना:(D3 °श्रवा:). —Ś1 V1 D8 om. 54^{cd}. V3 reads 54^{cd} after 55. —^{c}) B2 तयोस्; D2 T2 G1 तदा (for तथा). —G3 damaged from ताभ्यां up to 55^{a}. B1 D5–7.10.11 तयोर् (for ताभ्यां). Ś2.3 B3 D1–5.12 T4 M6 -घातैर्; D7.10.11 Cg.t -पोथैर् (for -पातैर्). ❀ Cg.t: गदापोथैर्गदापातै:. ❀ —^{d}) M1 तदा (for दिश:). T4 damaged for सर्वा:. Ñ1 B D1.3–5 प्रसस्वनु:; D2.9 T4 M6 प्रतिस्वना:(M6 °नु:); Cg.k.t as in text (for प्रतिश्रुता:). Ñ2 प्रतिनादस्तु जायते.

55 G3 damaged up to ^{a} (cf. v.l. 54). —^{a}) Ñ1 तथा ताभ्यां; Ñ2 B अर्जुनेन (for अर्जुनस्य). Ś V1.3 D1–5.8.9.12 T4 हि (for तु). —^{b}) Ś Ñ V1.3 B D1–5.8.9.12 M6 क्षिप्यमाना(Ś3 D1–5.9.12 M6 °णा) (for पात्यमाना). Ś V3 D1–5.8.9.12 तथोरसि; Ñ B2–4 T2 G2.3 M1.3 Ck महो°; V1 T3 तदो°; T4 ततो°; M5.8 [अ]भितो°; Ct as in text (for [अ]हितोरसि). —^{d}) Ś2.3 D7.10–12 T3 M5–7 सौदामनी. —After 55, V3 reads 54^{cd}.

56 ^{a}) D4 तथैवं. M3 [आ]जौ (for [अ]पि). —^{b}) Ñ2 महागदा (for मुहुर्मुहु:). —Ś1 om. 56^{cd}. —^{c}) Ñ B भाति स्म (for निर्भाति). —^{d}) Ñ2 B2 G3 महो(G3 damaged after महो up to न in 57^{b})ल्केव; D8 *** व; L (ed.) रविज्योतिर् (for गदोल्केव). G1 महारणे. Ś2.3 D12 गदावज्रं यथा गिरौ.

57 G3 damaged up to न in ^{b} (cf. v.l. 56). —^{a}) D5 T3 अर्जुन:. Ś V3 D1–5.8–12 आयाति; Ñ1 B1.4 आयातो; Ñ2 B3 आपेदे; B2 ईयाय (for आप्नोति). —^{b}) V1 न रक्ष: स; B1 स च रक्षो- (for न राक्षस-). T3 -गणाधिप:. —^{c}) Ś D8.12 G2 द्वयोर्; V1 T3 तदा; T1.2 M2.6 ततो (for तयोर्). —^{d}) G1 युद्धं (for पूर्वं). Ś D8.9.12 M6 बलेंद्रयो: (for बलीन्द्रयो:). Ñ B यथा बलिमहेंद्रयो:; V1 T4 बलिवासवयोरिव.

58 ^{a}) G3 तद्वद्. Ś V1.3 D2.5.8.9 T4 ऋ(D5 T4 वृ)षभाविव तौ शृंगैर्; D1.3.4 वृषभाविव शृंगाभ्यां; D6.7.10.11 Ct शृंगैरिव वृषा(D6 °षौ)युध्यन्; D12 अवलाविव तौ शृंगैर् (corrupt); M6 शृंगैरिव ककुद्मंतौ. ❀ Ct: वृषायुध्यन्। वृषावयुध्यन्नित्यर्थ:. ❀ —^{b}) D1.3.4 दंताभ्याम् (for दन्ताग्रैर्). —For 58^{ab}, Ñ B subst.:

672* दन्तैरिव महानागौ शृङ्गैरिव महावृषौ ।

[B2.3 महर्षभौ (for महावृषौ).]

—^{c}) Ś V1.3 D1–5.8.9.12 T4 M3 जघ्नतुर्वै(D1.3–5 T4 M3 °स्तौ); T1.2 G2.3 M1.10 तौ निघ्नंतौ; M6 तु तौ वीरौ; Cv as in text (for विनिघ्नन्तौ). Ñ B जघ्नतु(B1.2 °घ्नंत)स्तौ रणे घोरौ (Ñ1 महात्मानौ). ❀ Cv: परस्परं विनिघ्नन्तौ अभूतामिति शेष:. ❀ —^{d}) Ñ B तदा; M6 घ्नंतौ (for नर-). Ś Ñ V1.3 B1.3.4 D1–5.8.9.12 T4 M6 -राक्षसपार्थिवौ; B2 पार्थिवराक्षसौ; M10 -राक्षसपुंगवौ (for °सत्तमौ).

59 ^{a}) G3 damaged from क्रुद्धेन up to रन्तरे in ^{c}. B1 तरसा (for क्रुद्धेन). —V3 lacuna for 59^{cd}. —^{c}) B2.3 युक्ता (for मुक्ता). —^{d}) Ś Ñ1 V1 D1–5.8.9.12 T4 महामृधे; B4 तदा भृशं; D6.7.10.11 महोरसि (for महाहवे).

60 ^{a}) G1 -गत- (for -कृत-). G3 -त्राते (fop -त्राणे). —^{c}) V1 D4 दुर्बले च; T2 M5 °लेन; T3 °लैव; Cg.k.t as in text (for दुर्बलेव). Ñ V3 B तदा सेना; D6.7 शिला यद्वद्; D10.11 Cg.k.t यथा वेगं; T1 यथा शाखा (for यथा सेना). ❀ Cv: इवयथाशब्दावेकार्थावेव. ❀ —^{d}) M8 तथा (for द्विधा-). D8 T1.2.4 Cg.k द्विधा भूत्वा; Ct °भूता(as in text). G1 M6 [अ]भवत्; Cg.k.t as in text (for [अ]पतत्).

61 ^{a}) Ś D2.8.9.12 T4 च (for तु). Ñ2 V1.3 B2.3 D2.5–7.9–11 T G2 M1.3.5.10 -प्रयुक्तेन. —^{b}) G3 damaged from -पातेन up to first नि in ^{d}. Ś1.3 V1.3 D1–5.8.9.12 T4 -वेगेन; Ś2 Ñ1 D6.7.10.11 M5.6.9.10 -घातेन (for -पातेन). B1 पीडित: (for रावण:). —^{c}) Ś2.3 D8.12 अथासर्पद्; Ñ2 B T4 अपसृत्य; D3.4 T3 G1 M3.5 अपसर्पद्; T1 अ***द् (damaged) (for अपासर्पद्). —^{d}) Ś D2.5.8.9.12 च धिष्ठित:; Ñ1 सनिस्वनं; Ñ2 V3 विनिश्वसन्; V1 तु धिष्ठित:; B1 निशाचर:; B2 स निष्टनन्; B3.4 विनष्टवत्; D1.4 महीतले; D6 T3 M6 च निश्वसन्; G1 न निष्टनन्; G2 च निष्पतत्; G (ed.) सनिस्वन: (for च निष्टनन्). ❀ Cg: निष्टनन् रटन् ।; Ck: निष्टनन् नदन् ।; Ct: निष्टनन् रुदन्. ❀

स विह्वलं तदालक्ष्य दशग्रीवं ततोऽर्जुनः ।
सहसा प्रतिजग्राह गरुत्मानिव पन्नगम् ॥ ६२
स तं बाहुसहस्रेण बलाद्गृह्य दशाननम् ।
बबन्ध बलवान्राजा बलिं नारायणो यथा ॥ ६३
बध्यमाने दशग्रीवे सिद्धचारणदेवताः ।
साध्वीति वादिनः पुष्पैः किरन्त्यर्जुनमूर्धनि ॥ ६४
व्याघ्रो मृगमिवादाय सिंहराडिव दन्तिनम् ।
ररास हैहयो राजा हर्षादम्बुदवन्मुहुः ॥ ६५
प्रहस्तस्तु समाश्वस्तो दृष्ट्वा बद्धं दशाननम् ।
सह तै राक्षसैः क्रुद्ध अभिदुद्राव पार्थिवम् ॥ ६६
नक्तंचराणां वेगस्तु तेषामापततां बभौ ।
उद्धूत आतपापाये समुद्राणामिवाद्भुतः ॥ ६७
मुञ्च मुञ्चेति भाषन्तस्तिष्ठ तिष्ठेति चासकृत् ।
मुसलानि च शूलानि उत्ससर्जुस्तदार्जुने ॥ ६८

G. 7. 21. 7
B. 7. 32. 6
L. 7. 20 6

62 ^{a}) G1 विह्वलं तं (for स विह्वलं). M1 तमावीक्ष्य (for तदालक्ष्य). Ś Ñ1 V1.3 D1–5.8.9.12 T4 विह्वलं तु (Ñ1 V1.3 D1.4 तं; D5 च) समालक्ष्य(V3 °साद्य); Ñ2 B M6 G (ed.) तं विह्वलित(M6 °लं स)मालक्ष्य(B4 °ज्ञाय; G [ed.] °लोक्य). —^{b}) B2 रणे; B3 D2 M8 तदा; G2 तथा (for ततो). —^{c}) V3 B3 D6.7.10.11 M6 [उ]त्पत्य; B1.2.4 [आ]प्लुत्य (for प्रति-). —^{d}) D12 मंत्रगं (for पन्नगम्).

63 ^{a}) D6.7.10.11 T1–3 M9 तु (for तं). —^{b}) Ś V1 D1–5.8.9.12 T4 बलेनादाय राक्षसं; Ñ V3 B बलादा(Ñ1 °लेना)दाय रावणं; T3 M5 बलात्संगृह्य(M5 °द्गृह्य च) रावणं. —G1 om. 63^{c}–65^{b} (hapl.?). G2 om. 63^{c}–64. —^{c}) G3 damaged from जा up to बध्यमा in 64^{a}. —M1 reads 63^{d} *inf. lin.*

64 G1.2 om. 64; G3 damaged up to बध्यमा in ^{a} (for all, cf. v.l. 63). —^{a}) D1.4 बद्धमाने (for बध्यमाने). —^{b}) Ñ1 सिद्धि-; B1 D5 सिद्धाश्च (for सिद्ध-). M4 -सेविताः (for -देवताः). —^{c}) B1 T1 साध्विति; M9 साधु प्र- (for साध्वीति). D6.7 साधु साध्विति वाक्पुष्पैः. ❀ Cv: साध्वीति वादिनः इति। दीर्घो वृत्तानुकूल्यात् ।; Cg: साध्वीति वादिनः इयं क्रिया साध्विति वदन्तः ।; Ck.t: साध्वीति वादिन इति दीर्घश्छान्दसः(Ct °र्घ आर्षः). ❀ —^{d}) T2 कीर्यंति. Ñ2 V3 B1.4 व्यकिर(B1 अभ्यर्च; B4 अकिर)न्नर्जुनं तदा. —For 64^{cd}, Ś Ñ1 V1 D1–5.8.9.12 T4 M3.5.6.10 subst.:

673* साधु साध्वित्यभाषन्त किरन्तः कुसुमं बहु ।

[Ñ1 D2.9 T4 M3.5.10 भाषंतः; D1.3.4 जल्पंतः; M6 तं पुष्पैः (for [अ]भाषन्त). D1.3.4 किरंति. D5 T4 किरंतः कुसुमान्बहून्; M3 व्यकिरन्कुसुमानि वै; M5.10 पुष्पैरवकिरंति तं; M6 किरंतोर्जुनमब्रुवन् (for the post. half).]

—Then M3 cont.:

674* मूर्ध्नि राजाधिराजस्य कार्तवीर्यस्य राघव ।

—For 64^{cd}, B2 subst.:

675* साधु साध्विति वादिभ्यः पुष्पैरभ्यर्चार्जुनं तदा ।

—B3 subst. for 64^{cd}:

676* मुमुचुः पुष्पवर्षाणि साधु साध्विति वादिनः ।

65 Ś1 D8 G1 om. 65^{ab} (for G1, cf. v.l. 63). —^{a}) Ś2.3 D2.9.12 [आ]साद्य (for [आ]दाय). —^{b}) D10.11 T1 M3 मृग- (for सिंह-). D6.7.10.11 T4 M6 कुंजरं (for दन्तिनम्). Ś2.3 V1 D1.5.12 नर(Ś2.3 D12 वन)सिंहोहरत्तथा (Ś2 °रस्तथा; Ś3 °रद्यथा; V1 D5 °रत्तदा; D12 °नद्यथा); Ñ V3 B D2.9 सिंहो वा गज(D2 वन; D9 मृग)यूथपं; D3.4 नरसिंहो हरो यथा; M5 सिंहः क्रुद्ध इव द्विपं; M6 नृसिंह इव कुंजरं; M9 नरसिंहो यथासुरं; L (ed.) सिंहो वा हस्तिनं यथा. ❀ Cv: सिंहराडिव दन्तिनमिति सम्यक्. ❀ —^{c}) V3 B1.3.4 D6.9 रराज; B2 रराव; D5 जहास; T1.2 M3 ननाद (for ररास). —^{d}) D4 अंबु वहन्; D8 अंबु द्रवन् (for अम्बुदवन्).

66 ^{a}) Ś Ñ1 D2.8.9.12 T4 [ऽ]थ; V1 [ऽ]यं (for तु). —G3 damaged from मा up to ^{b}. D3 महाश्वस्तो; T3 तदाश्वस्तो (for समाश्वस्तो). —Note hiatus between ^{c} and ^{d}. —^{c}) Ś1 D8.12 संहतै; G (ed.) सहितै (for सह तै). Ś1 D8 क्रुद्धैः; Ñ2 V3 B क्रोधाद्; G (ed.) सवैर् (for क्रुद्ध). D6.7.10.11 M6 सहसा राक्षसः क्रुद्ध. —^{d}) M7 ह्यभिदुद्राव; K (ed.) चाभिदुद्राव. Ñ1 स रावणं (hypm.); V3 भूपतिं; D6.7.10.11 हैहयं (for पार्थिवम्). Ś V1 D1–5.8.9.12 T4 प्रदुद्राव नराधिपं(V1 दशाननं).

67 ^{b}) Ñ1 चापततां. D8 बहु (for बभौ). —^{c}) D10.11 T4 M3 उद्भूत. Ś V1 D1.2.8.12 उद्भू(D1 °द्धू)तानां तपापाये; Ñ V3 B उद्ध(B4 °द्ध)तानां युगापाये; D3–5.9 उद्भूतानां तपा(D5 °दा)पाये. —^{d}) D10.11 पयोदानाम् (for समुद्राणाम्). V3 illeg. for इवाद्भुतः. Ś D1–4.8.9.12 [उ]द्धतः; B2.4 T1.2 G M1.3.8.10 [अ]द्भुतं; D5 स्वनः; D6.7 T4 M6 [अं]बुवत्; D10.11 [अं]बुधौ (for [अ]द्भुतः).

68 ^{a}) Ñ1 D5 [अ]भाषंत; D2 M9 भाषंते (for भाषन्तस्). —^{b}) T4 तिष्ठ तिष्ठे**** (damaged). —Note hiatus between ^{c} and ^{d}. G3 damaged from ^{c} up to उत्ससर्जु in ^{d}. —^{c}) B2 मुसलादि (for मुसलानि). Ñ B1.2.4 D1.3.4 T1.2 G1.2 M2.3.9 स- (for च). M6 मुसलानसि-. Ś D2.5.8.12 शैलांश्च; V1 D9 T4 शूलांश्च (for शूलानि). M1 महावेगा (for च शूलानि). —^{d}) Ñ V3 B ससृजुस्ते; T1 G2 ह्युत्ससर्जुस् (for उत्ससर्जुस्). B2 M10

G. 7. 21. 70 B. 7. 32. 70 L. 7. 20. 69 अप्राप्तान्येव तान्याशु असंभ्रान्तस्तदार्जुनः ।
आयुधान्यमरारीणां जग्राह रिपुसूदनः ॥ ६९
ततस्तैरेव रक्षांसि दुर्धरैः प्रवरायुधैः ।
भित्त्वा विद्रावयामास वायुरम्बुधरानिव ॥ ७०
राक्षसांस्त्रासयित्वा तु कार्तवीर्यार्जुनस्तदा ।
रावणं गृह्य नगरं प्रविवेश सुहृद्वृतः ॥ ७१
स कीर्यमाणः कुसुमाक्षतोत्करै-
द्विजैः सपौरैः पुरुहूतसंनिभः ।
तदार्जुनः संप्रविवेश तां पुरीं
बलिं निगृह्येव सहस्रलोचनः ॥ ७२

इति श्रीरामायणे उत्तरकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

तथा; M1 ततो (for तदा). B1 रणे; M6 [अ]र्जुनं. Ś1.3 D8.9.12 अर्जुने ससृजुस्तदा; Ś2 D6.7.10.11 सोत्ससर्ज तदा रणे; V1 T4 व्यसृजन्नर्जुने तदा; D1–4 तेर्जुने ससृजुस्तदा; D5 चिक्षिपुर्हैहयं प्रति; T2 ह्युत्ससर्जुस्तथार्जुने; M8 उत्ससर्ज तथार्जुने. ❀ Ct : सोत्ससर्जेत्यार्षम् । सहैव त्यक्तवन्त इत्यर्थः. ❀

69 Note hiatus between [a] and [b]. V3 illeg. for [a]. —[a]) D4 M1 अप्राप्तानि च; M6 प्रहसन्नेव; Ck.t as in text (for अप्राप्तान्येव). B3 तान्यासन्; D1 तान्या * (for तान्याशु). D2.9 अप्राप्तानेव तानाशु (sic). —[b]) Ñ V3 B1–3 सोऽसंभ्रांतस्; T4 ह्यसंभ्रांतस्. Ñ1 B2 G1 M1.3 ततो; T2 G2 तथा (for तदा). Ś V1 D2.5.8.9.12 ह्यसंभ्रांतं (V1 D2.5.9 °तस्) ततोर्जुनः; B4 सोभ्रांतस्तु ततोर्जुनः; D1.3.4 बभंज तां-स्ततोर्जुनः. —[c]) Ś (Ś3 *sup. lin.* also) D9.12 सुरारीणां; Ś3 D2.8 परारीणां (for [अ]मरारीणां). —[d]) Ś Ñ V1.3 B D1–5.8.9.12 T4 M6 च ननाद च; D7.10.11 T1–3 G2.3 M1.3.9 [अ]रिनिषूदनः (for रिपुसूदनः).

70 [a]) Ś1 D8 तथा तैर्; V3 D5 G1 ततस्तेन; B3 प्रहारैर्; B (ed.) ततस्तानि (for ततस्तैर्). V3 कुपितः (for रक्षांसि). —[b]) Ś1 Ñ1 D2.5.9.12 दुर्धर्षप्र-; Ś2.3 V1 D8 दुर्धर्षः प्र-; Ñ2 V3 B शितधारैर्; D1.3.4 T4 M10 दुर्धर्षैः प्र-; M4 राक्षसैः प्र- (for दुर्धरैः प्र-). G1 परमायुधैः. —[c]) T4 damaged for भित्त्वा विद्रा. V1 M1 हत्वा; D2 जित्वा; T1.2 G2.3 भीतान् (for भित्त्वा). B1 च (for वि-). —[d]) D5 यथा (for इव). B3 रथे रज्जुधरानिव.

71 [a]) Ñ1 V1.3 D1.3.4.6.7.10.11 त्रासयामास; Ñ2 B M6 त्रासयित्वाथ (Ñ2 °त्वा च; B2.3 °त्वाशु); D5 सूदयामास; G3 damaged; M1 ध्वंसयित्वा तु; M4.7 त्रासयित्वैतान्; M8.10 द्रावयित्वाथ (M8 °त्वा तु) (for त्रासयित्वा तु). —[b]) Ś1 Ñ V1 B1.3.4 D1–4.8 T1.2 G3 M1.3.4.6 कार्त (Ñ1 °र्ति)-वीर्यो. T2 तथा (for तदा). —V3 repeats 71[cd] consecutively. —[c]) M6.7 नगरीं (for नगरं). Ś Ñ1 V1.3 (second time) D1–5.8.9.12 T4 गृहीत्वा नगरं (Ś V3 D8 °रीं) रक्षः; Ñ2 V3 (first time) B आदाय रावणं वीरः (V3 °रं). —[d]) Ñ2 V3 (first time) B3 ततः पुरं; B1 पुरीं ततः; B2 तदा पुरीं; B4 पुरं ततः; D9 सुदुर्हृदं (for सुहृद्वृतः). —After 71, B ins.:

677* तेऽपि सर्वे महात्मानो रावणस्य भयार्दिताः ।
अतिष्ठन्पुष्पकं गृह्य स्वामिमोक्षणकाङ्क्षया ।

[(l. 1) B4 सर्वे तु (for ऽपि सर्वे). B1 तदामात्या; B4 भयार्तानो (sic) (for महात्मानो). —(l. 2) B4 स्वामिनो मोक्षकांक्षया (for the post. half).]

72 [a]) B3 D5.7 M6 सं (D5 वि) कीर्यमाणः. Ś V1.3 D1–5.8.9.12 T4 कुसुमोत्करैः शुभैर् (V1 D3 °रैस्तदा; V3 °रैर्द्विजैर्; D1.4 T4 °रैः करैर्; D5 °रोत्करैः); M3 °माक्षतैर्द्विजैर् (for कुसुमाक्षतोत्करैर्). —[b]) V3 जनैः; G1 M5 लाजैः; M3 निजैः (for द्विजैः). B4 च पौरैश्च; T4 सदारैः; G1 सुपूरैः; M3 स्वपौरैः (for सपौरैः). Ś Ñ B D8 -विक्रमः (Ś3 B3 °मैः); D3 -संनिभैः (for -संनिभः). —B1 transp. [c] and [d]. —[c]) Ś V3 D2.8.9.12 नृपो; Ñ V1 B D6.7.10.11 T4 M3.5–7.10 ततो (for तदा). Ś1 B1 D6.7.10.11 स्वां; B2 D9 स (for सं-). Ñ1 तत्पुरं (for तां पुरीं). —[d]) Ś2.3 D1.4 M6 बलं (for बलिं). T3 यथा त्रिविक्रमैः (for सहस्रलोचनः).

Colophon. —*Kāṇḍa name*: Ś1 D2 M7 om. —*Sarga name*: Ś1 पौलस्त्यपुत्रग्रहणं; Ś2.3 D2.9.12 रावणग्रहणं; Ñ V1.3 B2–4 D8 रावणग्रहणं (Ñ1 V1 °णः); B1 कार्तवीर्यार्जुनेन रावणनिग्रहः; D1.3.4 सहस्रार्जुन (D3 °नेन) रावणनिग्रहो; D5 रावणप्रहरणं. —*Sarga no.* (figures, words or both): Ś Ñ1 V3 B1.3 D2 om.; Ñ2 B4 D1.3–5 M6 21; V1 17; B2 D8.9 T4 20; D12 19; T3 37. —After colophon, T4 concludes with श्रीरामार्पणमस्तु; G2.3 M1.3 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

३३

रावणग्रहणं तत्तु वायुग्रहणसंनिभम् ।
ऋषिः पुलस्त्यः शुश्राव कथितं दिवि दैवतैः ॥ १
ततः पुत्रसुतस्नेहात्कम्प्यमानो महाधृतिः ।
माहिष्मतीपतिं द्रष्टुमाजगाम महानृषिः ॥ २
स वायुमार्गमास्थाय वायुतुल्यगतिर्द्विजः ।
पुरीं माहिष्मतीं प्राप्तो मनःसंपातविक्रमः ॥ ३
सोऽमरावतिसंकाशां हृष्टपुष्टजनावृताम् ।
प्रविवेश पुरीं ब्रह्मा इन्द्रस्येवामरावतीम् ॥ ४
पादचारमिवादित्यं निष्पतन्तं सुदुर्दशम् ।
ततस्ते प्रत्यभिज्ञाय अर्जुनाय न्यवेदयन् ॥ ५
पुलस्त्य इति तं श्रुत्वा वचनं हैहयाधिपः ।
शिरस्यञ्जलिमुद्धृत्य प्रत्युद्गच्छाद्द्विजोत्तमम् ॥ ६ G. 7. 22. 6 B. 7. 33. 6 L. 7. 21. 6

33

☞ V2 missing for Sarga 33 (cf. v.l. 7.12.2). Ś Ñ V1.3 B D1–5.8.9.12 T3.4 M6 read 7.31–34 before 7.20 (T3 alone repeating here). D12 begins with ॐ.

1 a) Ś D8.12 तत्र; D1.3.4 T3.4 G1 M2.4.8–10 तं तु; G2 दृष्ट्वा (for तत्तु). —For 1ab, Ñ B subst.:

678* ग्रहणं राक्षसेन्द्रस्य तत्तु वायुग्रहोपमम् ।

[Ñ1 अर्जुनेन तु तत्कर्म (for the prior half). Ñ1 कृतं (for तत्तु). B1–3 राहु- (for वायु-).]

—c) D5 om.; D6.7.10.11 M1 ततः (for ऋषिः). D1.12 पौलस्त्यः. —d) Ś Ñ1 V1.3 D1–5.8.9.12 कथ्यमानं दिवालयैः (D2–4 °ये).

2 a) Ś Ñ1 V1.3 D1–4.8.9.12 भृशं; B2 पुनः; D5 नृशंसं (corrupt); G1 पौत्र- (for पुत्र-). B1 D6.7.10.11 T4 G1 -कृत-; T3 -गत-; M2 -स्नत- (for -सुत-). —b) D6.7 T2.3 G कंपमानो; M2.7.9 कंप्यमान-. V3 मनोधृतिः; G3 महाव्रतः; M5.10 महामतिः (for महाधृतिः). Ś Ñ1 V1 D1–4.8.9.12 M6 कंप(Ś D9.12 तप्य; D2 काय्यं; D8 तुष्य)मानमनोधृतिः; Ñ2 B त्वरितं(B1 °तः) स(Ñ2 *) महामुनिः(B1 °मतिः); D5 तथाममतो धृतिः (sic). ❀ Cg : कम्प्यमानः अनुकम्पायुक्तया संपद्यमानः । यद्वा पौत्रस्नेहात्कम्पित इत्यर्थः । अथवा महाधृतेरपि कम्पितं हृदयमित्यर्थः ।; Ck : कम्प्यमानः अनुकम्पायुक्ततया संपा(प ?)द्यमानः ।; so also Ct. ❀ —d) Ñ1 V1.3 T4 महामुनिः; Ñ2 B महातपाः (for महानृषिः). D1.3.4 जगाम स महामुनिः. —For 2cd, Ś D2.5.8.9.12 subst.:

679* स च माहिष्मतीं द्रष्टुं जगाम सहसा मुनिः ।

3 a) D1.4 वायोर् (for वायु-). V3 B2 -वेगम् (for -मार्गम्). —b) B2 वात-; B3 वज्रि-; D4 वासु- (for वायु-). —Ś1 om. 3cd. —c) Ś3 D2.5.8.9.12 प्रायान् (for प्राप्तो). —d) D1.4 मुनिः; D5 द्विज- (for मनः-). Ñ B -संकल्प-; D1.4.8 T4 G2 -संपाति-; Cg.k.t as in text (for -संपात-). ❀ Cg.t : मनःसंपातविक्रमः मनो(Ct °नस्तुल्य)गतिः ।; Ck : विक्रमो गतिः. ❀

4 a) D2 सामरावति-; G (ed.) °वती- (for सोऽमरावति-). D2 -संकाशा; D3 -सकाशां (unmetric) (for -संकाशां). ❀ Cg : अमरावतिसंकाशामित्यत्र "ङ्यापोः संज्ञाछन्दसोर्बहुलम्" इति ह्रस्वः ।; Ck.t : अमरावतिसंकाशाम् ङ्यापोरिति(Ct °संकाशाम् आर्षो) ह्रस्वः. ❀ —b) D5 हर्ष- (for हृष्ट-). B2 M4.7 -[आ]कुलां; D2 [आ]वृता; M10 -[आ]युतां (for -[आ]वृताम्). —Note hiatus between c and d. —c) G2 M1 (also as in text) रम्याम् (for ब्रह्मा). Ś Ñ1 V1.3 D1–5.8.9.12 T4 विवेश ब्रह्मणः पुत्र. —d) Ñ2 B यथेन्द्रस्य(B2 °श्च) (for इन्द्रस्येव).

5 a) B3 पात्रवंतम्; M8 पादचाराद् (for पादचारम्). B1 [आ]दित्यः. —b) Ñ2 B2–4 प्रविशंतं; M6 निष्टपंतं (for निष्पतन्तं). B3 सुदुर्जयं; T1.2 M3 महामुनिं; Ck.t as in text (for सुदुर्दशम्). B1 प्रविवेश सुदुःखितः. ❀ Cg : सुदुर्दशम् दुर्दर्शमिति यावत् ।; Ck : सुदुर्दशमिति । सुदुर्दर्शमिति यावत् ।; so also Ct. ❀ —For 5ab, Ś Ñ1 V1.3 D1–5.8.9.12 T4 subst.:

680* पादचारी यथादित्यः प्रतपन्सर्वतो दिशः।

[D5 * पितृवद् (for पादचारी). Ñ1 प्रभवन्; D2.8 प्रपतन् (for प्रतपन्).]

—Note hiatus between c and d. —c) Ś1 V3 D8 सं-; Ś3 V1 D1–5.9.12 T4 M3 तं (for ते). D1.4 सम(D1 ° *)भिज्ञाय. Ñ B विज्ञाय तमृषिं द्वा(B2 द्वाः) स्था(Ñ1 B1 °स्थो). —d) D6 अर्जुनस्य; T3 त्वर्जुनाय. Ñ1 B1 न्यवेदयत्. Ś V1.3 D1–5.8.9.12 T4 M3 द्वा(D8 द्वार [hypm.])स्थो(D5 M3 °स्था) राज्ञे न्यवेदयत्(D5 M3 °यन्).

6 a) V1 पुलस्त्यम्. Ś2.3 D1.3.4.12 इह (for इति). Ś V3 D1–5.8 M3.6 संप्राप्तः(D2 °प्तं); V1 D6.7.10.11 विज्ञाय; T4 M2.7–9 तच्छ्रुत्वा; M5 तं ज्ञात्वा; M10 संश्रुत्वा. D9 पुलस्त्यं प्रतिसंप्रा*म्; M1 पुलस्त्यमागतं श्रुत्वा. —b) Ś D1–5.8.12 प्राह तं; V1 प्राहुस्ते; V3 corrupt; D9 आह तं; D10.11 वचनाद् (for वचनं). V1.3 D3.9 हैहयाधिपं; T1.2 G M1.2.4–10 हेहयाधिपः. M3 इति श्रुत्वा तु हैहयः. —For 6ab, Ñ B subst.:

681* श्रुत्वा पुलस्त्यं संप्राप्तमर्जुनः सह मन्त्रिभिः ।

G. 7. 22. 7
B. 7. 33. 7
L. 7. 21. 7

पुरोहितोऽस्य गृह्यार्घ्यं मधुपर्कं तथैव च ।
पुरस्तात्प्रययौ राज्ञ इन्द्रस्येव बृहस्पतिः ॥ ७
ततस्तमृषिमायान्तमुद्यन्तमिव भास्करम् ।
अर्जुनो दृश्य संप्राप्तं ववन्देन्द्र इवेश्वरम् ॥ ८
स तस्य मधुपर्कं च पाद्यमर्घ्यं च दापयन् ।
पुलस्त्यमाह राजेन्द्रो हर्षगद्गदया गिरा ॥ ९
अद्येयममरावत्या तुल्या माहिष्मती कृता ।
अद्याहं तु द्विजेन्द्रेन्द्र यस्मात्पश्यामि दुर्दृशम् ॥ १०
अद्य मे कुशलं देव अद्य मे कुलमुद्धृतम् ।
यत्ते देवगणैर्वन्द्यौ वन्देऽहं चरणाविमौ ॥ ११
इदं राज्यमिमे पुत्रा इमे दारा इमे वयम् ।
ब्रह्मन्किं कुर्म किं कार्यमाज्ञापयतु नो भवान् ॥ १२

[B3 महर्षिम् (unmetric); B4 आयांतम् (for संप्राप्तम्).] —c) B1.3 शिरसा (for शिरसि). Ś Ñ V1 B2–4 D2.8.12 T4 G2.3 आदाय; V3 B1 D1.3–7.9–11 T1.2 M1.3 आघ्राय; M6 उत्क्षिप्य (for उद्धृत्य). —V3 illeg. for d. —d) D2.5.8.9.12 T4 M3 प्रत्यगच्छत्; D6.7 M6 प्रत्युद्गम्य; Cg.k.t as in text (for प्रत्युद्गच्छद्). Ś D2.5.8.9.12 स ब्रह्मजं; D6.7.10.11 T4 तपस्विनं; T2 M10 स तं (T2 ततो) द्विजं; G1 *बांधवं; M6 च ब्राह्मणं (for द्विजोत्तमम्). Ñ B ततः प्रत्युद्ययौ मुनिं; V1 ब्रह्मणः पुत्रमन्वगात्; D1.3.4 शीघ्रं प्रत्युद्य(D1 °त्थाय)यौ द्विजं; T1 G2.3 M1.8 प्रत्युद्गच्छत तं द्विजं; M5 प्रत्युद्गच्छति सत्वरं. ❀ Cg.k.t : प्रत्युद्गच्छत् प्रत्युदगच्छत्. ❀

7 a) D2 T3 पुरोहितं. Ś2.3 Ñ1 V1.3 D3.5.9.12 T3 प्र-; D1.4 T4 च; D8 स (for ऽस्य). Ś1 V3 D1.4 [अ]र्थं; D5.9 [अ]र्थ; T2 [अ]र्घं; M8 [अ]र्घ्यान् (for [अ]र्घ्यं). Ñ2 B गृहीत्वार्घ्यं(B1 °र्घं); D2 प्रगृह्यार्थं (for ऽस्य गृह्यार्घ्यं). —b) D4 मधुपर्कं. Ñ2 B2.4 गां (for च). Ś Ñ1 V1.3 D1–5.8.9.12 च गां च(Ñ1 गाश्च) ह; M6 च मारिष. —c) Ś V1 D2.8.9.12 पुरतः (for पुरस्तात्). V1 M5 राजन्; D1.3.4 प्राज्ञः (for राज्ञ). D5 पुरतः पुरतः प्रेक्ष्य. —D5 om. 7^{d}–8^{c}. —d) Ś Ñ V1.3 B D1–4.6–12 T4 M6 शक्रस्य (for इन्द्रस्य).

8 D5 om. 8^{abc} (cf. v.l. 7). V3 lacuna for 8^{ab}. —c) D1.3.4 प्रेक्ष्य (for दृश्य). D10.11 संभ्रांतो (for संप्राप्तं). Ś Ñ V1.3 B D2.8.9.12 T4 प्रेक्ष्य(Ñ2 B भृश) संभ्रांतो(T4 °तोषाद्). —d) V1 संपश्य; G1 पन्नग-; M2.4.7.8 वंदते (for ववन्दे). D6 T1.2 G2.3 जितेंद्रिय(G2 °यम्) (for ववन्देन्द्र). Ś1 D8 द्रुतम्; D1.4 ब्राह्मण-; T3 [इं]द्रमिव; M1 तं मुनि-; M9 [अ]जमिव (for [इ]न्द्र इव). D4 M9 -[ई]श्वरः. Ś2.3 D12 चरणावृषेः; Ñ1 मुनिसत्तमं; Ñ2 B [अ]र्घं (B4 °र्घ्यं)पुरःसरः (B2.4 °रं) (for [इ]न्द्र इवेश्वरम्). ❀ Cg.t : ईश्वरं ब्रह्माणम् ।; Ck : ईश्वरं चतुर्मुखरुद्रम्. ❀

9 a) Ñ2 B D10.11 गां; V3 वै (for च). —b) D1.3.4.8 G2 अर्घं (for अर्घ्यं). B3 पाद्यार्घ्यं च (for पाद्यमर्घ्यं). Ś D2.8.12 प्रदाप्य(D2 °य) च; Ñ1 निवेदयेत्; V1 T4 न्यवेदयत्; B3 D10.11 निवेद्य च; D1.4 M1 च दापयेत्; D5.9 तथैव च (for च दापयन्). —G2 repeats 9^{cd} consecutively. —c) Ś V1.3 D2.5.8.9.12 T4 प्राह (for आह). M6 राजेंद्र. Ñ2 B अब्रवीद्राजा (for आह राजेन्द्रो). —d) G2 (both times) हर्षाद् (for हर्ष-).

10 a) Ś1 Ñ2 V1 D1.4–7.9–11 G1 M2.4.7–9 अद्यैवम् (V1 °व हि; G1 M2.4.7–9 °व मे); V3 पुरीयम् (for अद्येयम्). Ś V1 D1–5.8.9.12 T4 अमरावत्यास्. —b) M8 तुल्यं (for तुल्या). Ś1 D8 पुरी; Ś2.3 V1 D1–5.9.12 T4 मम (for कृता). —c) M7 त्वां (for तु). T4 अद्य चाहं; M6 अद्यैवाहं (for अद्याहं तु). D6.7.10.11 T3.4 M3.5 द्विजेंद्र(T3 M3.5 °द्रं) त्वां(T3 M3 त्वा); T1 G2 M1.7–9 द्विजेंद्रेंद्रं. —d) M6 यस्त्वां (for यस्मात्). T4 [अ]हं मुने (for दुर्दृशम्). —For 10^{cd}, Ś Ñ V1.3 B D1–5.8.9.12 subst.:

682* अद्य चाहं द्विजेन्द्राभो यस्त्वां पश्यामि वेश्मनि ।

[Ñ2 अपि (for अद्य). D2.8.9 अद्य वा(D2 °चैवा)हं. Ś2.3 D12 द्विजश्रेष्ठ(Ś3 °ष्ठो); Ñ1 B मनुष्येंद्रो; Ñ2 सुरेंद्रोस्मि; V1 द्विजेंद्रोपि; D1–5.9 द्विजेंद्रे(D5 °*)द्रो(D1 °*; D3 °द्र). B2 यत् (for यस्). D1.5 त्वा (for त्वां). Ñ1 (with hiatus) ईदृशं; Ñ2 B1.2.4 दुर्दृशं; V1 [अ]हं मुनिं; B3 त्वादृशं (for वेश्मनि).]

11 Note hiatus between a and b. —a) Ś1 V1 D7.8 ब्रह्मन्; D6 T4 G1.2 M4.7 दैवम् (for देव). D1.3.4 transp. कुशलं and देव. —b) D1.4 यच्च (for अद्य). V3 D6.7.10.11 कुशलं व्रतं; B1 सफलं कुलं (for कुलमुद्धृतम्). —For 11^{ab}, Ñ2 subst.; while D7.10.11 T3.4 M3 ins. after 11^{ab}:

683* अद्य मे सफलं जन्म अद्य मे सफलं तपः ।

[Note hiatus between the two halves. Ñ2 कुशलं व्रतं (for सफलं तपः).]

—c) V1 अद्य; T1 यत्तैर्; M6 यतो (for यत्ते). Ś1 Ñ V1.3 B D1–5.8.9 M6 -शतैर्; Ś2.3 D12 -वरैर् (for -गणैर्). —d) D6.7.10.11 तव; M1 उभौ (for इमौ). G2 चरणांबुजौ (for चरणाविमौ).

12 b) D4 इमा (for first इमे). Ñ2 B तथा; M6 अयं (for second इमे). B2 बलं; M6 त्वहं (for वयम्). —For subst. in Ś etc. cf. v.l. 13. —c) D1.3.4 करोमि; D10.11 किं कुर्मः; M2.4.7 किं कर्म; K(ed.) किं कुर्मि (for किं कुर्म); Ñ1 B1.3 कुर्मस्ते; Ñ2 B2.4 कुर्महे (for कुर्म किं). V3 किं कार्यं विप्र किं कुर्म. ❀ Cg : किं कुर्मि किं करवाणि ।; Ck : किं

तं धर्मेऽग्निषु भृत्येषु शिवं पृष्ट्वाथ पार्थिवम् ।
पुलस्त्योवाच राजानं हैहयानां तदार्जुनम् ॥ १३
राजेन्द्रामलपद्माक्ष पूर्णचन्द्रनिभानन ।
अतुलं ते बलं येन दशग्रीवस्त्वया जितः ॥ १४
भयाद्यस्यावतिष्ठेतां निष्पन्दौ सागरानिलौ ।
सोऽयमद्य त्वया बद्धः पौत्रो मेऽतीवदुर्जयः ॥ १५
तत्पुत्रक यशःस्फीतं नाम विश्रावितं त्वया ।
मद्वाक्याद्याच्यमानोऽद्य मुञ्च वत्स दशाननम् ॥ १६
पुलस्त्याज्ञां स गृह्याथ अकिंचनवचोऽर्जुनः ।
मुमोच पार्थिवेन्द्रेन्द्रो राक्षसेन्द्रं प्रहृष्टवत् ॥ १७
स तं प्रमुक्त्वा त्रिदशारिमर्जुनः
प्रपूज्य दिव्याभरणस्रगम्बरैः ।
अहिंसकं सख्यमुपेत्य साग्निकं
प्रणम्य स ब्रह्मसुतं गृहं ययौ ॥ १८

G. 7. 22. 18
B. 7. 33. 18
L. 7. 21. 18

कुर्मे किं करवामेति. ❀ —ᵈ) T1.2 G2.3 मे; M1 मां; M10 मा (for नो). D1.3.4 आज्ञापय ममानघ.

13 V3 illeg. for ᵃᵇ. —ᵃ) M8.10 स; M9 तद् (for तं). T3 स तं धर्माग्नि-; G1 M6 धर्मेष्वग्निषु (for तं धर्मेऽग्निषु). D6.7.10.11 M9 पुत्रेषु (for भृत्येषु). —ᵇ) D6.7.10.11 T1.2 G3 M2.3.6 च; G1 ह; M10 तु (for [अ]थ). G2 M8 पार्थिवः. —For 12ᶜ–13ᵇ, Ś V1 D2.5.8.9.12 T4 subst.; while Ñ2 B D1.3.4 subst. l. 2 only for 13ᵃᵇ:

684* किं कार्यं विप्र किं कुर्मे आज्ञापय ममानघ ।
धर्मे चाग्निषु भृत्येषु पृष्ट्वा तं कुशलं यथा ।

[(l. 1) D5 ब्रूहि; T4 देव (for विप्र). V1 ते (for second किं). D2 कर्मे (for कुर्मे). D5 ममा**; D8 ननाम च (for ममानघ). —(l. 2) Ñ B3.4 तं धर्मेग्निषु; B1 तं धर्मेष्वपि (for धर्मे चाग्निषु). B4 राज्ये च (for भृत्येषु). B2 तच्छ्रुत्वा नृपतेर्वाक्यं; D5 नथाधर्मेवग्निक्षत्येषु (corrupt) (for the prior half). D1.2.4.12 दृष्ट्वा (for पृष्ट्वा). D8 *गतं (for पृष्ट्वा तं). Ñ1 V1 T4 तदा; D1–4 तथा (for यथा). Ñ2 B पृष्ट्वा कुशलमव्ययं (for the post. half).]
—ᶜ) Ñ B M3 प्रा(M3 त्वा)ह (for [उ]वाच). Ś V1.3 D1–5.8.9.12 उवाच विप्रो राजानं. ❀ Cg.k.t : पुलस्त्योवाचेति संधिरार्षः (Ck °धिश्छान्दसः). ❀ —ᵈ) Ś V1 D1–5.8.9.12 ततो; Ñ2 V3 D6.7.10.11 T1 M5 तथा (for तदा). T3 हैहयाधिपमर्जुनं.

14 ᵃ) D8 [अा]यत-; T1.2.4 G3 M1.6.10 [अं]बुज- (for [अ]मल-). Ś3 V1 D2.5.8.9 T1.2.4 G2.3 M1.5.6.8.10 -पत्राक्ष (for -पद्माक्ष). Ś1.2 Ñ V3 B D1.3.4.12 राजन्कमलपत्राक्ष; D6.7.10.11 नरेंद्रांबुजपत्राक्ष. —ᵇ) T3 पूर्णेंदुसदृशानन. —ᶜ) D6 अचलं; G2.3 M10 अतुल्यं (for अतुलं). M9 तु (for ते). —After 14, D11 ins. रामाय नमः.

15 ᵃ) Ś D8.12 तु तिष्ठेते; V1.3 D2.5–7.9–11 T2.3 [उ]प(V1 D2.5.9 तु)तिष्ठेतां (for [अ]वतिष्ठेतां). D1.3.4 भयात्तु यस्य तिष्ठेते. —ᵇ) D1.5.12 निस्यंदौ (for निष्पन्दौ). V3 भास्करानिलौ; B3 सागराविमौ (for सागरानिलौ). —ᶜ) V3 D7.10.11 मृधे (for अद्य). —ᵈ) Ś1 M1 पुत्रो (for पौत्रो). M6 सो (for मे). D6.7.10.11 रण- (for ऽतीव-). D5 यो मेतीव सुदुर्जयः.

16 ᵃ) Ñ1 तं; T4 यत् (for तत्). Ś1.2 V1.3 T1.2 G M1.5 पीतं; M2–4.6.7 प्राप्तं (for -स्फीतं). M10 यशस्यं च (for यशःस्फीतं). D7.10.11 Ck.t पुत्रकस्य यशः पीतं. —ᵇ) Ñ2 B लोके (for नाम). ❀ Cg : पुत्रकस्य मदीयबालकस्य नाम विश्रावितं रावणजिदिति नाम त्वया त्रैलोक्ये विश्रावितम् ।; Ck : पुत्रकस्य मदीयबालस्य रावणस्य यशः पीतं त्वदीयं नाम च रावणजिदित्येवं रूपं त्वया त्रैलोक्ये विश्रावितम् ।; Ct : पुत्रकस्य मदीयबालस्य रावणस्य यशः पीतं नाशितम्, स्त्रीयं नाम च रावणजि दित्येवं त्रैलोक्ये विश्रावितम्. ❀ —V3 illeg. for ᶜᵈ. —ᶜ) D6 M6.7 वाच्यमानोद्य(D6 °पि) (for याच्यमानोऽद्य). Ś Ñ V1 B D1–5.8.9.12 T4 मद्वाक्यं मानयाद्य त्वं(Ñ2 B °यस्वद्य; D5 °याद्य*). —ᵈ) Ñ1 त्वं तद्; Ñ2 B1.3.4 तात; B2 D1.3.4 तावद्; M8 मुंच; Cg k वत्सं (for वत्स). Ś V1 D2.5.8.9.12 T4 मुच्यतां हि दशाननः.

17 Note hiatus between ᵃ and ᵇ. —ᵃ) D1.3.4 -[उ]क्तं (for -[आ]ज्ञां). D6.7.10.11 M7 प्र-; M8 सु- (for स). Ś Ñ1 V1.3 D1–5.8.9.12 T4 प्रगृह्याशु; Ñ2 B गृहीत्वा स; T1–3 G2.3 M3 स(T2 G2 सु) संगृह्य (for स गृह्याथ). —ᵇ) D6.7.10.11 G2 M1 न किंचन; T1–3 G1.3 नोचे किंचिद् (for अकिंचन-). Ś Ñ1 V1.3 D1–5.8.9.12 T4 प्रहृष्टः स(D8 सु) नृपो(Ś3 नरो)त्तमः (D1.3.4 नराधिपः); Ñ2 B नाकिंचिद्वचनोर्जुनः; M3 किंचिन्नावोचदर्जुनः. ❀ Cv : अकिंचनवचः अविद्यमानकिंचिद्वचः । किंचिदप्यवदन्नित्यर्थः ।; Cg : किंचिद्वचोऽपि नोवाच किंचन अविद्यमानं किंचिद्वचनं न किंचिदप्यवददित्यर्थः; अपि तु क्रिया केवलमुत्तरमिति मुमोचेत्यर्थः ।; so also Ck.t. ❀ —ᶜ) M6 अमुचत् (for मुमोच). G1 राक्षस- (for पार्थिव-). D6 पार्थिवइंद्रो (metri causa) (for °वेन्द्रेन्द्रो.). Ś Ñ V1.3 B D1.2.4.5.8.9.12 T4 अमुं(D5 °मु)चत्पार्थिवेंद्रो हि(Ñ B D4 °द्रस्तं; D1 °द्र*; T4 °द्रोपि); D10.11 मुमोचैव पार्थिवेंद्रो. —ᵈ) T3 प्रहृष्टवान्; Cg.k.t as in text (for प्रहृष्टवत्). ❀ Cg.k : प्रहृष्टवत् ब्रह्मणा प्रार्थनीयोऽ(Ck °णा च प्रार्थनीयकृत्यवान)स्मीति संतोषयुक्तः सन् ।; Ct : प्रहृष्टवद्ब्रह्मपुत्रो मां प्रार्थितवानिति संतोषयुक्तः सन्. ❀ —For 17ᶜᵈ, D3 subst.:

685* अमुञ्चद्राक्षसेन्द्रं स पार्थिवेन्द्रः प्रहृष्टवान् ।

18 ᵃ) Ś Ñ2 V1.3 B1–3 D T4 M3.6 वि(D1.3.4.6.7.10.11 प्र)मुच्य(M6 °क्त्वा); B4 व्यमुंचत्; G1 च मुक्त्वा

G. 7. 22. 19
B. 7. 33. 19
L. 7. 21. 19

पुलस्त्येनापि संगम्य राक्षसेन्द्रः प्रतापवान् ।
परिष्वङ्गकृतातिथ्यो लज्जमानो विसर्जितः ॥ १९
पितामहसुतश्चापि पुलस्त्यो मुनिसत्तमः ।
मोचयित्वा दशग्रीवं ब्रह्मलोकं जगाम सः ॥ २०
एवं स रावणः प्राप्तः कार्तवीर्यात्तु धर्षणाम् ।
पुलस्त्यवचनाच्चापि पुनर्मोक्षमवाप्तवान् ॥ २१
एवं बलिभ्यो बलिनः सन्ति राघवनन्दन ।
नावज्ञा परतः कार्या य इच्छेच्छ्रेय आत्मनः ॥ २२
ततः स राजा पिशिताशनानां
सहस्रबाहोरुपलभ्य मैत्रीम् ।
पुनर्नराणां कदनं चकार
चचार सर्वां पृथिवीं च दर्पात् ॥ २३

इति श्रीरामायणे उत्तरकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

(for प्रमुक्त्वा). B1.3 T3 M6.7 त्रिदशारिमर्द(B3 °वर्ध)नः (B1 T3 °नं) (for त्रिदशारिमर्जुनः). —b) Ś D5.8.9 प्रहृस्य; V1 B3 प्रगृह्य; B2 प्रयुज्य; D2 प्रदास्य; M3.6 संपूज्य (for प्रपूज्य). B1.3.4 दिव्याभरणैः(B4 °णानि च) (for दिव्याभरण-). Ś D2.8.9.12 T4 -[अं]बरस्रजं(T4 °जा); Ñ V1.3 B2 -[अं]बरैः(V1 °र) शुभैः(Ñ1 V1 स्रजैः; B2 शनैः); B1 स्वलंकृतैः; B3 कुले शुभैः; B4 तत्र तत्र; D5 -* * स्रजं; M6 -[अं]बराशनैः (for -स्रगम्बरैः). —c) Ñ2 B अहिंसया (for अहिंसकं). M7.8 सत्यम् (for सख्यम्). M1 इतोऽग्निसाक्षिकं (for उपेत्य साग्निकं). ❀ Cv : अहिंसकं परस्परहिंसाहीनम्।; Cg : परस्परहिंसाप्रवृत्तिनिवारणसाधनभूतं साग्निकमग्निसाक्षिपूर्वकम्।; so also Ck.t. ❀ —d) Ñ1 V1 प्रगृह्य (for प्रणम्य). Ś V3 D2–4.8.12 च; Ñ1 V1 B2 D1.6.7.10.11 T4 M3 तं; D5.9 om. (for स). Ñ1 D1 ब्रह्मसुतो (for ब्रह्मसुतं). B व्यसर्जयत्; M5 ययौ पुरं (for गृहं ययौ).

19 V3 om. 19. —a) Ś V1 D2.5.8.9.12 G2 M1.3.5 [अ]भि-; T4 [अ]थ; Cg.k.t as in text (for [अ]पि). D6 संयुक्तो; D7.10.11 T3 Ct संत्यक्तो; T1.2 G M1.2.4.5.7.9.10 संपूज्य; M6 संत्यज्य; M8 संप्राप्तो (for संगम्य). ❀ Cg.k : पुलस्त्येनेति। अपि(Ck °नापीत्यपि)नार्जुनेनापीति समुच्चीयते।; Ct : पुलस्त्येनापि संत्यक्तो गच्छ लङ्कामित्यनुज्ञातः। अपिनार्जुनेनापि त्यक्तो बन्धनान्मुक्तः. ❀ —b) Ś D8.12 सु(D8.12 स) रोषणः; Ñ V1 B D1–4.9 T4 M6 स(B2 सु) रावणः (for प्रतापवान्). D5 राक्षसेंद्रमुपागतः. —c) Ñ2 B3 D6.7.10.11 M10 परिष्वक्तः; B2 परियुज्य; B4 T1.2 G2.3 M1.5 परिष्वज्य (for परिष्वङ्ग-). ❀ Cg.k.t : कृतातिथ्य इति(Ct °थ्यः)। अर्जुनेनेति शेषः. ❀ —d) B1 [ऽ]वसर्जितः; B4 D7.10.11 विनिर्जितः (for विसर्जितः).

20 b) V1 D6.7.10.11 T1–3 G M1.3.5.8–10 -पुंगवः (for -सत्तमः). —c) Ñ2 B D1.3.4 M6 मोक्षयित्वा (for मोचयित्वा). —d) Ś Ñ V1.3 B D T3 ह; T4 हि (for सः).

21 a) D3.5 om. स (subm). Ś D1–5.8.12 T4 प्राप्य (for प्राप्तः). —b) Ś Ñ1 V1.3 D1–3(m.).4.5.7–12 T4 M3.6 प्रधर्षणं(Ś3 V3 °णां; Ñ1 °णात्); B4 D6 T2.3 G2.3 M1.2.4.7.8.10 तु(T3 च) धर्षणं (for तु धर्षणाम्). M5 कार्तवीर्येण धर्षणं. —c) T4 राम; G1 चैव (for चापि). —d) D3 मुनेर्; M2.4.7.8 विनिर्-; M5 नृपान् (for पुनर्). Ś1.2 Ñ1 D1.3.4.8 अवाप्नुयात्; Ś3 D12 अवाप ह(D12 हि) (for अवाप्तवान्). D6.7.10.11 पुनर्मुक्तो महाबलः. ❀ Cv : विनिर्मोक्षमवाप्तवानिति पाठः. ❀

22 b) V1 T4 राघवसत्तम. D1.3.4 पृथिव्यां संति राघव. —c) D3 तावत्सा; T4 नावज्ञाम् (for नावज्ञा). Ñ1 D1.3.4 तु परे; Ñ2 V3 B D10.11 हि परे; V1 T4 अ(V1 त्व)परे; D6.7 [अ]पि परे; G2 M10 रिपवे; G3 परितः; M6 [अ]खिले (for परतः). Ś D2.8.9.12 नावज्ञां तु(Ś1 °ज्ञानं) परे कुर्याद्; D5 अज्ञानां परे कुर्याद् (sic). —d) Ś3 Ñ2 B1.3.4 D1.3.4.12 T3.4 M3.7.9 यदीच्छेच्; G2 M10 इच्छेच्चेच्; M4 यदि चेच्; G (ed.) यदीच्छेः (for य इच्छेच्). Ñ2 B1 D2.5.7 G1 श्रेयम्; D1.3.4 जयम्; K (ed.) प्रियम् (for श्रेय). ❀ Ct : यः श्रेय इच्छेत्तेन परे परस्मिन्नवज्ञा न कार्या. ❀

23 a) Ś1 D8 पिशिताशितानां; D1 पिशिताशताभां (sic). —b) G2 उपतुल्य-; M1 प्रतिलभ्य (for उपलभ्य). M3–8 मैत्रं (for मैत्रीम्). Ś Ñ1 V1.3 D1–5.8.9.12 सहस्रबाहुं परिर(Ñ1 V1 D1.3.4 प्रतिल)भ्य मित्रं; Ñ2 B सहस्रबाहुं समवेक्ष्य मित्रं(Ñ2 धार्मिकं). —c) B3 D6.7.10.11 T4 नृपाणां (for नराणां). —V3 lacuna for d. —d) B2 D5 om. (hapl.) चचार. Ñ1 B4 D9 स (for च). M4 दर्पवान् (for दर्पात्).

Colophon. —*Kāṇḍa name* : Ś1 V3 D2.5.9 M7 om. —*Sarga name* : Ś Ñ V1.3 B D5.8 रावणमोक्षः(Ñ1 °क्षं; B3 °क्षणं); Ś2.3 D1–4.9.12 सहस्रार्जुनबद्ध(D1.4 °युद्ध) रावणमोक्षः(D1.3.4 °क्षणं). —*Sarga no.* (figures, words or both) : Ś Ñ1 V3 B1–3 D2 om.; Ñ2 B4 D1.3–5 M6 22; V1 18; D8.9 T4 21; D12 20; T3 38. —After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

३४

अर्जुनेन विमुक्तस्तु रावणो राक्षसाधिपः ।
चचार पृथिवीं सर्वामनिर्विण्णस्तथा कृतः ॥ १
राक्षसं वा मनुष्यं वा शृणुते यं बलाधिकम् ।
रावणस्तं समासाद्य युद्धे ह्वयति दर्पितः ॥ २
ततः कदाचित्किष्किन्धां नगरीं वालिपालिताम् ।
गत्वाह्वयति युद्धाय वालिनं हेममालिनम् ॥ ३
ततस्तं वानरामात्यस्तारस्तारापिता प्रभुः ।
उवाच रावणं वाक्यं युद्धप्रेप्सुमुपागतम् ॥ ४
राक्षसेन्द्र गतो वाली यस्ते प्रतिबलो भवेत् ।
नान्यः प्रमुखतः स्थातुं तव शक्तः प्लवंगमः ॥ ५
चतुर्भ्योऽपि समुद्रेभ्यः संध्यामन्वास्य रावण ।
इमं मुहूर्तमायाति वाली तिष्ठ मुहूर्तकम् ॥ ६
एतानस्थिचयान्पश्य य एते शङ्खपाण्डुराः ।
युद्धार्थिनामिमे राजन्वानराधिपतेजसा ॥ ७
यद्वामृतरसः पीतस्त्वया रावण राक्षस ।
तथा वालिनमासाद्य तदन्तं तव जीवितम् ॥ ८

G. 7. 23. 8
B. 7. 34. 8
L. 7. 22. 8

34

☞ V3 missing for Sarga 34 (cf. v.l. 7.12.2). Ś Ñ V1.3 B D1–5.8.9.12 T3.4 M6 read Sargas 7.31–34 before Sarga 7.20 (T3 alone repeating them here).

1 ^{a}) M6 [ए]वमुक्तस्. —^{b}) Ś Ñ1 V1 D1–5.8.12 T4 M1 राक्षसेश्वरः; V3 नाम वीर्यवान्. —^{c}) Ñ2 B2.3 कृत्स्नाम्. —^{d}) Ś1 D8 अविषण्णस्; B3 अनुद्विग्नस् (for अनिर्विण्णस्). D11 reads तथा कृतः in marg. M3 तदा; Ck as in text (for तथा). V1 D3 T4 युधि; Ck.t as in text (for कृतः). M6 इच्छन्विजयमात्मनः.

2 D1 om. 2. —^{a}) Ñ1 प्लवंगं (for राक्षसं). D10 reads second वा in marg. B3 M6 राक्षसाद्वा(M6 °नां) मनुष्याद्वा(M6 °णां). —^{b}) Ś Ñ1 V1.3 D2–5.8.9.12 T4 यं शृणोति; Ñ2 B श्रुतवान्यं(B2.3 °न्यद्). —^{c}) Ñ2 B4 राक्षसस्तं; B1.3 राक्षसः(B3 °सं) स; B2 स राक्षसः (for रावणस्तं). —^{d}) M6 दारुणः (for दर्पितः). Ś Ñ1 V1.3 D2–5.8.9.12 T4 युद्धायाह्वयते हि तं(Ñ1 D2–5 T4 सः); Ñ2 B M3 G (ed.) युद्धायाह्वयति(G [ed.] °ते) स्म तं (Ñ2 °ति * सः; M3 °तीति सः). ❀ Cg : युद्धे युद्धनिमित्तम् । ह्वयति आह्वयति स्म ।; Ck.t : युद्धे ह्वयति(Ck °यतीति) । युद्धनिमित्तमाह्वयतीत्यर्थः. ❀

3 ^{c}) Ś Ñ1 V1 B D1–5.8.9.12 T4 [आ]ह्वयत. Ś V3 D1–4.8.12 युद्धार्थं. —After 3, B3 ins. :

686* तं च वै वानरं मत्वा बलहीनं स राक्षसः ।

4 ^{a}) Ś1 D6.7.10.11 तु (for तं). Ś1.2 Ñ1 V1.3 D10.11 T1 वानरामात्यास् ; T3 G1 M3 वालिनोमात्यस्. —^{b}) G1 तस्य (for तारस्). Ś1.2 Ñ1 V1.3 D1.2.4.5.8.9 -[अ]धिपः प्रभुः; Ś3 D3.12 T4 M5.6 -[अ]धिपप्रभः; Ñ2 B -[अ]धिपोपमः (for -पिता प्रभुः). —^{c}) D6.7.10.11 वानरो (for रावणं). Ś V1.3 D2.5.8.9.12 T4 वीरो; D1.3.4 राम. —^{d}) D1 समागतं. ❀ Cv : तारस्तारापितेति । अत्र पितृव्यत्वादिसंबन्धविशेषेण तारस्य पितृव्यत्वमवगन्तव्यम् । सर्वत्र सुषेणस्यैव पितृत्वकथनात् ।; Cg.k : वानरामात्यः वालिनोऽमात्यः मन्त्री तार उवाच । तथा तारापिता सुषेणश्चोवाच । प्रभुर्युवराजः सुग्रीवश्चोवाच ।; Ct : तार एकः । तारापिता सुषेणः प्रभुर्युवराजः सुग्रीवश्चोवाच. ❀

5 ^{a}) M6 सो वै (for वाली). —^{b}) Ś D8.12 योसौ; Ñ1 तव (for यस्ते). T1.2 तुल्यः प्र-; T3 G2.3 M1.5.6.8 तुभ्यं प्र-; G1 M3.7.10 त्वत्तः प्र-; Cg.k.t as in text (for ते प्रति-). Ñ1 मृधे (for भवेत्). Ñ2 B यस्तव प्रबलो(Ñ2 B2.3 °वरो) मृधे. ❀ Cg : ते तुभ्यम् । प्रतिबल इति, युद्धं दातुमिति शेषः ।; so also Ck.t. ❀ —^{c}) D6.7.10.11 कोन्यः. —^{d}) B3 पुरंगवः (sic); M5 प्लवंगमात्. —After 5, T1.2 M3 ins. :

687* ऋते वानरशार्दूलाद्वालिनो हेममालिनः ।

6 ^{a}) M6 हि (for ऽपि). Ś Ñ V1.3 B D1–5.8.9.12 T4 चतुर्ष्वपि समुद्रेषु. —^{b}) Ñ1 गत्वा स; D5 अध्यास्त (for अन्वास्य). —D5 om. 6^{c}–7^{b}. —^{c}) B2 D6.7.10.11 T4 G1 M1.6 इदं. Ś V3 D1–4.8.9.12 क्षणमिह(D1.3.4 °व) (for मुहूर्तम्). Ñ1 V1 इदं क्षणमुपायाति. —^{d}) G2 बली (for वाली). ❀ Ct : चतुर्भ्यः समुद्रेभ्यश्चतुर्षु समुद्रेषु । संध्यां सम्यग्ध्येयदेवतां ब्रह्मरूपामन्वास्य ध्यात्वेदं मुहूर्तमस्मिन्मुहूर्ते आयाति. ❀

7 D5 om. 7^{ab} (cf. v.l. 6). M3 om. 7^{b}–8^{c}. —^{b}) B2 यत्र ते (for य एते). B2.4 T1 G M1.3–5.7–10 -पांडराः. —For 7^{ab}, Ś Ñ1 V1.3 D1–4.8.9.12 subst. :

688* पश्यस्यस्थीनि यान्येव महान्ति बलिनामपि ।

[D1.3.4 पश्य हि(D4 तु) (for पश्यसि). V3 परेषां (for महान्ति). Ñ1 V1 D1.3.4 वाप्ये(Ñ1 V1 यान्ये; D4 वाप्ये)तान्यन्येषां (for यान्येव महान्ति).]

—^{c}) Ś Ñ1 V1.3 D1–5.8.9.12 दृश्यंते शंख(Ś2.3 सार्वं; D8.12 शाव)शुद्धानि(D5 °भ्राणि). —^{d}) Ñ1 ताराधिपतितेजसा.

8 M3 om. 8^{abc} (cf. v.l. 7). V3 lacuna for ^{a}. —^{a}) B अद्यामृत-; D1.4.5 यद्यमृतो (for यद्वामृत-). D3

G. 7. 23. 10
B. 7. 34. 10
L. 7. 22. 9

अथवा त्वरसे मर्तुं गच्छ दक्षिणसागरम् ।
वालिनं द्रक्ष्यसे तत्र भूमिष्ठमिव भास्करम् ॥ ९
स तु तारं विनिर्भर्त्स्य रावणो राक्षसेश्वरः ।
पुष्पकं तत्समारुह्य प्रययौ दक्षिणार्णवम् ॥ १०
तत्र हेमगिरिप्रख्यं तरुणार्कनिभाननम् ।
रावणो वालिनं दृष्ट्वा संध्योपासनतत्परम् ॥ ११
पुष्पकादवरुह्याथ रावणोऽञ्जनसंनिभः ।
ग्रहीतुं वालिनं तूर्णं निःशब्दपदमाद्रवत् ॥ १२
यदृच्छयोन्मीलयता वालिनापि स रावणः ।
पापाभिप्रायवान्दृष्टश्चकार न च संभ्रमम् ॥ १३

रसोमृतः (for [अ]मृतरसः). Ś D2.8.9.12 भवे(D2 ताव)-त्पीतोमृतरसस् ; Ñ1 V1 पीतं यद्यमृतरसं. —[b]) Ñ2 त्वयाद्य रजनीचर; B त्वया यद्यपि रावण; T4 त्वया यदि निशाचर. —[c]) D6.7.10.11 T M1 Cg.t तदा; Ck तथा (as in text). Ś Ñ V1.3 B D1–5.8.9.12 तथापि वालिनं(Ś1 D8 रावणं [sic]; D2 बलिनं) प्राप्य. —[d]) V1 न भवेत् ; B1 तदन्तं; T1 M3 दुर्लभं. D12 चैव (for तव). B2 जीवनं. ❀ Cg : यद्वेति । तदा तथापि वालिनमासाद्य तव जीवितं तदन्तं तत्समीपप्राप्तिपर्यन्तमित्यर्थः । ; Ck : यद्वा यद्यपि अमृतरसोऽपि पीतो भवतु तथा तथापि वालिनमासाद्य तव जीवितं तदन्तं तत्समीपप्राप्तिपर्यन्तमित्यर्थः । ; Ct : यद्वेति यद्यप्यर्थे । यद्यप्यमृतरसः पीतो भवति तदा तथापि वालिनमासाद्य तव जीवितं तदन्तं तत्समीपगमनपर्यन्तम्. ❀ —After 8, Ñ V3 B D6.7.10.11 S ins. :

689* पश्येदानीं जगच्चित्रमिह विश्रवसः सुत ।
　　इमं मुहूर्तं तिष्ठस्व दुर्लभं ते भविष्यति ।

[(l. 1) Ñ2 B3 D10.11 इमं (for इह). D6.7 T4 इह बलं तस्य (for जगच्चित्रमिह). Ñ1 V3 B2.4 M6 इदं(V3 इमं) विश्रवसा-(Ñ1 °वआ)त्मज (for the post. half). B1 (with hiatus) जगच्चित्रमिदं पश्य इदानीं विश्रवात्मज. —(l. 2) Ñ V3 D10.11 T4 M4–7 इदं (for इमं). Ñ B1–3 M6 पश्याद्य; B4 पश्चात्तु; G (ed.) संप्राप्य (for तिष्ठस्व). M1 तव जीवितं (for ते भविष्यति).]

—After 8, D3 reads erroneously 42[c]–44, repeating 42[cd] in its proper place.

9 [a]) D2.8 गंतुं; D5 कर्तुं; D12 सर्तुं. —[b]) Ñ2 B M6 याहि. Ś Ñ1 V1.3 D1–4.8.9.12 T4 दक्षिणं गच्छ (for गच्छ दक्षिण-). —B4 om. 9[cd]. —[c]) G1 प्रेक्ष्यसे; M2.4.5.7.9 प्रेक्षसे; M8 द्रक्ष्यते (for द्रक्ष्यसे). Ś V1.3 D1–5.8.9.12 T4 ह(D1.4.5 अ)रिं द्रक्ष्यसि तत्र त्वं (D9 T4 °त्रस्थं). —[d]) Ś V3 D1–5.8.9.12 T3 G1.3 M2–9 भूमिस्थम्(G3 °स्थ). V3 D6.7.10.11 पावकं (for भास्करम्).

10 [a]) Ś Ñ V1.3 B1 D1.3–5.8.9.12 T4 स तं; M6 ततस्; Cg.k as in text (for स तु). D2 तु (for वि-). ❀ Cg : तारं तारादीन् । यद्वा पूर्वं तार एवोक्तवान् । तस्य तारापितृत्वं संबन्धविशेषात् । ; Ck.t तारं तारादीनित्यर्थः. ❀ —[b]) Ñ B2.4 M2.4.5.7 राक्षसाधिपः; D6.7.10.11 लोकरावणः. —[c]) Ś V1 D2.3.8.9.12 T4 तु; V3 स; D1.4.5 च; M4.9 तं (for तत्). Ñ B ततः पुष्पकमारुह्य. —[d]) T4 प्रयातो. G2 M10 दक्षिणां दिशं.

11 [a]) Ś D2.3.8.9.12 -गिरिं प्राप्य; B3 -गिरिसंख्यं. —[b]) V3 -समप्रभं (for -निभाननम्). —[c]) M1 बलिनं (for वालिनं). D5 प्रेक्ष्य. B1 [ऽ]पश्यत हरिं (for वालिनं दृष्ट्वा). Ś Ñ V1.3 B2–4 D1–4.8.9.12 T3.4 वालिनं रावणोपश्यत् (D2 °णः पश्यन्; T3 °णो दृष्ट्वा). —[d]) D3 -तर्पणं (for -तत्परम्).

12 Ñ2 B read 12 (along with 690*) after 692*. D11 reads 12 twice. —[a]) Ś Ñ1 V1.3 D1–5.8.9.12 T1.2 G2.3 M6.10 [आ]शु (for [अ]थ). —[b]) Ñ2 B3.4 -सप्रभः (for -संनिभः). —[c]) Ñ2 B पश्चाद् (for तूर्णं). —[d]) Ñ2 B अशब्द-; G (ed.) अशब्दः. M2.4.7.9 Ck -पदः; Cg.t as in text (for -पदम्). Ś Ñ1 V1 D2.3.8.12 T3.4 M5 आव्रजत् ; Ñ2 D5.9–11 (both times) T2 अव्रजत्; V3 B1.4 M8 अद्रवत् ; B2 om. (for आद्रवत्). D6.7 निःशब्देन पदाव्रजत्. ❀ Cv : तत्रेत्यादावेको वालिशब्दो यौगिकः. ❀ Cg : निःशब्दपदं निःशब्दचरणविन्यासम् । ; Ck : निःशब्दपदः निःशब्दं यथा तथा पदं पदविक्षेपो यस्य स तथा । ; Ct : निःशब्दपदं निःशब्दः पदविक्षेपो यस्यां क्रियायां तथा. ❀ —After 12, Ñ2 B ins.; Ñ1 cont. after 692*; V1 ins. after 14 :

690* विज्ञातं वालिना तस्य तच्च पापविचेष्टितम् ।
　　असंभ्रममतिश्चासौ चिन्तयामास राघव ।

[(l. 1) Ñ1 V1 तच्चैवाप(V1 °च पापं)चिकीर्षितं (for the post. half). —(l. 2) Ñ1 V1 -गतश्, B1.3 -मनाश् (for -मतिश्).]

13 [a]) D6.7.10.11 तदा दृष्टो; G2 M6.8.10 [उ]न्मीलितया(M6 °तेन) (for [उ]न्मीलयता). Ś D3.8.12 पश्चादुन्मी(Ś1 D2.8.12 °त्संमी)लितदृशा; Ñ1 V1.3 B2 D1.2.4.5.9 T3.4 M5 यदृच्छोन्मीलितदृशा(V3 °तं दृष्टो). —[b]) Ś D2.3.8.9.12 स च; Ñ1 V1.3 D1.4.5 M5 [अ]थ सः; B1 वै स (for [अ]पि स). —After 13[ab], M6 ins. :

691* दृष्टो जिघृक्षुः संलीनस्तस्य पापस्य दुर्मतेः ।

—Ś D3.8.12 om. 13[c]–14[b]. —[c]) D5 दुष्ट- (for पाप-). Ñ1 -[अ]भिप्रायको (for °वान्). Ñ2 B आयातो(Ñ2 आगच्छन्)लक्षितो दूराच्; V3 D6.7.10.11 G3 पापाभिप्रायकं दृष्ट्वा(G3 °दृष्टिः स). —[d]) Ñ1 B1.3.4 D1.4.9 T4 च

शशमालक्ष्य सिंहो वा पन्नगं गरुडो यथा ।
न चिन्तयति तं वाली रावणं पापनिश्चयम् ॥ १४
18 M6 om. 18. —a) D2 यच् (for तच्). Ś Ñ1

५०

तथा संचोदितः सूतो लक्ष्मणेन महात्मना ।
तद्वाक्यमृषिणा प्रोक्तं व्याहर्तुमुपचक्रमे ॥ १
पुरा नाम्ना हि दुर्वासा अत्रेः पुत्रो महामुनिः ।
वसिष्ठस्याश्रमे पुण्ये स वार्षिक्यमुवास ह ॥ २

तमाश्रमं महातेजाः पिता ते सुमहायशाः ।
पुरोधसं महात्मानं दिदृक्षुरगमत्स्वयम् ॥ ३
स दृष्ट्वा सूर्यसंकाशं ज्वलन्तमिव तेजसा ।
उपविष्टं वसिष्ठस्य सव्ये पार्श्वे महामुनिम् ।
तौ मुनी तापसश्रेष्ठौ विनीतस्त्वभ्यवादयत् ॥ ४ G. 7. 53. 5 B. 7. 51. 5 L. 7. 53. 5

V1.3 D1–5.8.9.12 T3.4 व्याहृतं(T3.4 मंत्रिणो) वाक्यं; Ñ2 वचनं तस्य (for भाषितं तस्य). —^{b}) Ñ1 -[अ]र्थमिदं (for -[अ]र्थपदं). Ś D5.8.12 -पदाक्षरं; Cg.k.t as in text (for -पदं महत्). —^{c}) Ś Ñ V1.3 D1–5.8.9.12 T3.4 ब्रूहि; D7 M3 सत्यं (for तथ्यं). Ñ2 [इ]त्युवाच (for ब्रूहीति). —^{d}) Ś D5.8.12 वाक्यमुवाच ह; D6.7.10.11 (marg.) तं वाक्यमब्रवीत् ; T1.2 G3 M3 वाक्यविदब्रवीत् (for वाक्यमथाब्रवीत्). Ñ1 V1.3 D1–4.9 T3.4 उवाचा(V3 कथया)व(D9 °त्म)हितस्तदा (T3.4 °था); Ñ2 उवाच तं **** (illeg.). —For 18, V2 B subst.; while G (ed.) subst. only l. 2 for 18^{cd} :

920* इति संश्रुत्य तद्वाक्यं सारथिं परवीरहा ।
उवाच कथयस्वेति सुमन्त्रं वाक्यकोविदम् ।

[(l. 1) B2.4 सारथे: (for °थिं). —(l. 2) V2 B3 मंत्र- (for वाक्य-).]

Colophon : V1 D2.9 T3.4 om. —*Kāṇḍa name* : Ś1 om. —*Sarga name* : Ś Ñ1 V3 D1.3–5.12 लक्ष्मणसंता(Ś3 °न्त्री)पः; Ñ2 लक्ष्मणसमाश्वासनं; V2 B1.2.4 लक्ष्मणाश्वासनं (V2 °नः); B3 लक्ष्मणाभ्यागमनं; D8 लक्ष्मणसुमन्त्रयोर्वाक्यं. —*Sarga no.* (figures, words or both): Ś Ñ1 V2.3 B2–4 D12 om.; Ñ2 54; B1 53; D1.4–7.10 T1.2 G M1–5.7–10 50; D8 51; M6 48. —After colophon, G M1.5.8 conclude with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

50

V1 D2.9 T3.4 cont. the previous Sarga.

1 ^{a}) Ś Ñ2 V2 B D5.6.8.12 M2–4.6.7 ततः; G2 तदा; Cg.k.t as in text (for तथा). Ś D8 तेनोदितः; V3 [अ]थ चोदितो; D2.5.9.12 संनोदितः; G (ed.) प्रचोदितः (for संचोदितः). V3 यंता (for सूतो). —Ñ2 illeg. for ^{a}. —^{c}) V3 B4 यद् (for तद्). V2 B1 मुनिना (for ऋषिणा). —^{d}) Ñ2 M5 आख्यातुम् (for व्याहर्तुम्). —For 1^{cd}, Ś D5.8.12 subst. :

921* तद्वाक्यं श्रावयामास लक्ष्मणाय महात्मने ।

2 ^{a}) T1.2 G3 M3 transp. नाम्ना and हि. Ñ1 दुर्वासा नाम विप्रर्षिर् ; Ñ2 V2 B (all with hiatus) दुर्वासा हि पुरा सौम्य; V1.3 D5 T3.4 दुर्वासा नामात्रिसुतः; D1.3.4 अत्रिपुत्रः पुरा नाम्ना; D2.9 सुतोऽत्रेर्नाम दुर्वासाः. —^{b}) V1.3 D2.5.9 T3.4 पूर्वमासीन् ; D1.3.4 दुर्वासाः स (for अत्रेः पुत्रो). Ś D8.12 महानृषिः; Ñ V2 B महातपाः; D6 G1.2 M1.2.4–10 महात्मनः (for महामुनिः). —^{c}) Ś Ñ V B D1–5.8.9.12 T3.4 M6 [आ]श्रमपदे; M2.7 [आ]श्रमेऽरण्ये (for [आ]श्रमे पुण्ये). —Ś1 reads 2^{d} in marg. —^{d}) Ś1 D6.7.10.11 M10 वार्षिक्यं सम्- ; Ś2.3 D8 वसिष्ठं सम्- ; Ñ1 V1.3 D1–5.9 T3.4 वर्षावासम् ; Ñ2 V2 B M6 वर्षारात्रम् ; D12 व *** म् ; G1 वार्षिकात्तत्; Cm.g.k.t as in text (for स वार्षिक्यम्). Ś2.3 D8.12 उपागमत् ; Ñ2 V2.3 B D1.3–5 M6 उपात्रसत्(B °विशत् ; D5 °गतः); M8 उपासत (for उवास ह).

3 ^{a}) B1–3 तस्य (for तम्). Ś D1.3.5.8.12 महाराज; Ñ1 V1 D2.9 T3.4 M6 महाराजः(T4 °**); Ñ2 V2(also in marg.).3 B1–3 D4 महाबाहो(V3 °बाहुः ; D4 °शंका [corrupt]) (for महातेजाः). —^{b}) Ś Ñ2 D8.12 तु (for सु-). V1 (marg. also as in text) -महातपाः (for -महायशाः). B4 पिता तव नराधिपः. —^{c}) D6.7.10.11 पुरोहितं (for पुरोधसं). —Ś1 reads 3^{d}–4^{b} in marg. —^{d}) Ś2.3 D8.12 मित्रावरुणसंभवं. —After 3, Ś2.3 D8.12 ins. ; while Ś1 ins. after 4^{ab} (first occurrence) :

922* तं मुनिं तपसा युक्तं विनीतस्त्वभ्यवादयत् ।

4 Ś1 repeats 4^{ab} (first occurrence in marg.) consecutively. —^{a}) Ś1(second time) 2.3 Ñ1 V1.3 D1–4.8.9.12 T3.4 सोपश्यत् (for स दृष्ट्वा). V2 (marg. also as in text) B4 स ददर्श महात्मानं. —After 4^{ab} (first occurrence), Ś1 ins. 922*. —Ś D8.12 repeat 4^{cd} (var.) after 9. —^{c}) Ś D8.12 (all second time) उपविष्टो (for उपविष्टं). —^{d}) Ś2 (first time) V2 B4 D6.7.9–11 T1.3.4 सव्यपार्श्वे; Ñ2 B1 M6 पार्श्वे सव्ये(by transp.); V3 D2 मध्ये(D2 मध्य) पार्श्वे; B2 वामपार्श्वे; D5 पार्श्वे तस्य. Ś D8.12 (all second time) G2 महामुनिः; B1 D5 महात्मनः; B4 G1 महामुने:; Cm.k.t as in text (for महामुनिम्). ❀ Cm : महामुनिं दुर्वाससम् । ; Ck : महामुनिं दुर्वाससं च दृष्ट्वेत्यर्थः । ; so also Ct. ❀ —After 4^{cd}, Ś2.3

G. 7. 53. 6
B. 7. 51. 5
L. 7. 53. 6

स ताभ्यां पूजितो राजा स्वागतेनासनेन च ।
पाद्येन फलमूलैश्च सोऽप्यास्ते मुनिभिः सह ॥ ५
तेषां तत्रोपविष्टानां तास्ताः सुमधुराः कथाः ।
बभूवुः परमर्षीणां मध्यादित्यगतेऽहनि ॥ ६
ततः कथायां कस्यांचित्प्राञ्जलिः प्रग्रहो नृपः ।
उवाच तं महात्मानमत्रेः पुत्रं तपोधनम् ॥ ७
भगवन्किंप्रमाणेन मम वंशो भविष्यति ।
किमायुश्च हि मे रामः पुत्राश्चान्ये किमायुषः ॥ ८
रामस्य च सुता ये स्युस्तेषामायुः कियद्भवेत् ।
काम्यया भगवन्ब्रूहि वंशस्यास्य गतिं मम ॥ ९
तच्छ्रुत्वा व्याहृतं वाक्यं राज्ञो दशरथस्य तु ।
दुर्वासाः सुमहातेजा व्याहर्तुमुपचक्रमे ॥ १०

Ñ V B D1–5.8.9.12 (Ś2.3 D8.12 after 4^{cd} first occurrence) T3.4 ins. :

923* ततोऽभिवाद्यर्षिवरं मित्रावरुणसंभवम् ।

[Ś2.3 D8.12 [ऋ]षिवरौ; B4 D2.9 तमृषिं (for [ऋ]षिवरं). Ñ2 V2.3 B1–3 D5 सोभिवाद्य महात्मानं (V3 मुनिं तत्र; B2 [m.] महामुनिं) (for the prior half). B1 -वरुणि- (for -वरुण-). Ś2.3 D8.12 -संभवौ; D9 -संनिधौ (for -संभवम्).]

—^{e}) Ñ V B D1–5.8.9.12 T3.4 तं मुनिं (for तौ मुनी). Ś Ñ V B D1–5.8.9.12 T3.4 तपसा युक्तम् (Ś D8.12 °क्तावू); M1 तपसि श्रेष्ठौ; M5 पार्थिवश्रेष्ठो (for तापसश्रेष्ठौ). —^{f}) Ś Ñ V1.2 B D1–4.8.9.12 T3.4 अभिगम्य; D6.7 विनीतोपि (D7 °तः सो); D10.11 विनीतावू (for विनीतस्तु). Ś B1.3 T4 [अ]भिवादयत्; G (ed.) [अ]भ्यभाषत (for [अ]भ्यवादयत्). V3 अभिवाद्याभिगम्य च.

5 ^{a}) Ñ1 V3 D2.3.9 T3.4 ताभ्यां सं-; V1 D1.4 ताभ्यां स (by transp.) (for स ताभ्यां). —^{b}) M6 महायशाः (for [आ]सनेन च). —^{c}) Ś D8.12 M6 वन्येन; B1 पानेन; B4 हार्देन; D5 वन्यास-; M5 पाद्यैश्च (for पाद्येन). Ś D8 च फलेने (Ś2 °नै) व; Ñ1 V1.3 D1–5.9.12 T3.4 M6 फलमूलेन (for फलमूलैश्च). —B4 reads ^{d} inf. lin. —^{d}) D8 सोवसत् ; D7.10.11 G2 M1.3.10 (all with hiatus) उवास; T1.2 G1.3 M2–5.7 सोप्यास (G3 M4 °सन्; M2.7 °सीत्; M5 °ह) (for सोऽप्यास्ते). Ś D5.8.12 (all except D5 with hiatus) आस्ते (D5 तेन) ताभ्यां नियोजितः; Ñ V1.2 B D1–4.9 T3.4 स तत्रोप (B1.2 तत्र चोप) विवेश ह (D1.3.4 च); V3 तत्रोपास्याविशत्स्वयं. —After 5, D5 ins. :

924* उवाच तं महाबाहुरत्रेः पुत्रमिदं वचः ।

6 ^{a}) T3.4 M2.4 समुप-; M8 ततोप- (for तत्रोप-). —^{b}) M8 ततस् (for तास्ताः). Ś3 D8.12 तु; D1–4 G1 M3 स; M8 ता (for सु-). —Ñ2 illeg. for ^{cd}. —^{c}) Ś B1–3 D8.12 विविधा (B1.2 मधुरा) रम्या; Ñ1 V B4 D1–4.9 T3.4 परमोदाराः; D8 विविधाकाराः; G1 च मुनींद्राणां (for परमर्षीणां). —^{d}) Ś D5.8.12 मध्यंदिन-; B1–3 तदा मध्य-; M5.10 मध्यादित्यं (M10 °त्ये); Cv.m.g.k.t as in text (for मध्यादित्य-). Ś D5.8.12 रवौ (for ऽहनि). V3 मध्यादित्यगतेन हि; D2–4 मध्यादित्यागतेहनि.

7 ^{a}) V3 तथा (for ततः). —^{b}) D3.5 सांजलिः (for प्राञ्जलिः). Ś D8 T3 प्रश्रयी (T3 °यात्); D5 प्रहसन् (for प्रग्रहो). ❀ Cm.k.t: प्रग्रह ऊर्ध्वबाहुः ।; Cg: प्रग्रहः सविनय इत्यर्थः. ❀ —^{c}) D2.9 महाबाहुर् (for महात्मानम्). —^{d}) V3 T3.4 अत्रि- (for अत्रेः). Ñ1 V B4 D1–4.9 इदं वचः; Ñ2 B1.3 महौजसं; B2 महायशाः; T4 (also as in text) महामुनिं (for तपोधनम्). —After 7, V3 reads 9^{cd}.

8 ^{a}) Ś Ñ V1.2 B D1–5.8.9.12 M6 -प्रमाणो (D1.3.4 °णं) मे (Ś D5.8.12 वा; M6 वै); Cm.g.k.t as in text (for -प्रमाणेन). —^{b}) Ñ1 V3 वंशशेषो; Ñ2 V1 B D2.9 शेषो (B2 °ष) वंशो; D1.3.4 वंशे शेषं (for मम वंशो). —^{c}) Ś Ñ2 V2 B D5.8.12 भवेद् (for हि मे). T2 कामः (sic); M5 सौम्य; Cm.g.k as in text (for रामः). Ñ1 V1 D1–4.9 T3.4 रामः किमायुः पुत्रो मे (Ñ1 °युश्च भवेत्); V3 रामः किमायुषः पुत्रः; M6 किमायुश्चापि रामस्य. —^{d}) M2.4.5.7.9 [इ]मे (for [अ]न्ये).

9 ^{a}) Ñ1 V1 G1 M1.2.4.5.7–9 तु; T1 (also *inf. lin. pr. m.* as in text).3.4 G2 M3 हि (for च). Ñ1 येषां; V3 D9 M5 के स्युस्; D2 केचित् (for ये स्युस्). —^{b}) B3 अर्थश् (for आयुः). Ñ V B D1–4.9 च किं (for कियद्). Ñ1 V1.3 D1–4.9 मुने (for भवेत्). —V3 reads 9^{cd} after 7. —^{c}) Ś D5.8.12 क्रमशो; Ñ V2 B कामं मे; V1.3 D2.3.9 T4 (also) इच्छया; D1.4 पृच्छतां; D6 का स्थिर्यं; M1.5 तथ्येन (for काम्यया). V1.3 D1–4.9 transp. भगवन् and ब्रूहि. T2 भगवन्ब्रूहि वंशस्य. —^{d}) T2 मा गता च (sic) (for वंशस्यास्य). Ś B1.2 D8.12 गतागतं; Ñ V B3.4 D1–4.9 T4 गतागतिं (B4 °तिः); D5.6 G2 M4.5.8.9 गतिर्मम (for गतिं मम). —After 9, Ś D8.12 repeat 4^{cd} (var.); while Ñ2 V2 B D3 ins. :

925* त्वत्तः श्रोतुमिदं सर्वमिच्छेयं मुनिसत्तम ।

[B2 transp. श्रोतुम् and सर्वम्.]

10 ^{a}) Ś D8.12 [अ]भिहितं (for व्याहृतं). D1 राज्ञ (for वाक्यं). —^{b}) V2 B2 D5 G2 च (for तु). Ś Ñ1 V1.3 D2–4.6.9.12 T3.4 M3.6 राज्ञा दशरथेन च (Ñ1 V1 ह; D2.9 हि; D3.4 M3.6 तु); D1 वाक्यं दशरथेन तु. —^{c}) Ś D8.12 तु; D4 स (for सु-). —After 10, Ś1 D5–7.9–11 S (except M6) ins. a long passage, relegated to App. I (No. 7). —After 10, Ś2.3 Ñ V D1–4.8.12 read 15–16 (including 928*). —After 10, B ins. 928*.

अयोध्यायाः पती रामो दीर्घकालं भविष्यति ।
सुखिनश्च समृद्धाश्च भविष्यन्त्यस्य चानुजाः ॥ ११
कस्मिंश्चित्कारणे त्वां च मैथिलीं च यशस्विनीम् ।
संत्यजिष्यति धर्मात्मा कालेन महता किल ॥ १२
दश वर्षसहस्राणि दश वर्षशतानि च ।
रामो राज्यमुपासित्वा ब्रह्मलोकं गमिष्यति ॥ १३
समृद्धैर्हयमेधैश्च इष्ट्वा परपुरंजयः ।
राजवंशांश्च काकुत्स्थो बहूंन्संस्थापयिष्यति ॥ १४
स सर्वमखिलं राज्ञो वंशस्यास्य गतागतम् ।
आख्याय सुमहातेजास्तूष्णीमासीन्महाद्युतिः ॥ १५
तूष्णीं भूते मुनौ तस्मिन्राजा दशरथस्तदा ।
अभिवाद्य महात्मानौ पुनरायात्पुरोत्तमम् ॥ १६
एतद्वचो मया तत्र मुनिना व्याहृतं पुरा ।
श्रुतं हृदि च निक्षिप्तं नान्यथा तद्भविष्यति ॥ १७

G. 7. 53. 20
B. 7. 51. 25
L. 7. 53. 18

11 Ś1 reads from 11 up to sarga 51 *sec. m.* Before 11, M8 ins. 927*. —ᵃ) Ś B1–3 D3.12 M8 अयोध्याधि- (for अयोध्यायाः). Ñ1 V1.3 B4 D1–4.9 रामः पतिरयोध्यायां (B4 D1 °या). —ᵇ) D5.7 चरिष्यति (for भविष्यति). —After 11ᵃᵇ, T1.2 M8 ins.:

926* तत्र पत्नीवियोगं च दीर्घकालं गमिष्यति ।

—ᶜ) B4 सिद्यनश् (sic); T1.2 G2.3 M1–5.7–10 सुखिताश् (for सुखिनश्). Ñ1 D1.2.4 समृद्धार्था; B4 भविष्यंति (for समृद्धाश्च). —ᵈ) B4 सिद्धार्था तस्य; G1 भवंत्यस्यापि (for भविष्यन्त्यस्य). Ś V2 D5.6.8.10–12 T1 ये(Ś2.3 D8.12 T1 चा)नुगाः; Ñ2 B3.4 D7 येनुजाः; B1 चात्मजाः; B2 चान्वयाः (for चानुजाः).

12 Ś V1 D1.2.4–12 S om. 12. —ᵃ) Ñ2 रामो; D3 भार्यां (for त्वां च). B2 कारणेनैव (for कारणे त्वां च). —ᵇ) Ñ2 लक्ष्मणं मैथिलीं तथा. —ᶜ) D3 संत्यक्ष्यति महातेजा.

13 ᶜ) Ś2.3 D8.12 transp. रामो and राज्यम्. Ñ1 V1.3 B4 D1–4.9 प्रशास्य राघवो राज्यं. —ᵈ) M5 प्रयास्यति; Ck as in text (for गमिष्यति).

14 Ś2.3 D8.12 om. (hapl.) 14. Note hiatus between ᵃ and ᵇ. —ᵃ) V1.3 D1–4.9 T3.4 बहुभिर् (for समृद्धैर्). Ś1 D5–7.10.11 चाश्वमेधैश् (for हयमेधैश्). Ñ1 हयमेधैश्च बहुभिर्. —ᵇ) V3 इज्य (sic) (for इष्ट्वा). Ś1 D5–7.10.11 परमदुर्जयः (for परपुरंजयः). —ᶜ) B4 -वंशं (for -वंशांश्). S1 D5–7.10.11 बहुशो; D1–4 काकुत्स्थ (for काकुत्स्थो). —ᵈ) Ñ V1.3 D1–4.9 T3.4 G1 सु(Ñ1 V3 G1 स)बहून्; B4 ध्रुवं सं- (for बहून्सं-). ❀ Ct : बहूनाजवंशान् । लक्ष्मणादिपुत्रद्वारेति भावः. ❀ —After 14, Ś1 D5–7.10.11 T G M1–7.9.10 ins.; while M8 ins. before 11 :

927* द्वौ पुत्रौ तु भविष्येते सीतायां राघवस्य तु ।

[G1.2 M5.8–10 पुत्रौ च; M6 च पुत्रौ (for पुत्रौ तु). T3.4 ते; G1 हि (for second तु).]

—Thereafter D5 M3 cont. 930*.

15 B4 om. 15–16. Ś2.3 Ñ V D1–4.8.9(after App. I [No. 7]).12 read 15–16 (including 928*) after 10. Ñ2 V2 read 15ᵃᵇ twice. —ᵃ) M2 तत् (for स). Ñ1 V3 (second time) तस्मै तामखिलां; Ñ2 (first time) एतत्सर्वं तदा; V1 सर्वेषामखिलां; V2 (first time) B1–3 सर्वमेतत्त (V2 °वं त; B2 °व त)दा; D1–4.9 स सर्वामखिलां (for स सर्वमखिलं). B1 M6 राज्ञे (for राज्ञो). ❀ Cm : स दुर्वासाः ।; so also Cg.k.t. ❀ —ᵇ) Ś1 D5–7.10.11 [आ]द्य (for [अ]स्य). Ñ V1.2 (Ñ2 V2 second time) D1–4.9 G2.3 M2.4.5.7.8 गतागतिं; V3 विनिश्चयं; M9 [आ]गतागतिं (for गतागतम्). Ñ2 V2(both first time) B1–3 वंशस्यागामिनीं गतिं. —After 15ᵃᵇ (second occurrence), Ñ2 ins. 928*. —ᶜ) Ś3 B1 D1.13 आख्याय स(D1 तु); B3 आख्यायाथ (for आख्याय सु-). —ᵈ) T1.2 G3 M1.5 आस्ते (for आसीत्). Ñ2 महामतिः; M1 महायशाः.

16 B4 om. 16 (cf. v.l. 15). Ś2.3 Ñ V D1–4.8.9 (after App I [No. 7]).12 read 15–16 (with 928*) after 10. —ᵃ) D1–6 तूष्णीभूते. Ś1 D6.7.10.11 T3.4 तदा तस्मिन्; B2 च तस्मिन्वै (for मुनौ तस्मिन्). —ᵇ) Ñ V1.3 D1–4.9 पिता (for राजा). Ś D6.7.10.11 T3.4 मुनौ; V1.3 D1–4.9 तत्र; T2 तथा (for तदा). —ᶜ) Ś Ñ1 V1.3 B1–3 D1–6.8.9.12 T1.2 G1.3 M1.3.6 महात्मानं (for महात्मानौ). —ᵈ) D1.3–5 आगात् (for आयात्). Ñ2 V2 B1–3 स्वकं पुरं; D3 पुरोगमः (for पुरोत्तमम्). —After 16, Ś2.3 Ñ1 V D1–5.8.9.12 ins.; while Ñ2 ins. after 15ᵃᵇ (second occurrence); whereas B ins. after 10 :

928* यत्तु पृच्छसि मां सौम्य वाक्यं ब्रूहीति राघव ।
श्रृणु तत्सर्वमखिलं यदाह भगवानृषिः ।

[(l. 1) Ñ2 यन्मां; V2 यत्त्वं; B1 यत्तु; D2 यतः; D9 यत्तत् (for यत्तु). V3 पश्यसि (for पृच्छसि). Ñ2 V2 B2–4 सौम्य त्वं; V3 मां ब्रूहि; B1 मे सौम्य (for मां सौम्य). V3 शंस (for ब्रूहि). B1 त्वं वाक्यं ब्रूहि राघव (for the post. half). Ś2.3 D5.8.12 यथा पृच्छसि मां तत्त्वमिदं ब्रूहीति(Ś2.3 °हि स) लक्ष्मण. —(l. 2) V2 B1.2 श्रृणु त्वं; D5 एतत्ते (for श्रृणु तत्). Ñ2 V2 B2–4 सावधानस्त्वं(B2.3 °नस्तु); B1 सावधानेन (for सर्वमखिलं). D5 यथा (for यद्). Ñ1 D1–4.9 मुनिः (for ऋषिः). Ñ2 V2 B यदुवाच महामुनिः(Ñ2 °द्युतिः) (for the post. half).]

17 ☞ Ś2.3 D8.12 om. from 17 up to Sarga 51. D3 repeats 17 after 18. D5 repeats con-

G. 7. 53. 21 B. 7. 51. 27 L. 7. 53. 19 एवं गते न संतापं गन्तुमर्हसि राघव ।
सीतार्थे राघवार्थे वा दृढो भव नरोत्तम ॥ १८
तच्छ्रुत्वा व्याहृतं वाक्यं सूतस्य परमाद्भुतम् ।
प्रहर्षमतुलं लेभे साधु साध्विति चाब्रवीत् ॥ १९
तयोः संवदतोरेवं सूतलक्ष्मणयोः पथि ।
अस्तमर्को गतो वासं गोमत्यां तावथोषतुः ॥ २०

इति श्रीरामायणे उत्तरकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

secutively 17 and reads 18 before 17. —[a]) Ñ1 V1 B4 D2.3(first time).9 एता वाचो; V3 तेन वाचो; D1.4 एवं विधाः (for एतद्वचो). D1.4 कथास् (for मया). V2 B1 भद्र (for तत्र). —[b]) Ñ2 V2 B2.3 D3(second time).5(first time) तदा (for पुरा). Ñ1 समुदाहृताः; V1.3 B4 D1.2.3(first time).4.9 समुदीरिताः (for व्याहृतं पुरा). B1 मुनिवाक्यं कृतं तु यत्. —[c]) Ś1 Ñ V B D1.2.3(first time).4.9 श्रुत्वा (for श्रुतं). Ñ1 V1 B3 D3 (second time) च हृदि (by transp.) निक्षिप्ता(B3 D3 °प्तं); V2 B2 M4 हृदि विनिक्षिप्तं; V3 ता हृदि निक्षिप्ता; B1 D6 हृदि च विक्षिप्तं; D1.3(first time).4 तु हृदि निक्षिप्ता; D2.9 च हृदये क्षिप्ता; T1.2 M3 हि हृदि निक्षिप्तं (for हृदि च निक्षिप्तं). —[d]) M3 [अ]न्यसत्; Cm.k.t as in text (for [अ]न्यथा). —After 17, V2 B3.4 ins.:

929* सुखिनश्च भविष्यन्ति सर्वे च पुरवासिनः ।

[B3 ते (for second च).]

—Thereafter they cont.; Ś Ñ V1.3 B1.2 D1–4.6–12 T G M1.2.4–10 ins. after 17; while, D5 M3 cont. after 927*:

930* सीतायाश्च ततः पुत्रावभिषेक्ष्यति राघवः ।
अन्यत्र न त्वयोध्यायां मुनेस्तु वचनं यथा ।

[(l. 1) M3 transp. l. 1 and l. 2. Ñ2 B1–3 D5 M6 नृपः; G2 तथा (for ततः). D5 पुत्रम्; M6 पुत्रान् (for पुत्राव्). B4 पुत्रावस्यास्तु सीतायाः; G (ed.) अस्या पुत्रं च सीताया (for the prior half). —For l. 1, Ñ1 V1.3 D1–4.9 subst.:

930(A)* अस्याश्च पुत्रं सीताया रामः समभिषेक्ष्यति ।

[V3 उ (for च). D9 पुत्रौ (for पुत्रं). V3 तम् (for सम्-).] —(l. 2) Ś1 स; D1.4 तद् (for न). T1.2 G3 अन्यो नास्तीति (for अन्यत्र न तु). Ñ1 त्वया वाच्यं; B1 त्वयोध्यासु (for त्वयोध्यायां). D5 मुहुस् (for मुनेस्). T3.4 च (for तु). Ñ1 V1.3 B4 D1–4.9 तस्य वचो; B1.3 D5 M6 तद्वचनं (for तु वचनं). B2 T1.2 G3 M2.7–9 तथा (for यथा). M3 सत्यमेतन्न संशयः (for the post. half).]

18 D5 reads 18 before 17. —[a]) D1.4 मनो (for गते). —[b]) Ś1 Ñ2 V2.3 B D1–7.9–11 T3.4 कर्तुम् (for गन्तुम्). D1.4 अर्हति. Ñ V1.2 B1.3.4 D1–5.9 M3.6 लक्ष्मण; V3 सुव्रत (for राघव). —[c]) Ñ2 V2 B D5 M6 सीतार्थं (for सीतार्थे). Ñ2 V1.2 B D5 M6 राघवार्थं (for राघवार्थे). Ñ1 D1–4.9 T3.4 M2.4.7.8 च; D5 om. (subm.) (for वा). —B3 om. from नरोत्तम in 18[d] up to लक्ष्म in 20[b]. —After 18, D3 repeats 17.

19 B3 om. 19 (cf. v.l. 18). —[a]) Ś1 D6.7.10.11 G2 M3.10 श्रुत्वा तु (for तच्छ्रुत्वा). B1.2 लक्ष्मणो (for व्याहृतं). D4 om. वाक्यं. —[b]) Ñ1 V1.3 D2.3.5.9 T3.4 M6 सूतेन; D1.4 स तेन (for सूतस्य). —[c]) T3.4 लक्ष्मणो (for अतुलं).

20 B3 om. up to लक्ष्म in[b] (cf. v.l. 18). —[a]) Ś1 D6.7.10.11 T1.2 G3 M3.8 Ck ततः; G1 तयोस्तु (hypm.) (for तयोः). D1.3.4 संभाषतोर् (for संवदतोर्). D1.2 G2 M5.8.9 एव (for एवं). ❀ Ck : तत इति । यतो मुनिना अत्रापि तत इत्यर्थः. ❀ —[b]) Ñ1 मुदा; V1 D2.9 T3 तदा; T4 तथा (for पथि). —[c]) Ś1 D6.7.10.11 G1 M1.6 अस्तमर्के (G1 °र्क्के [sic]); Ñ1 V1 B4 D1–5.9 T3.4 रविरस्तं; T1.2 G3 M3 अर्के चास्तं (for अस्तमर्को). Ś1 Ñ1 V1 B4 D1.6.7.10.11 T1.2 G1.3 M1.3.6 गते; V2 B1–3 ययौ (for गतो). V2 B रात्रिः; M1 देवे (for वासं). Ñ2 अर्कमस्तं ययौ रात्रिः; V3 रवेरस्तंगते राजन्. —[d]) Ś1 Ñ V B1.3.4 D6.7.10.11 T3.4 केशिन्यां; B2 D1–5.9 M6 कौशिक्याम्; M5 गोमत्यास् (for गोमत्यां). Ñ1 V1.3 D1–5.9 एव चक्रतुः; Ñ2 V2 B समवर्तत(V2 °र्तत्; B2 °र्ते); T3 च तयोषतुः; T3.4 तौ प्रचक्रतुः (for तावथोषतुः).

Colophon: Ś2.3 D3.12 om. —*Kāṇḍa name*: Ś1 om. —*Sarga name*: Ñ V B D1–5.9 सूतवाक्यं. —*Sarga no.* (figures, words or both): Ś1 Ñ1 V2.3 B4 D2 om.; Ñ2 55; V1 B2 39; B1.3 D9 54; D1.4–7.10.11 T1.2 G M1.5.7–10 51; D3 52; T3.4 57; M6 49. —After colophon, D2 concludes with रामः; T4 with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

५१

तत्र तां रजनीमुष्य गोमत्यां रघुनन्दनः ।
प्रभाते पुनरुत्थाय लक्ष्मणः प्रययौ तदा ॥ १
ततोऽर्धदिवसे प्राप्ते प्रविवेश महारथः ।
अयोध्यां रत्नसंपूर्णां हृष्टपुष्टजनावृताम् ॥ २
सौमित्रिस्तु परं दैन्यं जगाम सुमहामतिः ।
रामपादौ समासाद्य वक्ष्यामि किमहं गतः ॥ ३
तस्यैवं चिन्तयानस्य भवनं शशिसंनिभम् ।
रामस्य परमोदारं पुरस्तात्समदृश्यत ॥ ४
राज्ञस्तु भवनद्वारि सोऽवतीर्य नरोत्तमः ।
अवाङ्मुखो दीनमनाः प्रविवेशानिवारितः ॥ ५
स दृष्ट्वा राघवं दीनमासीनं परमासने ।
नेत्राभ्यामश्रुपूर्णाभ्यां ददर्शाग्रजमग्रतः ॥ ६
जग्राह चरणौ तस्य लक्ष्मणो दीनचेतनः ।
उवाच दीनया वाचा प्राञ्जलिः सुसमाहितः ॥ ७

G. 7. 54. 7
B. 7. 52. 7
L. 7. 54. 7

51

☞ Ś1 reads Sarga 51 *sec. m.* (cf. v.l. 7.50.11). Ś2.3 D8.12 om. sarga 51 (cf. v.l. 7.50.17).

1 ^{a}) B3 ततस् (for तत्र). Ñ1 V1.3 D1.3.4 तत्र(D1.3.4 तां स) रात्रि(Ñ1 V1 वास)मुषित्वा तु(D3 च); V2 (before corr. as in B4, after corr. m.) तत्र तां रजनीं सुप्तः; B4 उषित्वा तां निशां तत्र; D2.9 तां यामिनीमुषित्वा तु. —^{b}) Ś1 Ñ V1.2 B1.2.4 D6.7.10.11 T3.4 केशिन्यां; V3 D1–5.9 कौशिक्यां; B3 कोशल्यां (for गोमत्यां). ❀ Ck : कैशिकी काचिन्नदी ।; Ct : केशिनी (?) काचिन्नदीति कतकः. ❀ —^{c}) V3 lacuna for पुनरुत्थाय. —^{d}) Ñ V2 B1–3 D1–4.9 स्वां पुरीं; V1 स्वपुरं; V3 B4 तां पुरीं; D5 M6 (both with hiatus) अयोध्यां (for लक्ष्मणः). D5 निर्ययौ. Ñ V B D3 G2 अथ; D4 T2 तथा; G1 पुनः; M2.7 ततः (for तदा).

2 D5 om. 2–3^{b}. —^{a}) D2 -दिवसं; D6 -दिवस- (for -दिवसे). T3.4 काले (for प्राप्ते). ❀ Ck : अर्ध(र्धं)दिवसस्य अर्धदिवसः ।; Ct : दिवसस्यार्धमर्धदिवसम्. ❀ —^{b}) V1 महामनाः (for महारथः). —^{c}) B3 -पूर्णां च (for -संपूर्णां). D6 अथ रत्नसुसंपूर्णां. —^{d}) G2 -पुण्य- (for -पुष्ट-). Ñ1 -[अ]न्वितां; V1 T3.4 M6 -[आ]कुलां; V2 marg.; G1 M10 -[आ]युतां(for -[आ]वृताम्).

3 D5 om. 3^{ab} (cf. v.l. 2). —^{a}) V2 स (for तु). Ñ2 V2(before corr. as in text; after corr. marg.) B1–3 तदा (for परं). —^{b}) M4 damaged for गाम सुम. B2 T1.2 G3 M3.6.9 स (for सु-). B2 -महाद्युतिः; T3.4 °यशाः (for -महामतिः). Ñ1 V1.2(before corr., after corr. m. as in text).3 B4 D1–4.9 आजगाम परंतपः(D1.4 पदे पदे). —^{c}) Ś1 रामपादं. —^{d}) Ñ1 V1.3 B4 D1.3.4.9 त्विति; D2 प्रति; D5 ततः (for गतः). Ñ2 V2(m.) B1–3 किं वक्ष्यामीति चिंतयन्.

4 ^{a}) Ś1 Ñ V3 B2.3 चिंतमानस्य; D9 °यमानस्य (hypm.) (for चिन्तयानस्य). B4 तस्य चिंतयतस्त्वेवं. —^{b}) Ñ1 V1 D2.9 देवसंनिभं; Ñ2 B दिव्यमुत्तमं; V2.3 D1.4 दिव्यसंनिभं; D5 शोभनं पुरः; G (ed.) गिरि° (for शशिसंनिभम्). —^{c}) D1 पुरतोदारम्. —^{d}) Ñ1 V1.3 D1–4.9 अग्रतः (for पुरस्तात्). Ñ1 V1 B1.2 D2 संप्र(B1 सम; B2 प्रत्य)दृश्यते(V1 B2 °त); V3 सम * * * (lacuna) (for समदृश्यत). B4 समदृश्यत दूरतः.

5 ^{a}) Ñ V B D1–4.9 स राज- (V1 °म-); M4 damaged (for राज्ञस्तु). B1 T2 -द्वारे (for -द्वारि). D5 रामस्य भुवने द्वारे. —^{b}) D5 T1.2 G3 M1.3.10 रथोत्तमात्; M6 महारथः (for नरोत्तमः). Ñ V B D1–4.9 T3.4 रथं संत्यज्य लक्ष्मणः. —^{c}) Ś1 अवाङ्मनो. —^{d}) Ñ1 B4 नृपालयं; V1.3 D1–5.9 दिनक्षये; T2 [अ]निवारितं (for [अ]निवारितः). —After 5, D5 ins. :

931* अकृतस्य हि कार्यस्य फलं नोपैति पार्थिवात् ।
लक्ष्मणस्तूपसंगम्य चिन्ताशोकसमन्वितः ।

6 D5 om. (hapl. ?) 6. —^{a}) B1 सं-; G1 तं (for स). Ñ1 V3 D1–4.9 T3.4 तत्रापश्यन्नृपं दीनम्; V1 तत्रापश्यद्दीनमना. —^{b}) V1 नृपं च (for आसीनं). —M4 damaged after पर up to त्रा in ^{c}. —^{d}) G1 [अ]ग्रजमारुतः (for °मग्रतः). Ñ V B D1–4.9 T3.4 M6 दद्दं(T3.4 द्रवं)तमिव मेदिनीं. ❀ Cv : स दृष्ट्वा ददर्शेत्युभयनिर्देशः सामान्यविशेषार्थः । पूर्वं सामान्येन राघवं दृष्ट्वा पुनस्तत्राश्रुपूर्णनेत्रत्वं नाम विशेषं दृष्टवानित्यर्थः ।; Cm.g.k.t : नेत्राभ्यामश्रुपूर्णाभ्यामुपलक्षितमग्रजम् (Ct °मुपलक्षितम्). ❀

7 After 7^{a}, D3.5 ins. :

932*   सुमित्रानन्दवर्धनः ।
राघवस्य महातेजा.

[(l. 2) D5 राघवाय.]

—Ñ2 illeg. for ^{b}. —^{b}) Ñ1 V2.3 B1.3.4 D1.3–5 दीनमान (B1 °चेत)सः (for दीनचेतनः).

—^{c}) Ñ V1 B3 D1–5.9 M6 च(Ñ2 तं; B3 स) महाबाहुः; B1.2 स महातेजाः (for दीनया वाचा). V2.3 B4 स उ(V2 [before corr.] B4 तमु)वाच(V2 [after corr. m.] उवाच स) महाबाहुः. —^{d}) M4 damaged from हितः up to पु in 8^{a}. B3 प्रांजलिर्वाक्यमग्रतः.

G. 7.54.8
B. 7.52.8
L. 7.54.8

आर्यस्याज्ञां पुरस्कृत्य विसृज्य जनकात्मजाम् ।
गङ्गातीरे यथोद्दिष्टे वाल्मीकेराश्रमे शुभे ।
पुनरस्म्यागतो वीर पादमूलमुपासितुम् ॥ ८
मा शुचः पुरुषव्याघ्र कालस्य गतिरीदृशी ।
त्वद्विधा न हि शोचन्ति सत्त्ववन्तो मनस्विनः ॥ ९
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ १०
शक्तस्त्वमात्मनात्मानं विजेतुं मनसैव हि ।
लोकान्सर्वांश्च काकुत्स्थ किं पुनर्दुःखमीदृशम् ॥ ११
नेदृशेषु विमुह्यन्ति त्वद्विधाः पुरुषर्षभाः ।
यदर्थं मैथिली त्यक्ता अपवादभयान्नृप ॥ १२

8 M4 damaged up to पु in ^{a} (cf. v.l. 7). —^{a}) Ś1 नाथस्य (for आर्यस्य). —^{c}) Ñ1 D1.2.4 यथोद्दिष्टं; T3 यथाज्ञा *; T4 यथादिष्टे; M8 °द्दिष्टो (for यथोद्दिष्टे). —^{d}) V2 marg.; K (ed.) शुचौ (for शुभे). Ñ1 V1 B4 आश्रमांतिके; V3 D1-4.9 अनु चा(D2 °तुला)श्रमं (for आश्रमे शुभे). —After 8^{cd}, Ś1 Ñ2 V2 B D6.7.10.11 G (ed.) ins.:

933* तत्र तां च शुभाचारामाश्रमान्ते यशस्विनीम् ।

[B4 ततस् (for तत्र). G (ed.) सु- (for च). V2 B1-3 सुप्र(B3 च शु)भाका(V2 °चा)राम् (for च शुभाचाराम्).]
—V3 lacuna for ^{e}. —^{e}) M2 पुरम् (for पुनर्). Ś1 Ñ2 V1.2 B1.2.4 D5-7.10.11 T1 अपि; G1 चाभि-; G (ed.) अभि- (for अस्मि). —^{f}) B1.2 पादयुग्मम्; D1.3.4 °मूले; D5 M6 तव पादान्(M6 °दम्); Cg as in text (for पादमूलम्). Ñ1 V1.3 D1-4.9 T3.4 तवानघ; Ck,t as in text (for उपासितुम्).

9 ^{a}) D5 मा शोच. —M4 damaged for ^{b}. —V1.3 D1.2.4.9 om. 9^{cd}. —^{c}) V2 B D7 M8 हि न (by transp.); M9 न तु (for न हि). Ñ1 त्वद्विधा हि यशोवंत:; Ñ2 भवद्विधा न शोचंति. —^{d}) Ś1 D10.11 बुद्धिमंतो; Ñ1 D7 सत्यवंतो; D3.5 बल° (for सत्त्ववन्तो).

10 = 2.98.16. D9 om. 10. —^{a}) M6 क्षयांता निचया: सर्वे. —^{c}) Ñ2 B1.2.4 च वियोगांता; V2 च विभागांता (for विप्रयोगान्ता). B3 न संयोगा वियोगांता; T3.4 संयोगो विप्रयोगांतो. —^{d}) T2 damaged for च जीवितम्. Ñ V B1.3 D1-5 T1.3.4 M3 हि (for च). —After 10, Ś1 D5-7.10.11 S ins.:

934* तस्मात्पुत्रेषु दारेषु मित्रेषु च धनेषु च ।
नातिप्रसंगः कर्तव्यो विप्रयोगो हि तैर्ध्रुवम् ।

[(l. 1) M4 damaged for तस्मात्. D5 स्वजनेषु (for च धनेषु). —(l. 2) D6 T2 वै (for तैर्). T1 G3 M1-4.6-9 ध्रुवः (for ध्रुवम्).]

11 ^{a}) D9 शक्त्या (for शक्तस्). D5 तम्; M6 त्वं हि; M8 त्वया (for त्वम्). —T2 damaged from ना up to सै in ^{b}. —^{b}) Ś1 D10.11 T1.3 G M3.5.10 Cg.k.t विनेतुं; Ñ2 V2 निनेतुं; B नियंतुं; M6 जेतुं वै (for विजेतुं). D5 अंजसा (for मनसा). Ś1 Ñ2 V2 B1-3 D6.7.10.11 G1 Cm.t मन:; Ñ1 V3 D1-4.9 नृप; V1 T3.4 पुन:; B4 G2 M8 [आ]त्मन:; Cg as in text (for [ए]व हि). —After 11^{ab}, B2 ins.:

935* ईश्वरस्य वशे लोकाः सर्वे वै सचराचराः ।

—^{c}) Ñ1 V3 D2.3.9 च सर्वान् (by transp.); D5 सर्वान्हि (for सर्वांश्च). —^{d}) Ś1 D6.7.10.11 T3.4 G2 M8.10 Ct शोकम्; D1.4 कार्यम् (for दुःखम्). Ś1 Ñ V B D1-4.6.7.9-11 T3.4 Ct आत्मन:; G2 M8.10 Ck आत्मजं (for ईदृशम्).
❀ Cv: विजेतुमुपेक्षितुं त्यक्तुमिति यावत्. ❀

12 ^{a}) D1-5.9 T3.4 हि; G2 M4.7.10 च (for वि-). T2 M6 विमुह्यंते. —^{b}) Ñ1 D1-5.9 कार्येषु; V1.3 B4 T3.4 स्थानेषु (for त्वद्विधाः). V3 च सुदुर्लभा:; D5 T2 G1 M4.7-10 पुरुषर्षभ (for पुरुषर्षभाः). Ñ2 V2 B1-3 व्यसनेषु नृपोत्तम. —After 12^{ab}, Ś1 V2 B D5-7.10.11 T1.2 G M ins.:

936* अपवादः स किल ते पुनरेष्यति राघव ।

[V2 reads in marg. the prior half. G2 अपचार: (for °वाद:). V2 B2 M6 च न पुरात्(M6 °रे); B1 च पुरात्; B3 च नो पौरात्; D5 च नगरे (for स किल ते). V2 (before corr.) B4 न चापवादो लोकेस्मिन् (for the prior half).]
—Then V2 B1.3.4 D5 cont.; while Ñ V1.3 D1-4.9 T3.4 G (ed.) ins. after 12^{ab}:

937* त्वद्विधाः सत्त्वसम्पन्ना राजवृत्तमबुद्ध्य: ।

[Ñ2 B4 सह-; V3 D5 बुद्धि-; G (ed.) सत्य- (for सत्त्व-). D5 महाबुद्धय एव च (for the post. half).]
—Note hiatus between ^{c} and ^{d}. —^{c}) D5 तदर्थं; G2 M10 यत: सा; Cm.g.k.t as in text (for यदर्थं). —^{d}) B4 T1.2 G2.3 M3 ह्य(G2 स्व)पवाद-. V2 -कृतो भयं; B4 D5 -कृते भये(D5 त्वया); M8 -कृता नृप; Cm.g.k.t as in text (for -भयान्नृप). Ñ V1.3 D1-4.9 T3.4 त्वया सा च(D1.3.4 साधु) मनस्विनी. —For 12^{cd}, B1-3 M6 subst.; while V2 (m.) ins. after 12^{ab}:

938* अपवादकृते त्यक्ता यदर्थं मैथिली त्वया ।

[V2 B1 अपवादश्च ते (for अपवादकृते).]
—Then V2 (marg.) B1-3 M3 cont.; Ś1 Ñ V1.3 D1-7.9-11 T G M1-5.7-10 ins. after 12:

939* सोपवादः पुरे राजन्भविष्यति न संशयः ।

स त्वं पुरुषशार्दूल धैर्येण सुसमाहितः ।
त्यजेमां दुर्बलां बुद्धिं संतापं मा कुरुष्व ह ॥ १३
एवमुक्तस्तु काकुत्स्थो लक्ष्मणेन महात्मना ।
उवाच परया प्रीत्या सौमित्रिं मित्रवत्सलम् ॥ १४
एवमेतन्नरश्रेष्ठ यथा वदसि लक्ष्मण ।
परितोषश्च मे वीर मम कार्यानुशासने ॥ १५
निर्वृतिश्च कृता सौम्य संतापश्च निराकृतः ।
भवद्वाक्यैः सुमधुरैरनुनीतोऽस्मि लक्ष्मण ॥ १६

G. 7. 54. 18
B. 7. 52. 19
L. 7. 54. 17

इति श्रीरामायणे उत्तरकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

[V2 B1-3 जनाद्; G2 पुरो (for पुरे). Ñ V1.3 D2.9 वचनादप(D2 °प्र)वादस्ते; D1.3.4 स च लोकापवादस्ते; T3.4 इतः परं प्रवादस्ते (for the prior half.) D5 च (for न). Ñ V B1.3 D1-4.9 T3.4 transp. भविष्यति and न. Ñ V1.3 D1-4.9 T3.4 मानद; V2 B1-3 D5 M6 ते प्रभो (for संशयः). ❀ Cg: सोऽपवादः पुनः प्रकारान्तरेण भविष्यति । सीतामपवादात्त्यक्त्वा पुनः शोचति । तस्मात्तस्यानतिमात्रोऽयं कामुकस्य रामस्यानुराग इति पुनरप्यपवादो भविष्यतीत्यर्थः ।; Ck: स इत्यादि । सुग्रीवविभीषणाद्यपरिमितलोकैः सर्वैर्देवैः सर्वज्ञैर्ऋषिभिश्च क्रियमाणः, अग्नौ शुद्धां सर्वैर्देवैः प्रत्यक्षत आगत्य शुद्धेत्युक्तां गृहीतां गर्भिणीमपि प्राकृतवद्रामो विसृष्टवानिति योऽपवादः स तत्र देवादिपुरे राजन्भविष्यति नात्र संशयः ।; Ct follows Cg and adds यत्तु कतकेनाग्न्यादिना शुद्धत्वेनोक्तां स्वयं दृष्टशुद्धिं गर्भिणीमपि रामः प्राकृतवद्विसृष्टवानिति पुरे देवादिपुरेऽपवादो भविष्यतीति व्याख्यातम्, तत्तु शोकत्यागानुपपादकतयोपेक्षितम्. ❀]

13 ^{a}) M5 सत्यं (for स त्वं). G2 -शार्दूलो. —^{b}) D2.9 कार्येषु (for धैर्येण). —^{c}) Ñ2 B1-3 त्यजैनां; D1-4.9 T3.4 त्यक्त्वेमां (for त्यजेमां). Ñ V1.3 B1-3 D1-4.9 T3.4 शोकजां (for दुर्बलां). ❀ Ck: इमां बुद्धिमिति । दुष्पीडा नास्य (°डामस्य ?) लोकवादमूलदुःखबुद्धिमित्यर्थः ।; Ct: इमां बुद्धिं शोकबुद्धिं त्यज. ❀ —^{d}) Ñ1 V1.3 D1-4.9 M8 संतापे. M8 न (for मा). G2 हि; G3 च (for ह). Ñ1 V1.3 D1-4.9 मा मनः कृथाः; Ñ2 V2 B1-3 D5 चैव(V2 **) मा कृथाः; B4 M6 मा कृथाः प्रभो(M6 °था नृप) (for मा कुरुष्व ह). —After 13, D3 ins. 941* and then reads the colophon.

14 ^{a}) Ś1 D6.7.10.11 स (for तु). —^{c}) Ñ V B1-3 D1-5.9 T1.2 M3.6.8 परम- (for परया). Ñ2 V2 B1-3 D5 M6 -प्रीतः (for प्रीत्या). —^{d}) Ś1 Ñ B2.3 D2.6.7.10.11 G1.2 M2.4.5.7-10 मित्रवत्सलः.

15 ^{a}) V3 D2.5.9 एव (for एतन्). Ñ1 V1.3 D1-4.9 T3.4 G1 महाबाहो (for नरश्रेष्ठ). —After 15^{ab}, B2.4 ins. 941*; while D2 ins. 942*. —B2.4 D2 om. (hapl.) 15^{c}-16. —^{c}) V1 D1.3-5.9 T3.4 तु (for च). G2 om. मे (subm.). Ñ1 D1.3-5.9 T3.4 सौम्य (for वीर). Ñ2 V2 B1.3 M6 परितुष्टोस्मि(M6 °ष्टिश्च) ते सौम्य; V3 प्रीतिश्च परमा जाता. ❀ Cv: परितोषः श्रद्धा. ❀ —Ñ2 illeg. for ^{d}. —^{d}) Ñ1 तव वाक्यैर्महाद्भुतैः; V1.3 D1.3.4.9 T3.4 वाक्येस्मिन्प(V3 °क्यैश्च प)रमाद्भुते(V3 °तैः); V2 B1.3 M6 वाक्यैरद्भुतदर्शनैः; D5 तव वाक्यमकिल्बिषं. ❀ Cg: कार्यानुशासने गङ्गातीरत्यागरूपे त्वत्कृते. ❀ —After 15, D5 ins.:

940* निवृत्तं मानसं दुःखं मनसः स्थैर्यमागतम् ।
श्रुत्वा तव महाबाहो वाक्यान्युक्तानि सुव्रत ।

16 B2,4 D2 om. 16 (cf. v.l. 15). —^{a}) Ś1 Ñ V B1.3 D1.3-7.10.11 T1.3.4 G2.3 M1.3.5 Cm निवृत्तिश्च. Ś1 Ñ V1.2 B1.3 D1.3-7.10.11 T3.4 M6 Ct [आ]गता वीर(Ś1 D6.7.10.11 Ct सौम्य); V3 समापन्ना (for कृता सौम्य). D9 निर्गतो वीर संतापश्च. ❀ Cg: निर्वृतिः सुखम् ।; Ck: निवृत्तिश्चेति । दुःखबुद्धेरिति शेषः. ❀ —^{b}) D9 च शोकश्च (for संतापश्च). D6 निराकृतः; M8 निवारितः; Cm.t as in text (for निराकृतः). —^{c}) Ś1 Ñ2 D6.10.11 M2.4 सुरुचिरैर् (for सुमधुरैर्). Ñ1 V B1.3 D1.3.4.9 T3.4 त्वद्वाक्यैर्मधुरैरेभिर्. ❀ Cm: हे लक्ष्मण वीर सौम्य लक्ष्मणेत्यत्यादरेण संबोधनादपौनरुक्त्यम् ।; Ct follows Cm. ❀ —After 16, Ñ V3 B1.3 ins.; while B2.4 ins. after 15^{ab} (owing to om.); whereas D3 ins. after 13:

941* इति लक्ष्मणवाक्यमद्भुतं
तच्छ्रुत्वा रघुनन्दनस्तदानीम् ।
प्रकृतिमुपगतः परां च शान्तिं
वचनं चेदमुवाच लक्ष्मणम् ।

[(l. 1) D3 अद्भुतं च (for अद्भुतं). —(l. 3) Ñ2 B1.3 उपागतः (for उप°). D3 स्वप्रकृतिमुपागतः परां च सौम्यां. —(l. 4) B4 इदम् (for चेदम्). V2 B4 लक्ष्मणमिति; D3 लक्ष्मणं प्रति (for लक्ष्मणम्).]

—Then Ñ1 cont.; while V1 D1.3-5.9 T3.4 L (ed.) ins. after 16; whereas D2 ins. after 15^{ab} (owing to om.):

942* जानानश्च गतिं चित्रां द्वंद्वानां च क्षयोदयौ ।

[D1.4 जानीमश्च; D3 जातानां; D5 जनानां (for जानानश्च). D1-5 गतीश्चित्रा (for गतिं चित्रां). V1 दुःखानां (for द्वंद्वानां). D1.4 च क्षयावहौ; D5 च क्षयोदयैः; T3 च क्षयो यथा; L (ed.) पक्षयोर्द्वयोः (for च क्षयोदयौ).]

—Then, D2 cont.; while D9 ins. after colophon:

५२

G. 7. 65. 1
B. 7. 60. 3
L. 7. 64. 1

ततः सुमन्त्रस्त्वागम्य राघवं वाक्यमब्रवीत् ।
एते निवारिता राजन्द्वारि तिष्ठन्ति तापसाः ॥ १
भार्गवं च्यवनं नाम पुरस्कृत्य महर्षयः ।
दर्शनं ते महाराज चोदयन्ति कृतत्वराः ।
प्रीयमाणा नरव्याघ्र यमुनातीरवासिनः ॥ २
तस्य तद्वचनं श्रुत्वा रामः प्रोवाच धर्मवित् ।
प्रवेश्यन्तां महात्मानो भार्गवप्रमुखा द्विजाः ॥ ३
राज्ञस्त्वाज्ञां पुरस्कृत्य द्वाःस्थो मूर्ध्नि कृताञ्जलिः ।
प्रवेशयामास ततस्तापसान्संमतान्बहून् ॥ ४

943* तस्य त्वन्तरमाज्ञाय क्षुधार्त्तस्य द्विजस्य च ।

[D2 त्वं परम् (for त्वन्तरम्). D9 om. (hapl.?) द्विजस्य.]

Colophon: Ñ1 V1 D1.2.4 om.; D3 reads after 941*.—*Sarga name*: V2 B1.3.4 D3 रामाश्वासनं; V3 शोकापनयनः; B2 रामप्रत्याश्वासनं; D5 रामशोकः.—*Sarga no.* (figures, words or both): Ś1 V2.3 om.; Ñ2 B4 56; B1.3 (after corr. *sup. lin.* 54) D9 55; B2 40; D3 53; D6.7.10.11 T1.2 G M1–5.7–10 52; T3.4 58; M6 50.—After colophon, T4 concludes with श्रीरामार्पणमस्तु; G M1.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

52

Before Sarga 52, Ś1(*sec. m.* l. 1–64).2.3 (both om. l. 1–58) Ñ V B D (D8.12 om. from l. 1 up to the prior half of l. 64) S ins. a long passage relegated to App. I (No. 8).

1 Ñ V1.3 B D1–5.9 T3 M6 om.; V2 missing for 1ab.—a) Ś D8.12 द्वाःस्थः प्राह ततो राजन्.—Ś D8.12 om. 1bc. D3 reads 1c–2b twice.—c) D10.11 G2 Ck.t प्रतिहता; M1.3 न वारिता. M8 राज्ञा (for राजन्). Ñ1 V1.3 D2.5.9 T3 ततः प्रणिहिते (T3 °ता) राज्ञा (D2 °ज्ञो; D9 T3 °ज्ञि); Ñ2 V2 B D1.3(second time).4 ततो निवेदितं (Ñ2 V2 B1.2 °ता; B3.4 °ते) राज्ञो (Ñ2 V2 °ज्ञा; B1.2 °ज्ञे; B3.4 °ज्ञि); D3(first time) ततोप्रतिहते राज्ञोः M6 ततः प्रतिहता राज्ञो.—d) Ñ1 द्वारं तिष्ठंत तापसाः.—After 1, B2 ins.:

944* फलमूलाशनाः सर्वे योगीन्द्राः सूर्यवर्चसः ।

2 D3 repeats 2ab (cf. v.l. 1). V2 damaged up to म in b. B3 reads 2c in place of 2a repeating it in its proper place.—a) D2 T1 G M1.4.5 Cg भार्गव-. D2 -च्यवनौ; M6 कांचनं (for च्यवनं). Ñ1 D2.3(first time).9 T3 ते तु; Ñ2 D5–7.10.11 T4 G2 M8.9 चैव; V1 तेत्र; V3 तत्र; B2 D12 राम (for नाम).—b) M4 damaged for पुरस्कृत्य म. Ñ V B D1–3(D3 second time).4.5 महामुनिं; D3(first time) समाहिताः; D9 T3 महामुनीन् (for महर्षयः).—After 2ab (first occurrence), D3 ins.:

945* निवेदयेति नो राज्ञे द्वाःस्थमूचुस्तपस्विनः ।
तापसानां वचः श्रुत्वा द्वाःस्थो बद्धाञ्जलिस्तदा ।
प्रणम्य शिरसा राममिदं वचनमब्रवीत् ।;

while T3 ins. after 2ab:

946* द्वाःस्था न्यवेदयन्राज्ञे आगतानृषिसत्तमान् ।

[Note hiatus between the two halves.]

—c) D1.4.5 च (for ते). Ś D8.12 G2 M6.9 ते दर्शनं (by transp.). T3 महाभाग; G2 M9 Cg.k °राज्ञश्; Ct as in text (for महाराज). Ñ2 V2 B दर्शनं तव राजेंद्र (B1 °जर्षे).—d) Ś D8.12 नोद् (D12 रोच)यंति समाहिताः; Ñ V B D1–5.9 T3 G (ed.) कांक्षंते ते (D1.3.4 T3 °क्ष्यते; D2.9 °तो वै; D5 °ते वै; G [ed.] °ति ते) महर्षयः (V3 तपस्विनः).—e) Ś Ñ1 V1.3 D1–5.8.9.12 M6 त्वरमाणा (for प्रीय°). V1 मुनिव्याघ्र; M9 नरव्याघ्रे (for नरव्याघ्र). Ñ2 V2 B आग (B2 °या)तास्त्वरमाणा हि.—f) V1 (marg. also as in text) -तीरमाश्रिताः (for -तीरवासिनः).

3 D9 om. 3–4b.—a) Ñ2 V2 B1–3 इति; V1.3 B4 D1–5 स तु (for तस्य). T3 राजा द्वाःस्थवचः श्रुत्वा.—b) M4 damaged for मः प्रोवा. Ś D1–5.8.12 T3 सस्मितं; Ñ1 V3 संमतं; V1 सत्तमं; V2 (before corr.) B4 सत्वरं; M6 संमतः (for धर्मवित्). Ñ2 V2 (after corr. m.) B1–3 द्वाःस्थं (Ñ2 रामः) प्रोवाच राघवः.—c) G1 प्रविश्यंतां; M6 प्रविशंतु. Ś B1 D8.12 महाबाहो; D5.10 °भाग; D6.7.11 °भागा (for महात्मानो).—After 3, M6 ins.:

947* सततं पुण्यकर्माणस्तेजोबलसमन्विताः ।
स्वकर्मप्रयताः शान्ताः प्रस्वस्थेन्द्रियचारिणः ।
फलमूलफलाहारा निराहारा निरन्तरम् ।
वाय्वम्बुभक्षिणश्चान्ये सुखमेष्यन्तु मा चिरम् ।

4 Ñ1 V1.3 D1–5.9 T3 om. 4ab (for D9, cf. v.l. 3). V2 damaged for a.—ab) Ś D8.12 M2.7.10 रामस्य (for राज्ञस्तु). T1.2.4 M3 transp. राज्ञस् and द्वाःस्थो. D10.11 मूर्ध्ना (for मूर्ध्नि).—c) Ñ2 D6.7.10.11 तदा (for ततस्). D12 प्रविशंतु ततः सर्वे.—d) M4 damaged for स्तापसान्संम. D12 तापसा. Ś D8.12 M1.6 धर्मचारिणः; D6.7.10.11 सुदुरासदान्; T1.2 M3 धर्मसंहितान् (for संमतान्बहून्). Ñ2 V2 B1–3 जटावल्कलधारिणः; B4 समेतांस्तांस्तु तापसान्.—For 4cd, Ñ1 V1.3 D1–5.9 T3 subst.:

शतं समधिकं तत्र दीप्यमानं स्वतेजसा ।
प्रविष्टं राजभवनं तापसानां महात्मनाम् ॥ ५
ते द्विजाः पूर्णकलशैः सर्वतीर्थाम्बु सत्कृतम् ।
गृहीत्वा फलमूलं च रामस्याभ्याहरन्बहु ॥ ६
प्रतिगृह्य तु तत्सर्वं रामः प्रीतिपुरस्कृतः ।
तीर्थोदकानि सर्वाणि फलानि विविधानि च ॥ ७
उवाच च महाबाहुः सर्वानेव महामुनीन् ।
इमान्यासनमुख्यानि यथार्हमुपविश्यताम् ॥ ८
रामस्य भाषितं श्रुत्वा सर्व एव महर्षयः ।
बृसीषु रुचिराख्यासु निषेदुः काञ्चनीषु ते ॥ ९
उपविष्टानृषींस्तत्र दृष्ट्वा परपुरंजयः ।
प्रयतः प्राञ्जलिर्भूत्वा राघवो वाक्यमब्रवीत् ॥ १०
किमागमनकार्यं वः किं करोमि तपोधनाः ।
आज्ञाप्योऽहं महर्षीणां सर्वकामकरः सुखम् ॥ ११ G. 7. 65. 11 B. 7. 60. 13 L. 7. 64. 11

948* ततः प्रवेशयामास समस्तांस्तांस्तु तापसान् ।

[D1.4 रामस्तांस (for सम°). V1 om. (hapl.) स्तां.—Ñ1 damaged from तापसान् up to सम in 5^{a}. D9 रक्त- (for तांस्तु). D3 T2 तपोधनान् (for तु तापसान्).]

5 Ñ1 damaged up to सम in ^{a} (cf. v.l. 4).—^{a}) Ś D3.8.12 शांतं; Ñ2 B2–4 ते तं; D9 एवं (for शतं). B2 D2 M2 समाधिकं. Ñ1 V1.3 B4 लक्ष्य; D1–5.9 लक्ष्म्या (for तत्र). B1 ते तं सुधार्मिकं प्राप्य; T3 असंख्यातांस्तपोलक्ष्म्या.—^{b}) V1 [आ]दीप्यमानं; D1 T1–3 G1.3 M3.9 दीप्यमानान्. B1 सु- (for स्व-). M1 तापसांस्तेजसावृतान्.—Ñ1 V1.3 D1–5.9 T3 M1.4.5.8.9 om. 5^{cd}.—^{c}) Ś D8.12 T1.2 G प्रविष्टा. M2.6.7.10 राम- (for राज-).—^{d}) Ś D8.12 G2 तापसास्ते महा(G2 °साः संशित)व्रताः; T1.2 G1.3 तापसाः क्षीणकल्मषाः.—For 5^{cd}, Ñ2 V2 B subst. :

949* प्रविश्य राममद्राक्षंस्तापसाः सुसमाहिताः ।

[Ñ2 V2 B1.3 अद्राक्षुस.]

6 ^{a}) Ś D8.12 सं(Ś1.2 स)हिताः; G1 द्विजास्तु (for ते द्विजाः).—^{b}) M4 सर्वे (for सर्व-). D6 M5 संस्कृतैः; D7.10.11 G2 M10 सत्कृतैः; T2.4 संस्कृतं (for सत्कृतम्). Ś Ñ2 B1–3 D8.12 M6 तीर्थेभ्य उ(Ś D8.12 °र्थीयमु)दकं शुचि.—For 6^{ab}, Ñ1 V(V2 mostly damaged) B4 D1–5.9 T3 subst. :

950* ते द्विजाः कलशैस्तोयं नानातीर्थाहृतं शुचि ।

[Ñ1 -तीर्थोद्धृतं; V1 -तीर्थकृतं; V3 D9 -तीर्थहृतं; B4 -तीर्थधृतं (for -तीर्थाहृतं).]

—^{c}) V1 D2.9 तु; B1.2 हि (for च). V2.3 B4 -मूलानि; D8 -मूले च.—^{d}) M4 damaged for रन्बहु. Ñ2 B1.2 [उ]पानयन्; V2 (m.) [उ]पायनं; M5 [आ]हारयन्; M6 [अ]प्याहरन्; Cm.t as in text (for [अ]भ्या°). Ñ1 V (V2 before corr.) B3.4 D1–5.9 T3 L (ed.) रामाय (D2 समये) समुपानय(V2 B3.4 °हर; L [ed.] °वह)न्.

7 ^{a}) Ś D8.12 च तत्सर्वं; Ñ1 V1.3 D1–5.9 T3 महर्षिभ्यः; Ñ2 B ततः सर्वं; V2 (before corr., after corr. m. as in text) T1.2 G2.3 M3.8 महर्षीणां (for तु तत्सर्वं).—^{b}) Ś B3 D8.12 G1 M3.4.6 -पुरस्कृतं; B1 M1 -पुरःसरं; B4 -समाधिना (for -पुरस्कृतः). Ñ1 V1.3 D1–5.9 T3 प्रीतिमान्वै(V1 °मांस्तु) स राघवः.—^{c}) D9 प्रीतियुक्तानि. Ñ1 V1.3 D1–5.9 T3 पुण्यानि (for सर्वाणि).—^{d}) Ś Ñ2 B1–3 D8.12 M6 तथा मूलफलानि च; Ñ1 V1.3 D1–5.9 T3 फलमूल(D9 °* * om. [hapl.])म(T3 °लान्य)थापि च(D5 वा); V2 B4 मूलानि च फलानि च.

8 Ñ1 damaged for ^{a}.—^{a}) Ś1.3 V2 (before corr.) B4 D1.3–5.8.12 T3 M6 स; Ś2 Ñ2 V2 (after corr. m.) B1–3 सु- (for च). Ñ2 V2 (after corr. m.) B1–3 -महातेजाः; V1.2(before corr.).3 B4 D1–5.9 T3 विनीतात्मा (for महाबाहुः).—^{b}) Ñ2 V2 (after corr. m.) B1–3 तपोधनान्; M4 * * मुनीन् (damaged) (for महामुनीन्). Ñ V1.2(before corr.).3 B4 D1–5.9 T3 सर्वांस्तान्द्विज (V B4 D2.9 T3 °नृषि)सत्तमान्.—^{d}) M4 damaged for इमान्यासन.

9 ^{a}) D12 [आ]भाषितं.—^{b}) M1 एते (for एव).—^{c}) D1.3.5 वृशीषु; D2.6.9 बृषीषु; D7.8.12 M2.4.6.7–9 बृसीषु. Ś D12 रुचिरांतासु; Ñ1 V3 B4 D1.3–5 T3 विष्टराग्रा- (B4 °ख्या; T3 °ढ्या)सु; Ñ2 V2 B1–3 D6.9 M6 रुचिराभा (D9 °द्या; M6 °ग्रा)सु; V1 विविधज्ञानाः; D2 विधिवज्जाताः; D8 रुचिरो नाम; M5 मणिचित्रासु; Cv.t as in text (for रुचिराख्यासु).—^{d}) D9 विविशुः (for निषेदुः). B1 T G1 M3.5 कांचनेषु; M6 कांचनासु. Ñ2 V2 B1–3 T1.2.4 G1.3 M3.5 च (for ते). Ñ1 V1.3 B4 D1–5 कांचनीषु(Ñ1 °नासु; D1.5 °नेषु) समाविशन्.—After 9, T2 ins. the line of 5^{ab} as in T3.

10 ^{ab}) M4 damaged for स्तत्र दृष्ट्वा प. Ś Ñ2 V2.3 B D1.3–5.9.12 M6 महाभागान् (for ऋषींस्तत्र). Ñ1 V1 D2 उपविष्टा महात्मानो (for ^{a}).—^{d}) Ñ1 damaged from क्य up to गमन in 11^{a}. Ñ2 रामो वचनम्; V1 (with hiatus) इदं वचनम् (for राघवो वाक्यम्).

11 Ñ1 damaged up to गमन in ^{a} (cf. v.l. 10).—^{a}) Ñ V (V2 before corr., after corr. m. as in text) B4 D1–5.9 T3 -कृत्यं (for -कार्यं). V3 D1.4 च (for वः).—^{b}) Ñ1 V1.3 D2.9 T3 करवाणि; M5 करिष्यामि. Ñ1 V1 D2.6.7.9–11 T1.2.4 G M1–5.7–10 समाहितः; V2

G. 7. 65. 12 B. 7. 60. 14 L. 7. 64. 12

इदं राज्यं च सकलं जीवितं च हृदि स्थितम् ।
सर्वमेतद्द्विजार्थं मे सत्यमेतद्ब्रवीमि वः ॥ १२

तस्य तद्वचनं श्रुत्वा साधुवादो महानभूत् ।
ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ॥ १३

ऊचुश्च ते महात्मानो हर्षेण महतान्विताः ।
उपपन्नं नरश्रेष्ठ तवैव भुवि नान्यतः ॥ १४

बहवः पार्थिवा राजन्नतिक्रान्ता महाबलाः ।
कार्यगौरवमश्रुत्वा प्रतिज्ञां नाभ्यरोचयन् ॥ १५

त्वया पुनर्ब्राह्मणगौरवादियं
कृता प्रतिज्ञा ह्यनवेक्ष्य कारणम् ।
कुरुष्व कर्ता ह्यसि नात्र संशयो
महाभयात्त्रातुमृषींस्त्वमर्हसि ॥ १६

इति श्रीरामायणे उत्तरकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

marg.; V3 समाहितं; T3 किमुच्यतां (for तपोधनाः). ❀ Cv : महर्षय इति संबोधनम्. ❀ V2 (before corr.) B4 सानुजः करवाणि किं. —^{c}) Ś D8.12 य(D12 त)तः सिद्ध्यै; Ñ1 V (V2 before corr., after corr. m. as in text) B4 D1–5.9 तपः(V3 °दा; B4 °तः)सिद्धैः(D5 °द्धिः) (for महर्षीणां). —^{d}) Ñ2 सर्वकार्य-. —M4 damaged from खम् up to इदं in 12^{a}. Ś D8.12 -पुरःसरः; Ñ2 V2 B1–3 -करः सदा; G2 -करः शुभं (for -करः सुखम्). Ñ1 V1.3 D1.2.4.5.9 सर्वदा सर्वदैः(D4 om. [hapl.?]) सुखं (D2 °खैः; D9 °खी); B4 G (ed.) सर्वथा किंकरः सुखं(G [ed.] स्वयं); D3 सर्वदा सर्वदुःसहं. ❀ Cm.g.k.t: किं करोमि किं कुर्याम्। सर्वकामकरः सर्वाभीष्टसाधकः. ❀

12 M4 damaged up to इदं in ^{a} (cf. v.l. 11). —^{a}) V1 B4 D1.3.4 च राज्यं (by transp.); D5 राज्यं तु. —^{b}) B1–3 हृदि सं- (for च हृदि). —^{c}) D5 एव (for एतद्). B1 द्विजानां; T2 द्विजार्थे. D5 वै; T4 मे धर्मे (hypm.) (for मे). —^{d}) Ś1 T2 M1 सर्वम्; M6 सत्येन (for सत्यम्). V3 तद्ब्रवीत महाव्रताः.

13 V2 damaged for ^{ab}. —^{a}) Ñ1 V1 D1–5.9 T3 एतत्तु; V3 एवं च (for तस्य तद्). —M5 om. (hapl.) 13^{b}–15^{c}. —^{b}) B2.3 D6.7.10.11 T G M1.3.8 Cm.g.k.t साधुकारो. —^{c}) M4 damaged for षीणामुग्रत. V2 B4 मुनीनाम् (for ऋषीणाम्). D6 -तपसा. —D11 reads ^{d} in marg. —^{d}) Ñ1 damaged from वासिनाम् up to श्च ते in 14^{a}. D6 -निवासिनां (hypm.) (for -वासि°).

14 M5 om. 14; Ñ1 damaged up to श्च ते in ^{a} (for both, cf. v.l. 13). —^{a}) Ś Ñ2 V1.3 B4 D2.5–12 T3.4 M6 चैव; V2 B1–3 चैनं; D1.3.4 ते तं (for च ते). —^{b}) Ś B1 D8.12 M6 परमान्विताः; B3 महताश्रिताः; D2 [ए]व समन्विताः; D6.7.10.11 महता वृताः; D9 च सम°; K (ed.) °तावृताः (for महतान्विताः). Ñ V B2.4 D1.2–5 T3 प्रहर्षेण(D1.4 °णिधान) समन्विताः. —G1 om. 14^{c}–15. V2 damaged for ^{c}. For ^{cd}, cf. 1.18. 2^{ab}. —^{c}) Ś Ñ V1.3 B D1–4.8.9.12 M6 नरव्याघ्र; D5 महाभाग (for नरश्रेष्ठ). —^{d}) Ś B4 D8.12 त्वय्येव; Ñ2 त्वय्येतद्; V2 B1–3 त्वय्यैव (for तवैव). Ñ1 V1.3 D1–5.9 त्वय्ये(Ñ1 V3 °यै)वैत(D5 °यैव त्व)त्कुलोपमं(V1.3 °चितं); T3 त्वय्येतत्त्वत्कुलोचितं; T4 तथैवमपि नान्यतः. ❀ Cm.g.k.t : नान्यतो नान्यस्येत्यर्थः(Cg.t °स्य). ❀

15 M5 om. 15^{abc}; G1 om. 15 (for both, cf. v.l. 13 and 14 respy.). V2 damaged from ^{a} up to नाभ्य in ^{d}. —^{a}) M4 damaged for वः पार्थिवा. —^{b}) Ñ1 V D6 G2.3 नाति-; D5 अप- (for अति-). —^{cd}) D6 T1.2.4 G3 M2–4.7 Cm अज्ञात्वा; D7 M1.10 आज्ञाय; G2 आश्रित्य (for अश्रुत्वा). Ñ2 B D10.11 M6 Cg.t कार्यस्य गौरवं श्र(M6 श्रु)त्वा (for ^{c}). B2 प्रतिष्ठां. Ñ2 B2 नाहरंति ते; V2 B1.3.4 नारु(V2 **)हंति ते; D10 नास्य रोचयन्; T2 नाप्यरो°; T4 नाभ्यचोदयन्; Cm.g.k.t as in text (for °रोचयन्). T3 (with hiatus) अश्रुतं नो महाभाग ईदृशं त्वत्कृतं वचः. —For 15^{cd}, Ś Ñ1 V1.3 D1–5.8.9.12 subst.; while V2 ins. after 15; B2 ins. after 15^{ab}:

951* अश्रुत्वा नाभ्यरोहन्त प्रतिज्ञां कार्यगौरवात् ।

[V2 damaged for the prior half. Ś D8.12 अश्रुता; V1 D5 अश्रुतां; V3 तच्छ्रुत्वा; B2 D1.4 ते श्रुत्वा; D9 अकृत्वा; L (ed.) आश्रुत्वा (for अश्रुत्वा). V3 नाभ्यरोचंत; B2 नेह रोहंते.]

—Then B2 cont. 952*.

16 ^{a}) G2 बहु- (for पुनर्). —^{b}) M4 damaged for ज्ञा ह्यन. M5 [अ]भ्यनुज्ञा (for प्रतिज्ञा). B3 समवेक्ष्य; G1.2 M1.5.10 [अ]प्यन° (for ह्यनवेक्ष्य). —^{c}) D10.11 ततश्च (for कुरुष्व). Ñ2 B1.2 [अ]सि हि न (by transp.); B3 [अ]सि न च (for ह्यसि न). —^{d}) M6 महद्भयात्. G1 समर्हसि (for त्वमर्ह°). —For 16, Ś Ñ1 V B4 D1–5.8.9.12 T3 subst.; while B2 cont. after 951*:

952* त्वया पुनः सत्पुरुषेण दुर्वहं
वचः प्रतिज्ञातमचिन्त्यविक्रम ।
करिष्यसे तच्च तथा न संशयो
मुनीन्भवान्पालयिता महाभयात् ।

[(l. 1) V2 damaged from षेण up to l. 2. B4 सत्पुरुषेषु. Ñ1 V3 D1.2.4.5.9 दुर्वचो; V1 B2 D3 दुर्वचं; B4 दुर्धरं; T3 दुर्लभं (for दुर्वहं). —(l. 2) Ñ1 damaged for तिज्ञातमचिन्त्य. B4 अनंत- (for अचिन्त्य-). Ś1 -विक्रमे; D2.5.8.12 -विक्रमः; D3.4.9 -विक्रमं; T3 -रूपं (for -विक्रम). —(l. 3) V2.3 B4

५३

ब्रुवद्भिरेवमृषिभिः काकुत्स्थो वाक्यमब्रवीत् ।
किं कार्यं ब्रूत भवतां भयं नाशयितास्मि वः ॥ १
तथा वदति काकुत्स्थे भार्गवो वाक्यमब्रवीत् ।
भयं नः शृणु यन्मूलं देशस्य च नरेश्वर ॥ २
पूर्वं कृतयुगे राम दैतेयः सुमहाबलः ।
लोलापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः ॥ ३
ब्रह्मण्यश्च शरण्यश्च बुद्ध्या च परिनिष्ठितः ।
सुरैश्च परमोदारैः प्रीतिस्तस्यातुलाभवत् ॥ ४
स मधुर्वीर्यसम्पन्नो धर्मे च सुसमाहितः ।
बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः ॥ ५
शूलं शूलाद्विनिष्कृष्य महावीर्यं महाप्रभम् ।
ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह ॥ ६ G. 7.66.6 B. 7.61.6 L. 7.65.6

D1.3–5 T3 करिष्यते. Ś D8.12 हि (for च). Ñ1 D9 T3 यथा न संशयो(Ñ1 °यं); V3 न संशयो मुनीस्. ☞ V2 missing from l. 4 up to 57.13. —(l. 4) Ñ1 D2.5.9 मुनींस्ततः; V1 मुनीन्सतः; V3 ततः सदा; B4 मुनीन्भयात् (for मुनीन्भवान्). Ñ1 V1.3 B4 D2.9 पालयतां. V1 B4 महात्मना; D2.5.9 भयात्तदा; D8 महानयात् (for महाभयात्). D1.3.4 T3 महाभयात्त्रातुमूर्षीस्त्वमर्हसि=16^{d}.]

Colophon: —*Sarga name*: Ś1 Ñ V1 B1–3 D6.8.12 ऋषिदर्शनं(Ñ2 °*** [illeg.]); V3 D2.3.9 ऋषिदर्शनः; B4 ऋषिसमागमः; D1.4 ऋषिसंदर्शनः; D5 ऋषिनिदर्शनं. —*Sarga no.* (figures, words or both): Ś Ñ1 V3 D2.5.12 om.; Ñ2 T3 66; V1 46; B1 D9 65; B2 50; B3 63; B4 56; D1.4.8 M6 58; D3 61; D6.7.10.11 T1.2 G M1–5.7–10 60; T4 68. —After colophon, D2 concludes with रामः; T4 with श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः; G M2.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

53

☞ V2 missing for Sarga 53 (cf. v.l. 952*); M8 om. Sarga 53. D12 begins with ॐ. Cv does not comment on the portion from 7.53 up to $7.54.16^{b}$.

1 ^{a}) Ś Ñ1 V1.3 B4 D1–5.8.9.12 ब्रुवत्स्वे(V3 B4 °त्ये) वं तदा तेषु; Ñ2 B1–3 मुनीनां(Ñ2 illeg.) ब्रुवतामेवं; T1.2 G1.3 M1.3 एवं ब्रुवाणेष्वृषिषु. —^{b}) Ñ1 राघवो; D1 काकुत्स्थं (for काकुत्स्थो). —ŚD1.5.8.12 om. (hapl.) 1^{c}–2^{b}. —^{c}) Ñ2 B1–3 भयं (for कार्यं). B3 ब्रूथ; D6.7 T4 G2 M6 ब्रूहि (for ब्रूत). Ñ2 V1.3 B4 D2–4.9–11 T3 मुनयो; D6.7 T4 M6 भगवन् (for भवतां). Ñ1 मुनयो ब्रूत (for ब्रूत भवतां). —^{d}) B1–3 अहं (for भयं). Ñ1V1 यावदु(V1 °द)पैति; Ñ2 B4 D2.9–11 तावदपैतु (for नाशयितास्मि). B1–3 तत्; D7 ते; T1.2 G2.3 M1.3 [अ]हं (for वः).

2 Ś D1.5.8.12 om. 2^{ab} (cf. v.l. 1). —^{a}) Ñ2 B1–3 इति; G2 यथा (for तथा). Ñ V1.3 B D2–4.6.7.9–11 T1.3.4 ब्रुवति (for वदति). —^{c}) D6.7.10.11 T4 Ct भयानां (for भयं नः). —^{d}) Ñ2 illeg.; T4 क्लेशस्य च; Ct as in text (for देशस्य च). Ñ1 च नराधिप; B4 च नरोत्तमः; D2.9 नगरस्य च (for च नरेश्वर).

3 ^{a}) Ś D8.12 पुरा; D1.4.5 पूर्वं (for पूर्वं). B3 कृते (for कृत-). Ñ1 तात; B2 चैव; D1.5–7.10.11 T4 राजन्; G1 वीर (for राम). —G3 damaged for ^{b}. —^{b}) G2 M4.5 दैत्यो यः (for दैतेयः). Ś Ñ V1 B1.2.4 D1–5.8.9.12 T3 M6 सु(D1 M6 तु; D3 स)महानभूत्; D6.7.10.11 T4 G2 M9 सुमहामतिः (for सुमहाबलः). V3 B3 दैतेयस्य(B3 °वतेय) महानभूत्. —G2 om. 3^{c}–5. —^{c}) D6 T4 लोल-; D7 Cm लोदा-; M2.4.5.7.10 गोला-; M9 गोपा-; Cg.k.t as in text (for लोला-). Ś D8.12 श्रेष्ठः कुंभीनसीभर्ता; Ñ1 V1.3 D2.3.5.9 T3 प्रभुः(Ñ1 V3 पुत्रः) परमधर्मात्मा; Ñ2 B हिरण्यकशिपोर्नप्ता; D1.4 प्रभुश्चैव महद्धर्मा; M6 पुत्रः कुंभीनसो ज्येष्ठो. —^{d}) M8 महाबलः (for महासुरः).

4 D9 G2 om. 4 (for G2 cf. v.l. 3). —^{a}) Ñ2 V1 B D1–5 M6 च वदान्यश्च; V3 सत्यवादी (for च शरण्यश्च). Ś D8.12 ब्रह्मज्ञश्च कृतज्ञश्च. —^{b}) D6 बुद्ध्यां. Ñ1 वै (for च). Ñ1 V1.3 B4 D1–5 T3 सुसमाहितः (for परिनिष्ठितः). —^{c}) D6 (m. also) गुणैश्च; T1.2 G3 शूरैश्च; M4 सुतैश्च (for सुरैश्च). —^{d}) V3 B D1.3–5 अस्य; D2 अपि (for तस्य). G1 [अ]धिकाभवत्.

5 G2 om. 5 (cf. v.l. 3). —^{b}) M9 तु (for सु-). Ñ2 T1 G1 M3 धर्मेण सु- (Ñ2 च) (for धर्मे च सु-). B2 (m. also) D1.3–5 T3 परिनिष्ठितः (for सुसमाहितः). Ś1 धर्मं परममास्थवान्; Ś2.3 D8.12 धर्मं च परमास्थवान्; Ñ1 V1.3 D2.9 धर्मेण(V1 धर्मं च) परिनिष्ठितः; B4 वीर्ये * परिनिष्ठितः. —After 5^{ab}, T1.2 M3 ins.:

953* बहुवर्षसहस्राणि रुद्रप्रीत्याकरोत्तपः ।
रुद्रः प्रीतोऽभवत्तस्मै वरं दातुं ययौ च सः ।

[T1 तपस्ततः; T2 [अ]तपत्तपः (for [अ]करोत्तपः).]

—^{c}) Ñ2 B1–3 ततस्तुष्टेन (for बहुमानाच्च). —^{d}) B2 दत्तोस्य च; B4 दत्तो यस्य (for दत्तस्तस्य). Ś D8.12 [अ]-द्भुतोपमः (for [अ]द्भुतो वरः). Ñ1 V1.3 D1–5.9 दत्तोस्य परमो वरः; G3 M1 दत्तोस्यात्यद्भुतो वरः; M6 दत्तं तस्याद्भुतोपमं.

6 V3 om. 6–10^{b}. —^{a}) Ś शूलाच्छूलं; D8 शूलशूलं (for शूलं शूलाद्). V1 D1–4.8.12 विनिः(D8 °नि) कृष्य

G. 7. 66. 7
B. 7. 61. 7
L. 7. 65 7

त्वयायमतुलो धर्मो मत्प्रसादात्कृतः शुभः ।
प्रीत्या परमया युक्तो ददाम्यायुधमुत्तमम् ॥ ७
यावत्सुरैश्च विप्रैश्च न विरुध्येर्महासुर ।
तावच्छूलं तवेदं स्यादन्यथा नाशमाप्नुयात् ॥ ८
यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः ।
तं शूलं भस्मसात्कृत्वा पुनरेष्यति ते करम् ॥ ९
एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः ।
प्रणिपत्य महादेवं वाक्यमेतदुवाच ह ॥ १०
भगवन्मम वंशस्य शूलमेतदनुत्तमम् ।
भवेत्तु सततं देव सुराणामीश्वरो ह्यसि ॥ ११
तं ब्रुवाणं मधुं देवः सर्वभूतपतिः शिवः ।
प्रत्युवाच महादेवो नैतदेवं भविष्यति ॥ १२
मा भूत्ते विफला वाणी मत्प्रसादकृता शुभा ।
भवतः पुत्रमेकं तु शूलमेतद्गमिष्यति ॥ १३

(D_{12} क्रम्य); B_1 G $M_{2.10}$ विनिष्क्र(B_1 °ष्क्रा)म्य; Cm.g.k.t as in text (for विनिष्क्रम्य). —^{b}) D_6 महद्वीर्यं (for महावीर्यं). $\tilde{N}_2$ B G_1 M_2 महाबलं; D_{10} समप्रभं (for महाप्रभम्). —^{c}) D_5 देवो; M_6 दत्त्वा (for ददौ). M_6 मधुं च (for महात्मा). $\tilde{N}_1$ V_1 $D_{1-5.9}$ प्रीतात्मा (for सुप्रीतो). Ś $D_{8.12}$ दत्त्वा स मधुने प्रीतो; T_3 ददौ च तस्मै प्रीतात्मा. —^{d}) Ś $\tilde{N}_2$ B_{1-3} $D_{2.8.9.12}$ $T_{1,2}$ G_3 $M_{1.3.6}$ एतद्; $\tilde{N}_1$ V_1 $D_{1.3-5}$ T_3 चेदम् (for चैतद्).

7 V_3 om. 7 (cf. v.l. 6). G_1 om. (hapl.) 7–10. —^{b}) Ś Ñ V_1 B $D_{1-5.8-12}$ T_3 $M_{3.6}$ प्रसादकरः(M_3 °कृतः). B_1 तव; B_3 कृतः (for शुभः). —^{c}) M_6 ते परया (for परमया). Ś Ñ V_1 B $D_{2.3.5.8.9.12}$ T_3 येन प्रीतस्तवा(D_2 °तश्च चा)रि($\tilde{N}_2$ V_1 B_2 वि)घ्नं; $D_{1.4}$ प्रसन्नोसुरराजेंद्र. —^{d}) B_3 दास्यामि (for ददामि).

8 V_3 G_1 om. 8 (cf. v.l. 6 and 7 respy.). —^{a}) M_3 त्वं (for first च). D_6 reads विप्रैश्च in marg. —^{b}) $T_{1.2}$ M_3 विरुद्धो; G_3 M_7 विरुद्धैर्; M_5 विरुध्येन् ; Ct as in text (for विरुध्येर्). M_1 महाबल (for महासुर). Ś $\tilde{N}_1$ V_1 B_2 $D_{1-5.8.9.12}$ T_3 न विरोधं करिष्यसि($D_{2.3}$ °ति); $\tilde{N}_2$ $B_{1.3}$ विरोधं न करिष्यसि; B_4 विरुध्येश्च भवान्भुवि; T_4 न विरुंधे-र्महासुरः; M_6 न विरुध्यसि मानद. —M_{10} om. (hapl. ?) 8^{c}–10^{b}. —^{c}) Ś Ñ V_1 B $D_{1.3.5.8.9.12}$ तवैतत् ; D_2 तदेतत् (for तवेदं). M_6 transp. शूलं and तवेदं. D_4 तवैतस्य; T_3 (with hiatus) च दैतेय (for तवेदं स्याद्). —^{d}) Ś Ñ V_1 B_{2-4} D T_3 नाशमेष्यति; B_1 नाशयिष्यसि (for नाश-माप्नुयात्).

9 V_3 G_1 M_{10} om. 9 (cf. v.l. 6, 7 and 8 respy.). —^{a}) $T_{1.2}$ G_3 उप- (for अभि-). —^{b}) T_1 G_3 $M_{1.9}$ विगत-ज्वरं. B_4 युद्धे युद्धविशारदः. —For 9^{ab}, Ś Ñ V_1 $D_{1-5.8.9.12}$ T_3 subst. :

954* अभियास्यति यश्च त्वां युधि योद्धुं महासुर ।

[$D_{1.4}$ तथा (for अभि-). $\tilde{N}_2$ त्वां वै (for च त्वां). $\tilde{N}_1$ V_1 युद्धे (for युधि). $D_{3.5}$ transp. युधि and योद्धुं. T_3 योद्धुमिच्छु-र्महासुरः (for the post. half).]

—^{c}) D_1 तत् (for तं). $D_{2.5.9}$ शत्रुं; $D_{6.7.10.11}$ T_{1-3} G_2 $M_{1.2.7.9}$ शूलो (for शूलं). $\tilde{N}_1$ V_1 $D_{1.3.4}$ भस्म कृत्वैव (for भस्मसात्कृत्वा). —^{d}) B_3 नेष्यति (for एष्यति). $\tilde{N}_1$ तं; B_3 तत् (for ते).

10 V_3 M_{10} om. 10^{ab} (cf. v.l. 6 and 8 respy.). G_1 om. 10 (cf. v.l. 7). —^{a}) Ñ V_1 B D_{1-5} शूल($\tilde{N}_2$ B_2 D_5 °लं)वरं; D_9 शूलं वराल् (for रुद्राद्वरं). D_2 लब्धं (for लब्ध्वा). Ś $D_{8.12}$ एवं शूलं समासाद्य; M_6 एवमुक्तस्तु देवेन. —^{b}) V_1 $D_{2.9}$ T_3 सद्य (for भूय). $\tilde{N}_1$ शर्वाद्देवान् ; $\tilde{N}_2$ B स्मयमानो (for भूय एव). —^{c}) M_6 महात्मानं (for °देवं). —^{d}) M_5 चैतद् (for एतद्).

11 D_2 om. 11^{cd}. —^{c}) Ś Ñ $V_{1.3}$ B_{1-3} $D_{1.3-5.8.12}$ T_3 M_6 भवेद्धि; $M_{2.4.7.9.10}$ भवेत (for भवेत्तु). $\tilde{N}_2$ सदनं; T_3 शरणं (for सततं). B_1 (marg. also as in text) तस्य; B_3 चैव (for देव). B_4 भवेदं न परं देव (sic); D_9 भवेत्प्र-हरणं देव. —^{d}) Ś Ñ V_3 B_{2-4} $D_{1.3-6.8.9.12}$ M_6 वराणाम् (for सुराणाम्).

12 ^{a}) Ś $\tilde{N}_2$ $V_{1.3}$ $B_{1.3}$ $D_{8.9.12}$ T_3 ब्रुवाणं तं (by transp.); B_2 D_{1-5} M_6 ब्रुवाणं तु. $\tilde{N}_1$ ब्रुवाणं मधुरं देवः; B_4 तथा ब्रुवाणमसुरं; $T_{1.2}$ G_3 $M_{1.3}$ एवं ब्रुवाणं तं देवः. —^{b}) $\tilde{N}_1$ -देव- (for -भूत-). D_9 -गतिः (for -पतिः). Ś $\tilde{N}_1$ V_1 $D_{1.3-5.8.12}$ भवः; D_2 वचः; T_3 प्रभुः; M_6 हरः (for शिवः). V_3 सर्वभूतेश्वरो हरः. —V_3 om. 12^{cd}. —^{c}) M_4 damaged for च महा. Ś $\tilde{N}_1$ V_1 $D_{1-5.8.12}$ महाभागो(Ś $D_{8.12}$ °ग); $\tilde{N}_2$ B_{2-4} D_9 तदा(B_4 स्वयं) साक्षात्; B_1 ततः सौम्य; $T_{1.2}$ $G_{2.3}$ M_3 महातेजा; M_1 ततो देवो (for महादेवो). —^{d}) D_9 (with hiatus)एतदेव.

13 ^{a}) B_4 नु (for ते). Ś $B_{1.2}$ $D_{8.12}$ transp. भूत् and ते. D_4 विकला; M_2(after corr. as in text).$_9$ विमला (for विफला). —^{b}) $Ś_3$ $B_{1.2}$ $D_{6.8.9}$ T_1 G_2 M_3 मत्प्रसादात्; Cm.g.k.t मत्प्रसाद- (as in text). Ś D_8 -कृतासुर; $\tilde{N}_1$ V_1 $D_{1-5.12}$ -कृता($D_{1.4}$ °ते)मधो(D_{12} प्रभो); B_4 -करी तव; D_9 -कृता विभो (for -कृता शुभा). —^{c}) $\tilde{N}_1$ V_1 $D_{1-5.9}$ भाव्यं वै; B_4 उरसं (for भवतः). $B_{1.2}$ पुत्र एके; D_9 पुत्र एकस् (for पुत्रमेकं). $\tilde{N}_1$ V_1 B_4 $D_{1.2.4.5.9}$ ते; D_3 om. (subm.) (for तु). V_3 भाव्ये वै ते पुत्रपक्षे. —^{d}) $\tilde{N}_2$ D_9 तस्य (for एतद्). Ś Ñ $V_{1.3}$ B D T $G_{2.3}$ $M_{3.6.10}$ भवि-ष्यति(M_3 °ते); K(ed.) भजिष्यते (for गमिष्यति).

यावत्करस्थः शूलोऽयं भविष्यति सुतस्य ते ।
अवध्यः सर्वभूतानां शूलहस्तो भविष्यति ॥ १४
एवं मधुर्वरं लब्ध्वा देवात्सुमहदद्भुतम् ।
भवनं चासुरश्रेष्ठः कारयामास सुप्रभम् ॥ १५
तस्य पत्नी महाभागा प्रिया कुम्भीनसी हि या ।
विश्वावसोरपत्यं सा ह्यनलायां महाप्रभा ॥ १६
तस्याः पुत्रो महावीर्यो लवणो नाम दारुणः ।
बाल्यात्प्रभृति दुष्टात्मा पापान्येव समाचरत् ॥ १७
तं पुत्रं दुर्विनीतं तु दृष्ट्वा दुःखसमन्वितः ।
मधुः स शोकमापेदे न चैनं किंचिदब्रवीत् ॥ १८
स विहाय इमं लोकं प्रविष्टो वरुणालयम् ।
शूलं निवेश्य लवणे वरं तस्मै न्यवेदयत् ॥ १९
स प्रभावेन शूलस्य दौरात्म्येनात्मनस्तथा ।
संतापयति लोकांस्त्रीन्विशेषेण तु तापसान् ॥ २०   G. 7. 65. 20 B. 7. 61. 20 L. 7. 65. 20

14 Ś1 D2 M2 om. (hapl.) 14.—^{a}) Ś2.3 Ñ1 V1.3 B3.4 D1.3–5.8.9.12 T3 M6 करस्थं (for करस्थः). Ś2.3 D8.12 तच्छूलं; Ñ1 V1.3 B3.4 D1.3.4.5.9 T3 M6 शूलं तु (V1 वै; B3.4 हि; D5 ते; T3 मे); M4 damaged (for शूलोऽयं). B1.2 यावच्छूलं करस्थं तु.—^{b}) D9 वै (for ते).—M10 om. 14^{cd}. B3 -देवानां (for -भूतानां).—^{d}) Ś2.3 V1.3 D1.3–5.8.9.12 T3 तावत्स तु; Ñ B1.2.4 तावदेव (B2 °ष); B3 तदेव स (for शूलहस्तो).

15 ^{a}) Ñ1 V1.3 B4 D1–5.9 T3 देववराद्; M3 वरं लेभे (for वरं लब्ध्वा).—Ñ2 illeg. for ^{b}.—^{b}) Ñ1 V1.3 B4 D1–5.9 T3 वरं लब्ध्वा सु (D1 स) दुर्मतिः (Ñ1 B4 °दुर्लभं).—^{c}) Ś D8.12 M1.6 सो; D6 वा (for च). D7 T4 शूलं तद् (for भवनं च).—For 15^{cd}, Ñ V1.3 B D1–5.9 T3 subst.:

955* भवनं कारयामास सोऽसुरः सुप्रभं महत् ।

[Ñ1 सोमरश्मि- (for सोऽसुरः सु-). V3 D9 प्रसभं; D5 सुशुभं (for सुप्रभं). Ñ2 illeg.; B सुप्रभं सोऽसुरोत्तमः (B3 °रेश्वरः) (for the post. half).];

while M3 subst.:

956* तच्छूलमाराधयितुं कालकालस्य भक्तितः ।

—After 15, D6 ins.:

957* अनेन मधुना लब्ध्वा रावणं तं पुरे शुभा ।

16 ^{a}) D1.3–5 तेन (for तस्य). Ñ B महाराज (B1 °जन्); V3 महावस्या (sic) (for महाभागा).—^{b}) Ś D8.12 चित्रा; Ñ V3 B नाम्ना; D1.3–5 बलात्; M6 पित्रा (for प्रिया). Ś D3.4.8.12 M6 हृता; Ñ V3 B1–3 पुरा; B4 D7.10.11 T3.4 G1.3 M2–5.10 [इ]ति या; D1 कृता; D5 वृता; D6 तु या; T1.2 G2 M1 हि सा; M7 तया (for हि या).—For 16^{ab}, V1 D2.9 subst.; while T3 ins. after 16^{ab}:

958* तेन पत्नी पुरा लब्धा रावणान्तःपुरे हृता ।

[D9 परा (for पुरा). V1 -[अं]तःपुरे धृता; D2.9 -[अं]तःपुरेषि (D9 °रेधि) ता (for -[अ]न्तःपुरे हृता).]

—T3 M2.4.5.7.9.10 om. 16^{cd}.—^{c}) V1 D1–4.9 दत्ता वि (V1 जित्वा वै) श्रवसोपत्यं.—^{d}) Ś V1 D2.8.9.12 M6 मा (M6 गो) ला नाम; D1.3.4 मालिना सु-; D5 अबला सा (with hiatus); D6.7.10.11 T4 G2 M1 [अ]प्यनलायां (D6 G2 °या); T1.2 G1 M3 ह्यनलाया (for ह्यनलायां). T1.2 G1.2 M3 महाप्रभो. G3 ह्यनला चानलप्रभा.—For 16^{cd}, Ñ V3 B subst.:

959* दत्ता विश्रवसोऽपत्यं राक्षसी रावणस्वसा ।

[Ñ1 दैत्या (for दत्ता). V3 B2.4 रावणस्य सा (for रावणस्वसा).]

17 ^{a}) T4 तस्यां (for तस्याः). B2.4 महाराज (B4 °कायो); D12 मातवीर्यो (corrupt) (for महावीर्यो).—^{b}) Ś Ñ1 V1 B2 D8.12 T3 M2.4.7.10 दानवः (for दारुणः).—^{d}) D5 पापम् (for पापानि). B2.3 D2–6.8.12 T1.2.4 M2 समाचरन् (B2.3 °रेत्).

18 ^{b}) Ś Ñ1 V1.3 D1–4.8.9.12 T3 शोक-; D5–7.10.11 क्रोध- (for दुःख-).—^{c}) Ñ1 V3 D1–5.9 T3 तु (for स). V1 G1 transp. मधुः and स. Ñ1 V1.3 D1–4.9 T3 दुःखम् (for शोकम्). Ś D8.12 [आ]दत्ते; D1 [आ]पन्नो (for [आ]पेदे). Ñ2 B शोकं समापेदे (for स शोकमापेदे).—^{d}) D7 M1 तु (for च). D1 न किंचिदेनमब्रवीत्.

19 ^{a}) Ñ1 V1.3 B4 D1–5.9 transp. स and विहाय.—Note hiatus between विहाय and इमं. B2 M10 दिवमं (for इमं).—^{b}) B4 प्रयातो (for प्रविष्टो).—^{c}) V1.3 D1–5.9 G1.3 M1.5.9 निवेद्य (for निवेश्य). M4 damaged for लवणे.—^{d}) B1 बलं; B2 वर्जं (sic); G2 वरान्; Cm.g.k.t as in text (for वरं). Ś D8.12 चास्य; Ñ2 V1.3 B D1–4.9 M6 चास्मै; G3 अस्मै (for तस्मै). Ś1 तथाविधं; Ś2.3 Ñ2 B D8.12 M6 निवेद्य च (Ñ2 B3.4 तं; M6 ह); D2.8 निवेदयत्; Cm.g.k.t as in text (for न्यवेदयत्).

20 Ś1 om. 20–21^{b}; Ś2.3 D8.12 om. 20^{ab}.—^{b}) Ñ1 V1.3 D1–5.9 स प्र (V3 सप्र) भावाच्च; Ñ2 B1.3.4 D7.10.11 स (Ñ2 अ) प्रभावेण; D6 प्रभावेण सः; M1 स हि प्रभावाद् (for स प्रभावेन).—^{b}) V1.3 D1–4.9 T1.2 दौरात्म्याद् (for दौरात्म्येन). D5 M3 तदा (for तथा). Ñ B दौरात्म्याच्च (B1 °त्म्येन) तथात्मनः.—^{c}) Ś2.3 Ñ V1.3 B D1–5.8.9.12 T3 लोकान्संताप (Ñ2 °कान्संपीड; V3 °कानुमोद [sic]) यामास;

G. 7. 66. 21 B. 7. 61. 21 L. 7. 65. 21

एवंप्रभावो लवणः शूलं चैव तथाविधम् ।
श्रुत्वा प्रमाणं काकुत्स्थ त्वं हि नः परमा गतिः ॥ २१
बहवः पार्थिवा राम भयार्तैर्ऋषिभिः पुरा ।
अभयं याचिता वीर त्रातारं न च विद्महे ॥ २२
ते वयं रावणं श्रुत्वा हतं सबलवाहनम् ।
त्रातारं विद्महे राम नान्यं भुवि नराधिपम् ।
तत्परित्रातुमिच्छामो लवणाद्भयपीडिताः ॥ २३

इति श्रीरामायणे उत्तरकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

M_6 संत्रासयति लोकांश्चीन् . —^{d}) Ñ $V_{1.3}$ B $D_{2.5-7.9-11}$ T_3 M_1 च (for तु).

21 $Ś_1$ om. 21^{ab} (cf. v.l. 20). —^{a}) $Ñ_1$ damaged from एवं up to ल. $Ñ_2$ एवंप्रभावं लवणं. —^{b}) $Ś_{2.3}$ $Ñ_1$ V_3 B_4 $D_{2-5.8.9.12}$ $T_{3.4}$ शूलं चास्य (B_4 चापि; T_4 चैतत्); D_1 तस्य शूलं (for शूलं चैव). G_1 $M_{1.10}$ शूलश्चैव तथाविधः. —D_9 om. 21^c–22^b. —^{c}) M_6 कुरु; Cm as in text (for श्रुत्वा). $Ñ_1$ प्रणामं (meta.); B_3 G_1 प्रभावं; M_6 प्रसादं; Cm.t as in text (for प्रमाणं). B_3 काकुत्स्थः. —^{d}) M_6 त्वं ह्यत्र (for त्वं हि नः).

22 D_9 om. 22^{ab} (cf. v.l. 21). —^{a}) Ś Ñ $V_{1.3}$ B_{2-4} $D_{1-5.8.12}$ राजन् (for राम). B_1 पार्थिवाश्चापि ते राजन्. —^{c}) Ś B_2 $D_{2.8.9.12}$ याचितं (for याचिता). Ś $Ñ_1$ V_1 $D_{2.8.9.12}$ तेभ्यो; $Ñ_2$ V_3 B $D_{1.3-5}$ तेषां; G_1 राम; M_5 तेषु; M_6 ह्यासन् (for वीर). —^{d}) M_4 damaged after त्रातारं. $D_{6.7}$ G_2 M_1 transp. न and च. Ś Ñ $V_{1.3}$ B $D_{1-5.8.9.12}$ न कश्चिद् ($Ñ_1$ V_1 $D_{1.4.5}$ °श्चा; D_3 °त्व) भयं ददौ; M_6 परं कश्चन लब्धवान्.

23 ^{a}) $D_{2.9}$ दृष्ट्वा (for श्रुत्वा). —^{b}) Ś Ñ $V_{1.3}$ B_4 $D_{1-5.8.9.12}$ हतं ससुतबांधवं. —$Ñ_1$ damaged from त्रा in ^{c} up to नान्यं in ^{d}. —^{c}) B_3 रामं; $D_{6.7.10.11}$ तात; $T_{1.2}$ $G_{2.3}$ वीर; M_1 त्वां वै (for राम). Ś $Ñ_2$ $V_{1.3}$ B_4 $D_{1-4.8.9.12}$ T_3 राम विद्मस्त्वां; D_5 विद्म राम त्वां (for विद्महे राम). —^{d}) $Ś_1$ $T_{2.3}$ $M_{1.3.4}$ नराधिप. —M_6 om. 23^{ef}. —^{e}) G_1 परित्राणम् (for परित्रातुम्). $M_{2.4.5.7.9}$ इच्छाम; M_3 इच्छामि. —^{f}) M_4 damaged after लवणाद् . $M_{7.10}$ परि- (for भय-). $D_{10.11}$ -पीडितान् . —For 23^{ef}, Ś $Ñ_1$ $V_{1.3}$ (reads after colophon) $D_{1-5.8.9.12}$ subst. :

960* लवणान्नो भयं तीव्रं नुद शीघ्रं महामते ।

[Ś V_3 D_8 transp. तीव्रं and शीघ्रं. Ś $D_{4.8.12}$ महाद्युते (for महामते).];

while $Ñ_2$ B subst. for 23^{ef}; $D_{7.10.11}$ ins. after 23 :

961* इति राम निवेदितं तु ते
भयजं कारणमुत्थितं च यत् ।
विनिवारयितुं भवान्क्षमः
कुरु तं काममहीनविक्रम ।

[(l. 1) B_1 तव (for तु ते). —(l. 2) $B_{3.4}$ भयदं (for भयजं). B_1 ऊर्जितं (for उत्थितं). B हि (for च). —(l. 4) $B_{1.4}$ कुरु तं काममहीनमेव नः; B_2 कुरु तं काममहीनपराक्रमं; B_3 कुरुतामिहमहीनमेव नः (corrupt).]

Colophon : Ś V_1 $D_{1-5.8.12}$ om. —*Sarga name* : $Ñ_1$ V_3 B_4 D_9 लवणोत्पत्तिः; $Ñ_2$ B_{1-3} ऋषिवाक्यं. —*Sarga no.* (figures, words or both) : $Ñ_1$ V_3 B_2 om.; $Ñ_2$ B_4 T_3 67; B_1 D_9 66; B_3 64; $D_{6.7.10.11}$ $T_{1.2}$ G $M_{1-5.7.9.10}$ 61; T_4 69; M_6 59. —After colophon, T_4 concludes with श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः; G $M_{1.2.5}$ with श्रीरामाय नमः; M_{10} with श्रीरामचन्द्राय नमः.

५४

तथोक्ते तानृषीन्रामः प्रत्युवाच कृताञ्जलिः ।
किमाहारः किमाचारो लवणः क्व च वर्तते ॥ १
राघवस्य वचः श्रुत्वा ऋषयः सर्व एव ते ।
ततो निवेदयामासुर्लवणो ववृधे यथा ॥ २
आहारः सर्वसत्त्वानि विशेषेण च तापसाः ।
आचारो रौद्रता नित्यं वासो मधुवने सदा ॥ ३
हत्वा दशसहस्राणि सिंहव्याघ्रमृगद्विपान् ।
मानुषांश्चैव कुरुते नित्यमाहारमाह्निकम् ॥ ४
ततोऽपराणि सत्त्वानि खादते स महाबलः ।
संहारे समनुप्राप्ते व्यादितास्य इवान्तकः ॥ ५
तच्छ्रुत्वा राघवो वाक्यमुवाच स महामुनीन् ।
घातयिष्यामि तद्रक्षो व्यपगच्छतु वो भयम् ॥ ६ G. 7. 67. 6 B. 7. 62. 6 L. 7. 65. 30

54

☞ V2 missing for Sarga 54 (cf. v.l. 952*). Ś V1 D1–5.8.12 cont. the previous Sarga. Cv does not comment up to 16^{b}.

1 Ś1 D8.12 om. $1–2^{b}$.—^{a}) D6 T1 G1 M3.6.9 Cm तथोक्तस्(M9 °क्तांस्); T4 तथेति; Ct तथोक्ते (as in text). T4 [ए]नान् (for तान्). Ś2.3 Ñ V1.3 B D1–5.9 T3 रामस्तथोक्तो मुनि(Ś2.3 V1 D2.9 T3 °क्त ऋषि)भिः. ❀ Ck: तथोक्त इत्यादि । परित्राणमिच्छाम इत्युक्त इत्यर्थः. ❀ —^{b}) M1 कृतांजलिपुटस्तदा. —^{c}) V3 M2.4.5.7.10 किमाचारः किमाहारो. —^{d}) Ñ1 सांप्रतं क; T4 लवणस्य; M4 damaged (for लवणः क्व). Ś2.3 V1 B3 कुत्र (for क्व च). B2 विद्यते.—After 1, Ś3 D9 ins.:

962* कीदृशो लवणः शूली तच्छीघ्रं मे निवेद्यताम् ।
[D9 वै (for मे).]

2 Ś1 D8.12 om. 2^{ab} (cf. v.l. 1).—^{a}) Ś2.3 V1 D1–5.9 ऋषयो राघववचः; Ñ1 B4 ऋषयो रामवचनं.—Ñ1 damaged from ^{b} up to ततो in ^{c}.—^{b}) Ś2.3 V1 D1–5.9 श्रुत्वा वै; B4 श्रुत्वा तत्; L (ed.) श्रुत्वा ते (for ऋषयः). G1 lacuna for एव. V1 हि; L (ed.) वै (for ते).—^{d}) Ñ2 B लवणो यत्र वर्तते; M5 लवणस्य वधे यथा.—For 2^{cd}, Ś Ñ1 V1.3 D1–5.8.9.12 T3 subst.:

963* निवेदयां तदा चक्रुर्लवणस्य विचेष्टितम् ।
[V3 ततश्; D4 तथा (for तदा). Ñ1 * * दयन्यथातथ्यं (for the prior half).]

—After 2, B2 ins.:

964* सविशेषं ततः सर्वं कथयन्ति महात्मनः ।

3 Ś2 om. 3^{ab}.—^{a}) M5.9 आहाराः. Ś1.3 D8 -भूतानां; V1 B1–3 D2.9.12 T3 -भूतानि (for -सत्त्वानि).—^{b}) Ś1.3 Ñ1 V1.3 B3.4 D1.3–5.8.12 G1 M6 तु; T2 [ए]व (for च). Ś1.3 D2.8.12 मानुषान्; Ñ1 V1.3 D3.4.6 M6 मानुषाः; B1.3 पार्थिवाः; D1 मानवाः; D5 मानवान्; M8 तापसान् (for तापसाः).—Ñ1 V1 D1.2.4.5.9 om. 3^{cd}. Ś D8.12 read 3^{cd} (followed by 965*) after 5.—^{c}) Ś D8.12 आचरद् (D12 °न्); V3 B D3 प्रचारो (for आचारो). Ś D8.12 रौद्रतां.—^{d}) Ś D8.12 वासं. Ñ2 मधुपुरे (for °वने). Ñ2 V3 B D3.6.7.10.11 M5 तथा; M8.10 तदा (for सदा).—After 3, Ś D8.12 ins.:

965* लवणस्तु महाबाहो संतापयति नित्यशः ।

4 Ś2 om. 4.—^{a}) Ñ2 M5 शत-; D6.7.10.11 T3.4 M8 बहु- (for दश-).—^{b}) B1 -महाद्विपान्; D6.7.10.11 T3.4 -मृगांडजान्; M3 -मृगद्विजान् (for °द्विपान्). Ś1.3 V1.3 D1–5.8.9.12 पू°ष्ण ते तस्य राघव.—After 4^{ab}, M5 ins.:

966* मनुष्यांश्च वने गत्वा शूले प्रोताञ्चराधिप ।

—^{c}) B1 मानुषं; T1.2 G2.3 महिषांश्; M5 महर्षींश् (for मानुषांश्).—^{d}) M2.7 आहितं (for आह्निकम्).—For 4^{cd}, Ś1.3 Ñ V1.3 B4 D1–5.8.9.12 subst.:

967* मृगाणां महिषाणां च भक्ष्यमेकाह्निकं किल ।
मानुषाणां वराहाणां गवां चैव चतुःशतम् ।
[Ñ1 B4 om. l. 1.—(l. 1) Ś3 D3.4.8 भक्ष्म्; D5 शतम्; (for भक्ष्यम्).—(l. 2) V1 महिषाणां (for मानु°). Ñ1 च मांसानि; B4 शतं चैव (for वराहाणां). Ñ2 D5 शतं शतं. Ñ1 B4 नित्य(B4 भक्त)मश्नाति राघव (for the post. half).]

5 Ñ1 V1.3 D1–5.9 om. 5. Ñ2 D7 om. 5^{ab}.—^{a}) D6.8 T1 M3.5 ततोवराणि; D10.11 Ct ततोंत°; G1 M10 हत्वात्र (M10 °प)राणि (for ततोऽपराणि).—^{b}) B3 खादत्येष; G3 खादते सु-.—^{c}) Ś1 B1.3 आहारे (for संहारे). Ñ2 संहारं कुरुते नित्यं; B2 संप्रहारं बले प्राप्ते.—^{d}) Ś D8 व्याधितास्य (sic); D12 (with hiatus) व्याधितस्य.—After 5, Ś D8.12 read 3^{cd} (followed by 965*).

6 ^{a}) D10 वाचम् (for वाक्यम्).—^{b}) D10 समाधाय (for उवाच स). T1.2 G3 M1.5 प्रीतिसंयुतः; M2.7 स महर्षयः; M4 स तपोधनान्; M6 परमान्मुनीन् (for स महामुनीन्). Ś Ñ V1.3 B D1–5.8.9.12 तानुवाच तपस्विनः.—^{c}) Ś B3 D8 T3 G पातयिष्यामि.—Ñ1 damaged for ^{d}.—^{d}) B1 व्युप-; K (ed.) ह्यप-(for व्यप-). B2 त्वा- (for वो). Ś V1 B4 D1–5.8.9.12 भयं वो न(V1 नो); D2 वै न पश्यतां ततः (B4 द्विजाः); V3 भयं चैतस्य मुच्यतां; T3 भयं वो नीयतां क्षयं.

G. 7. 67. 7
B 7. 62. 7
L. 7. 65. 31

तथा तेषां प्रतिज्ञाय मुनीनामुग्रतेजसाम् ।
स भ्रातॄन्सहितान्सर्वानुवाच रघुनन्दनः ॥ ७

को हन्ता लवणं वीराः कस्यांशः स विधीयताम् ।
भरतस्य महाबाहोः शत्रुघ्नस्याथवा पुनः ॥ ८

राघवेणैवमुक्तस्तु भरतो वाक्यमब्रवीत् ।
अहमेनं वधिष्यामि ममांशः स विधीयताम् ॥ ९

भरतस्य वचः श्रुत्वा शौर्यवीर्यसमन्वितम् ।
लक्ष्मणावरजस्तस्थौ हित्वा सौवर्णमासनम् ॥ १०

शत्रुघ्नस्त्वब्रवीद्वाक्यं प्रणिपत्य नराधिपम् ।
कृतकर्मा महाबाहुर्मध्यमो रघुनन्दनः ॥ ११

आर्येण हि पुरा शून्या अयोध्या रक्षिता पुरी ।
संतापं हृदये कृत्वा आर्यस्यागमनं प्रति ॥ १२

दुःखानि च बहूनीह अनुभूतानि पार्थिव ।
शयानो दुःखशय्यासु नन्दिग्रामे महात्मना ॥ १३

फलमूलाशनो भूत्वा जटाचीरधरस्तथा ।
अनुभूयेदृशं दुःखमेष राघवनन्दनः ।
प्रेष्ये मयि स्थिते राजन्न भूयः क्लेशमाप्नुयात् ॥ १४

---

7 ^{a}) G_{3} वचः श्रुत्वा; M_{5} प्रतिज्ञातो (for °ज्ञाय). Ś Ñ $V_{1.3}$ B D $T_{3.4}$ प्रति($Ś_{2.3}$ D_{8} ° वि)ज्ञाय(T_{4} °तं) तदा($Ñ_{2}$ $B_{1.3.4}$ °था)तेषां. —^{b}) Ś $Ñ_{2}$ $V_{1.3}$ $D_{1-5.8.9.12}$ T_{3} $M_{2.4.7}$ ऋषीणाम् ; T_{4} यतीनाम् (for मुनीनाम्). —^{c}) Ś V_{1} $D_{8.12}$ भ्रातॄंश्च; $Ñ_{2}$ B_{1} भ्रातॄन्स्वान् ; $B_{2.4}$ भ्रातॄंस्तान्; B_{3} * भ्रातॄन् ; D_{6} स भ्रातृ-; M_{6} अनुजान् (for स भ्रातॄन्). M_{5} सहितः. $Ñ_{1}$ V_{3} $D_{1-5.9}$ भ्रातॄंश्च तान्वै सहिता(V_{3} °कला)न्. —^{d}) Ś $D_{8.12}$ इदं वचनमब्रवीत् .

8 ^{a}) $Ś_{1.3}$ $Ñ_{2}$ $V_{1.3}$ $B_{1.4}$ D_{6-11} $M_{9.10}$ वीरः; $B_{2.3}$ M_{6} सौम्याः (for वीराः). —^{b}) V_{3} $B_{1.4}$ D_{2-4} T_{4} G_{1} $M_{3.6.7}$ सं- (for स). Ś $D_{8.12}$ विधीयते. —After 8^{ab}, D_{3} ins. :

968* लक्ष्मणेन कृतं कर्म पूर्वं शत्रुनिबर्हणं ।

—D_{5} om. 8^{cd}. D_{3} reads 8^{c}–9^{a} in marg. —^{d}) Ś Ñ V_{1} $D_{1.2.4.8.9.12}$ [अ]पि वा(Ś $Ñ_{2}$ D_{12} च) विभोः; V_{3} च वा विभोः; B M_{6} महात्मनः; D_{3} [अ]पि वाचिते (sic); $D_{6.7.10.11}$ T G_{3} $M_{2-4.7-9}$ च(M_{3} om. च [subm.]) धीमतः (for [अ]थवा पुनः). —After 8, D_{3}(m.) ins. :

969* श्रुतं तपः कृतं पूर्वं दुष्करं चाकृतात्मभिः ।

9 D_{3} reads 9^{a} in marg. (cf. v.l. 8). —^{a}) Ś $D_{1.3.4.8.12}$ M_{1} उक्ते (for उक्तस्). —^{b}) $Ñ_{1}$ damaged for -मब्रवीत् . —^{c}) V_{1} $D_{1.3.4}$ एव; D_{5} एवं (for एनं). Ś $Ñ_{1}$ V_{1} B_{2-4} $D_{1-4.8.9.12}$ M_{1} हनिष्यामि. —T_{1} om. 9^{d}–10^{a}. —^{d}) $B_{1.2}$ D_{3-5} $M_{2.4.6.7.9}$ ममांशः सं-; T_{3} ममादेशो; T_{4} त्वादेशः सं- (for ममांशः स).

10 T_{1} om. 10^{a} (cf. v.l. 9). $Ñ_{1}$ $D_{1-5.9}$ om. 10. V_{3} om. 10^{ab}. —^{b}) $Ś_{1}$ शौर्यौदार्य-; $Ś_{2.3}$ V_{1} $D_{8.12}$ शौर्यधैर्य-; B_{2} वीर्यशौर्य- (by transp.); D_{6} तद्धैर्य-; $D_{7.10.11}$ $T_{1.2.4}$ G_{3} M_{1-3} धैर्यशौर्य-; T_{3} M_{7} धैर्यवीर्य-; $G_{1.2}$ शौर्यशौर्य- (for शौर्यवीर्य-). $B_{2.3}$ T_{4} M_{3-6} -समन्वितः. —^{c}) G_{2} Ck स्थित्वा (for तस्थौ). Ś $Ñ_{2}$ V_{1} $B_{1.3.4}$ D_{8} लक्ष्मणानुज उत्तस्थौ.

11 ^{a}) $Ñ_{2}$ B_{1-3} [ऽ]थ; V_{3} D_{5} $T_{3.4}$ च (for तु). —^{b}) M_{5} महानृपं (for नराधिपम्). —B_{1} om. 11^{c}–12^{b}. —^{c}) $Ñ_{1}$ $D_{1-4.9}$ G_{2} महाबाहो; V_{1} °भागो (for महाबाहुर्). —^{d}) M_{1} भरतो (for मध्यमो). $D_{2.8.10.11}$ G_{3} $M_{1.2.4.6.7}$ रघुनंदन.

12 B_{1} om. 12^{ab} (cf. v.l. 11). Note hiatus between ^{a} and ^{b}. —^{a}) B_{2} च (for हि). Ś पुरे; $D_{8.12}$ पुरी (for पुरा). Ñ V_{1} B_{4} $D_{1-5.9}$ [अ]योध्या (for शून्या). —^{b}) $D_{6.7}$ $T_{3.4}$ M_{3} त्वयोध्या; G_{1} ह्ययोध्या. Ś $D_{8.12}$ पुरा (for पुरी). $Ñ_{1}$ B_{4} शून्या तेनापि($Ñ_{1}$ °न्यानेन हि)रक्षिता; $Ñ_{2}$ V_{1} $D_{1-5.9-11}$ शून्येयं($D_{10.11}$ त्वयोध्या)परिपालिता. —Note hiatus between ^{c} and ^{d}. —^{c}) D_{6} T_{2} हृदयं. Ñ V_{1} B_{4} $D_{1-5.9}$ हृदि कृत्वा च($Ñ_{1}$ °थ; $Ñ_{2}$ $D_{2.3.9}$ तु) संतापं. —^{d}) $D_{1-5.8.9.12}$ गमनं (for [आ]गमनं).

13 D_{7} transp. ^{ab} and ^{cd}. Note hiatus between ^{a} and ^{b}. M_{4} damaged from नीह in ^{a} up to अनु in ^{b}. —^{a}) Ś V_{3} B_{1-3} $D_{8.12}$ M_{6} सुबहूनि च दुःखानि. —^{b}) B_{3} शृणु; $G_{1.2}$ M_{6} ह्यनु- (for अनु-). B_{1-3} सर्वशः (for पार्थिव). —For 13^{ab}, Ñ V_{1} B_{4} $D_{1-5.9}$ T_{3} subst. :

970* अनुभूतानि दुःखानि पार्थिवानि बहूनि च ।

[B_{4} भरतेन; T_{3} श्रीराम सु- (for पार्थिवानि). B_{4} ह (for च). $Ñ_{2}$ सुबहूनि त्वया विना (for the post. half).]

—^{c}) Ś $Ñ_{1}$ $V_{1.3}$ $D_{2.5.8.9.12}$ M_{6} शयितं; $Ñ_{2}$ शयिता; B_{1} श्रूयतां; B_{2} स्वपता; B_{3} सुप्तोयं; B_{4} शयितो; $D_{1.3.4}$ शायितं (for शयानो). D_{1} दुःखशय्यायां. —^{d}) $Ś_{3}$ B_{4} D_{5} G_{2} महात्मनः (sic); $Ñ_{2}$ $D_{6.7.10.11}$ $T_{3.4}$ $M_{9.10}$ °यशाः; $T_{1.2}$ G_{3} $M_{1.3}$ [ऽ]वसत्पुरा; G_{1} $M_{5.7}$ °मनाः; G (ed.) °त्मवान् (for महात्मना).

14 ^{a}) $D_{2.9}$ ततः फल- (for फलमूल-). —^{b}) $D_{1.2.7.9-11}$ $T_{3.4}$ $G_{1.3}$ $M_{1-5.7-10}$ जटी (for जटा-). $B_{1.2}$ -धरेण च; T_{3} -धरः सदा; G_{2} $M_{2.4-9}$ -धरस्तदा (for °स्तथा). —$Ñ_{1}$ V_{1} B_{4} $D_{1-5.9}$ om. 14^{cd}. —^{cd}) $G_{1.2}$ $M_{5.6.8-10}$ भृशं (for [ई]दृशं). Ś $D_{8.12}$ $M_{2.7}$ -नंदन; M_{4} damaged (for -नन्दनः). $Ñ_{2}$ B_{1-3} अनुभूतानि दुःखानि महांति रघुनंदन (cf. 970*). —^{e}) Ś V_{3} $D_{8.12}$ भूयः; M_{5} यत्नं (for राजन्). $Ñ_{2}$ B_{1-3} तस्मात्स्थिते मयि प्रेष्ये; B_{4} मयि प्रेष्ये स्थिते ह्येष. —^{f})

तथा ब्रुवति शत्रुघ्ने राघवः पुनरब्रवीत् ।
एवं भवतु काकुत्स्थ क्रियतां मम शासनम् ॥ १५
राज्ये त्वामभिषेक्ष्यामि मधोस्तु नगरे शुभे ।
निवेशय महाबाहो भरतं यद्यवेक्षसे ॥ १६
शूरस्त्वं कृतविद्यश्च समर्थः संनिवेशने ।
नगरं मधुना जुष्टं तथा जनपदाञ्शुभान् ॥ १७
यो हि वंशं समुत्पाद्य पार्थिवस्य पुनः क्षये ।
न विधत्ते नृपं तत्र नरकं स निगच्छति ॥ १८
स त्वं हत्वा मधुसुतं लवणं पापनिश्चयम् ।
राज्यं प्रशाधि धर्मेण वाक्यं मे यद्यवेक्षसे ॥ १९
उत्तरं च न वक्तव्यं शूर वाक्यान्तरे मम ।
बालेन पूर्वजस्याज्ञा कर्तव्या नात्र संशयः ॥ २०
अभिषेकं च काकुत्स्थ प्रतीच्छस्व मयोद्यतम् ।
वसिष्ठप्रमुखैर्विप्रैर्विधिमन्त्रपुरस्कृतम् ॥ २१ G. 7.67.21 B. 7.62 21 L. 7 65.45

इति श्रीरामायणे उत्तरकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥

Ñ1 V1 D1–4.9 भूयो न (by transp.); D5 भूयो मा (for न भूयः). Ñ1 आप्नुहि (sic); Ñ2 B अर्हति (for आप्नुयात्). Ś V3 D8.12 कथं क्लेश(V3 दुःख)मवाप्नुयात्.

15 a) B2 अथो (for तथा). V3 B4 D2.9 काकुत्स्थे; D5 काकुत्स्थः (for शत्रुघ्ने).—b) V3 D5 शत्रुघ्ने (for राघवः). Ñ2 B1–3 रामः पुनरुवाच ह.—c) T1.2 G3 M1.3 एवास्तु (for भवतु). Ñ2 B शत्रुघ्न; M1 काकुत्स्थः (for काकुत्स्थ).—d) Ñ1 V1 D1–5.9 वचनं मम; G (ed.) शासनं मम (by transp.) (for मम शासनम्). B2 शासनं क्रियतां मम.

16 a) M4 damaged for राज्ये. Ś D8.12 अभिषिंचामि; Ñ1 चाभिषेक्ष्यामि.—b) D1.4 मध्ये च; D3.5 मधोश्च. D12 M6 तस्य पुरे (for तु नगरे). Ś D8 मधोस्तस्य महापुरे; V3 पुरे तस्य मधोः शुभे.—c) Ñ1 महाभाग (for °बाहो).—d) Ñ2 B2–4 नगरं; V3 लवणं; B1 पुरीं त्वं (for भरतं). B3 परिरक्ष च; D6 G1 M4.6.8.9 यद्यपेक्षसे; G2 °वेक्षसि; Cm.g.k.t as in text (for यद्यवेक्षसे). ❀ Cv : निवेशयेत्याद्यर्धश्लोक एकवाक्यार्थः. ❀

17 a) D1.4 तु (for त्वं). D6 कृतवीर्यश्च.—b) B3 कुशलश् (for समर्थः). Ś Ñ V1.3 B D T4 M6 च; T1.2 G M1.3–5.10 Cm.k.t त्वं; Cv as in text (for सं-).—K (ed.) om. 17cd.—c) M4 damaged for ना जुष्टं तथा. D5–7.10.11 T4 यमुना- (for मधुना).—d) T2 तदा. G1 बहून् (for शुभान्). Ś Ñ V1.3 B D1–5.8.9.12 T4 M6 तथा(Ś V3 D8.12 T4 तदा; B2 सर्वं)जा(Ñ2 B1.3.4 D4 T4 M6 ज)नपदं (D1 जनपदे) शुभं(T4 °भे).

18 a) D6 T1.2 G3 M1.3 हि शत्रुं; T4 रिरंसुं; G2 हि शत्रून्; M4.8 हि वंशः; M6.9 हि वंशे. Ś1.3 Ñ V1.3 D G1.2 M2.5–7.9.10 समुत्पाद्य; B1 समुच्छाद्य; B4 °त्साद्य (for समुत्पाद्य).—b) Ś Ñ V1.3 B D1–5.8.9.12 T3 परिक्षये; D6.7.10.11 T4 Ct निवेशने; G2 पुरक्षये; M6 कुलक्षये (for पुनः क्षये).—Ś1 D8.12 om. 18c–19.—c) G3 विनिधत्ते; M9 विधत्ते न (by transp.). Ś2.3 V1 D2.5.9 पुरं; G2 परं; M4.9 पुनस्; M6 नृपस्; Cm.g.k.t as in text (for नृपं). Ñ2 भूयो (for तत्र).—d) V1 नरकी (for नरकं). Ś2.3 Ñ V1.3 B D2.9 सोव(Ś2.3 सो हि)गाहते(Ñ1 °ति); D1.3–5 स विगाह(D1.4 °ह्य)ते; D6.7.10.11 T3.4 M2–4.7 स हि(D7 हि स; M2.7 स तु)गच्छति; T2 G2.3 M8.9 संनि° (for स निगच्छति).

19 Ś1 D8.12 om. 19 (cf. v.l. 18).—a) M9 तं (for त्वं). Ś2.3 मधुसुतं हत्वा (by transp.).—b) Ś2.3 Ñ1 V1.3 B3 D1–5.9 पापचेतसं; M4 पार्थिवश्च यः (for पापनिश्चयम्).—c) M4 damaged for राज्यं.—G2 reads erroneously 55. 1b–2 in place of 54. 19d–21b.—d) M10 भरतं; L (ed.) मद्वाक्यं (for वाक्यं मे). Ś2.3 नाभ्यवे(Ś3 °पे)क्षसे; M4.9.10 यद्यपेक्षसे.

20 a) Ś V3 D2.8.9.12 T3 transp. च and न.—b) B4 त्वया (for शूर). B3 वाक्यं भवेन्; D1.4 वाक्यांतैर् (for वाक्यान्तरे).—cd) Ś Ñ V1.3 B D1–5.8.9.12 T3 पूर्वजस्याविचार्याज्ञा कर्तव्या ह्यनुजैः सदा(D5 °ह).

21 a) M4 damaged for अभिषे. B3 तु (for च).—b) Ś Ñ1 V3 B3 D8.12 प्रतीच्छ त्वं; D1–5.9 °च्छेमं; M5 °क्षस्व (for प्रतीच्छस्व). Ś1 B4 D5–7.10.11 G3 M6 मम; D9 पश्य (for मया). V3 D3 [उ]दितं; M6 [उ]द्यमं (for [उ]द्यतम्).—V1 om. (hapl.?) 21cd.—c) Ñ1 damaged for वसिष्ठप्र-. T1.2 M3 सर्वैर् (for विप्रैर्).—d) G2 विधिपूर्वं; Cm.g.k.t as in text (for °मन्त्र-). Ś Ñ V3 B1–3 D1–5.8.9.12 T3 M6 मंत्रपू(B1 °न्त्रैर्युं; B3 °न्त्रैः पू)त(D5 M6 °र्वं)मनिंदितं(V3 °तैः); B4 मंत्रपूतैररिंदम.

Colophon.—*Sarga name* : Ś Ñ2 V1.3 B2–4 D1.4.5.7.8.12 शत्रुघ्नलि(D4 °वि)यो(D5 °र्यो)गः; Ñ1 D2.3 शत्रुघ्नविनियोगः; B1 शत्रुघ्नाभिषेकः; D6 शत्रुघ्नविजयः.—*Sarga no.* (figures, words or both) : Ś Ñ V3 B3 D2.12 om.; V1 47; B1 D9 67; B2 52; B4 T3 68; D1.4.8 59; D3 63; D5 71; D6.7.10.11 T1.2 G M1–5.7.9.10 62; T4 70; M6 60; M8 61.—After colophon, T4 concludes with श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः; G M1.2.5.8 with श्रीरामाय नमः; M10 with श्रीरामचन्द्राय नमः.

५५

G. 7. 63. 1
B. 7. 63. 1
L. 7. 66. 1

एवमुक्तस्तु रामेण परां व्रीडामुपागतः ।
शत्रुघ्नो वीर्यसम्पन्नो मन्दं मन्दमुवाच ह ॥ १

अवश्यं करणीयं च शासनं पुरुषर्षभ ।
तव चैव महाभाग शासनं दुरतिक्रमम् ।
अयं कामकरो राजंस्तवास्मि पुरुषर्षभ ॥ २

55

☞ V2 missing for Sarga 55 (cf. v.l. 952*). D12 begins with ॐ.

1 ^{ab}) Ś V1 D2.3.5.8.9.12 हर्षात्; Ñ1 ध्यात्वा; B4 कृत्वा; T4 परं; G (ed.) भूत्वा (for परां). Ś Ñ1 V1 B4 D2.3.5.8.9.12 किंचिद्; B1.2 प्रीतिम् (for व्रीडाम्). Ś V1 B4 D8.12 अधोमुखः (B4 °खं); Ñ1 D2.3.5.9 अवाङ्मुखः; B2.3 D6.7.10.11 G1 M6.10 उपागमत् (for उपागतः). V3 राघवः समुपागमत् (for ^{b}). D1.4 रामस्य तु वचः श्रुत्वा लज्जितो वै पराङ्मुखः. —^{d}) B1.3 D1.3.6.7 मंदमंदम्. —After 1, Ś Ñ V1.3 B D S ins.:

971* अधर्मं विद्म काकुत्स्थ अस्मिन्नर्थे नरेश्वर ।
कथं तिष्ठत्सु ज्येष्ठेषु कनीयानभिषिच्यते ।

[(l. 1) Note hiatus between the two halves. Ñ2 illeg. for the prior half. G1 M2.5.10 न धर्मं; Cm.g.k.t अधर्मं (as above). B1.3 M6 विद्धि; B2 T1 G1 M1.3.10 वेद्मि; Cm.g.k.t as above (for विद्म). Ś Ñ1 V1.3 B4 D1–5.8.9.12 T3 काकुत्स्थ वेत्सि धर्मं त्वम् (for the prior half). T4 G1 M3 ह्यस्मिन्. B4 लोके (for अर्थे). D1.4 न संशयः (for नरेश्वर). Ñ2 B1–3 M6 मद्गतं रघुनंदन (for the post. half). —(l. 2) Ś Ñ V1.3 B D2.3.5.8.9.12 T3 transp. तिष्ठत्सु and ज्येष्ठेषु. D1.4 ज्येष्ठेन गुरुणा चैव; G1 कथं संतिष्ठति ज्येष्ठे; M3 कथंचित्स्वेषु ज्येष्ठेषु (for the prior half). Ñ1 M4 damaged for नीयानभि. B4 अभिषिच्यसे; D1 अभिषेच्यते; D6.7 अभिषेक्ष्यते (for °षिच्यते). ❀ Cg: तिष्ठत्सु ज्येष्ठेष्विति गुरुवैषम्यमार्षम् ।; so also Ck.t. ❀]
—Thereafter, M3 cont. 976*.

2 T3 repeats 2^{ab} (followed by l. 4 and l. 6 of 973*) after 2^{cd}. —^{a}) M2.4–7 अवश्य॰; Cm.g.k.t as in text (for अवश्यं). Ś D8.12 ते; D1.3–5 T3 (first time) हि; M6 Ck तु; Cm.g.t as in text (for च). —^{b}) Ñ1 वचनं; M3 केनापि; Cg.t as in text (for शासनं). Ñ2 B1 तव राघव; B2–4 तव पार्थिव (for पुरुषर्षभ). T3 (second time) श्रीराम तव शासनं. —G1.2 M1.3.10 read 2^{cd} twice. M5 reads from 2^{c} up to l. 3 of 973* twice. —^{c}) Ñ2 B3 तत्र (for तव). Ñ2 V1 B1.3.4 T1.2 G M1.2.4.6–8.10 (G1.2 M1 both times; M3.10 second time) महाबाहो (for महाभाग). —^{d}) T2 दुरतिक्षमं (for °क्रमम्). T1 G M1.3.10 (all with hiatus; G1.2 M1.3.10 first time) आत्मनश्च यथा श्रुतं. ❀ Ct: यतस्तव शासनं वेदशासनवद्दुरतिक्रममतिक्रमितुमशक्यम्. ❀ —For 2^{cd}, Ś Ñ1 V3 D1–5.8.9.12 subst.; V1 ins. after 2^{ab}:

972* गुरूणां हि महाबाहो तव चैव मया श्रुतम् ।
[Ñ1 V1 D1–5.9 आत्मनश्च (for गुरूणां हि).]

—Thereafter they cont.; Ñ2 B1.3.4 T2 M1.2.4.6.7 cont. l. 1–5 after 976* and ins. l. 6 after 2^{cd} (M1 after 2^{cd} [r.]); B2 D6.7.10.11 T4 M5.9 cont. after 976*; T1 G3 M3 ins. after 2^{cd}; T3 ins. l. 4 and l. 6 only after 2^{ab} (r.); G1.2 M3.10 ins. l. 1–5 and l. 6 after 2^{cd} (first and second occurrence respy.):

973* नोत्तरं हि मया वाच्यं मध्यमे प्रतिजानति ।
व्याहृतं दुर्वचो घोरं हन्तास्मि लवणं मृधे ।
तस्येयं मे दुरुक्तस्य दुर्गतिः पुरुषर्षभ ।
उत्तरं हि न वक्तव्यं ज्येष्ठेनाभिहिते सति ।
अधर्मसहितं चैव परलोकविवर्जितम् । [5]
सोऽहं द्वितीयं काकुत्स्थ न वक्ष्यामि तवोत्तरम् ।

[M5 repeats l. 1-3. —(l. 1) Ñ2 illeg. for the prior half. Ś Ñ1 V1.3 B D2.3.5.8.9.12 T3 उत्तरं; T1.2 G3 M10 मया हि; G2 मया न; M3 मयापि; Cv.g.k.t as above (for नोत्तरं). B यन्; D3 च; D5 न (for हि). M5 (both times) यथा; Cv.g.k.t as above (for मया). T1 M3.10 नोत्तरं; T2 G2.3 चोत्तरं (for हि मया). B1 दत्तं; B2–4 तुभ्यं; D2.5.9 T1.2 G3 वाक्यं; Cv.m.g.k.t as above (for वाच्यं). Ś V3 D8.12 T3 न वक्तव्यं (for मया वाच्यं). D1.4 उच्यमानं न तद्वाच्यम् (for the prior half). Ś Ñ V1.3 B D1.3–5.7.8.12 गुरूणां (Ñ1 V1 D1.3–5 उच्यते; Ñ2 B1 तुभ्यम; B2–4 दत्तम; D7 अद्य मे) प्रतिजानता; D2.9 उच्यते विप्रजानता; T3 ज्येष्ठानां मद्विधैः सह (for the post. half). —(l. 2) B4 अनार्यं; D2 व्याहर्तुं (for व्याहृतं). D2.5 तद्वचो; T1.2 G2.3 M3 तद्विभो; Cv.m.g.k.t as above (for दुर्वचो). M6 लोके; Ct as above (for घोरं). Ś Ñ V1.3 B D1–5.8.9.12 तन्मे मर्माणि कृंतति (for the post. half). —(l. 3) V1.3 D1–4.7.9–11 T4 G1 M2.3.7.10 तस्यैवं; B1 तस्येदं; M6 तस्य * (for तस्येयं). D1–4.9 तु (for मे). B1 D6 द्विरुक्तस्य; B4 दुरुक्तव्यं; T1.2 G3 [ऽ]नुरक्तस्य; Cg.k.t as above (for दुरुक्तस्य). D5 दुष्कृतस्य तु तस्येह (for the prior half). —B1 om. from the post. half up to the prior half of 973(A)*. Ś Ñ1 V1.3 B2–4 D1–5.8.9.12 निष्कृतिः; M6 दुर्बुद्धेः; Cv.m.g.k.t as above (for दुर्गतिः). —After l. 3, Ñ2 B ins.:

973(A)* अस्यैव मे दुरुक्तस्य क्षन्तुमर्हस्यनिन्दित ।
[B4 च (for मे). Ñ2 एतस्यैवं (for अस्यैव मे). Ñ2 illeg.

एवमुक्ते तु शूरेण शत्रुघ्नेन महात्मना ।
उवाच रामः संहृष्टो लक्ष्मणं भरतं तथा ॥ ३
संभारानभिषेकस्य आनयध्वं समाहिताः ।
अद्यैव पुरुषव्याघ्रमभिषेक्ष्यामि दुर्जयम् ॥ ४
पुरोधसं च काकुत्स्थौ नैगमानृत्विजस्तथा ।
मन्त्रिणश्चैव मे सर्वानानयध्वं ममाज्ञया ॥ ५

G. 7. 68. 11
B. 7. 63. 11
L. 7. 66. 8

after क्षन्तु up to the prior half of l. 4 B4 मेनघ (for [अ]निन्दित).]

—Ś V3 D8.12 om. l. 4–5. —(l. 4) Ñ1 damaged; D1.4 वक्तव्यं (for उत्तरं). M3 damaged for न वक्तव्यं. B3 D1.3–5 तु न; D6.7.10.11 न हि (by transp.); T1.2 G3 M6 च न; M5 च हि; Cv.g.k.t as above (for हि न). D3 M8 कर्तव्यं; Cg.k.t as above (for वक्तव्यं). T4 [अ]भिहितः; M5 [अ]-भिहितं. D6.7.10.11 T4 पुनः; G1.2 M2.4.5.7–10 वचः (for सति). M1 [अ]भिजनेन च; Cm.g.k.t as above (for [अ]भिहिते सति). Ñ V1 B D1.3–5.9 M6 ज्येष्ठानां मद्विधैः सदा; D2 ज्येष्ठेनास्मद्विधैः सदा (for the post. half). —Ñ1 D1–5.9 om. l. 5. —(l. 5) B1 अधर्म्यम् (for अधर्म-). B1 अहितं; M8 न हितं (for -सहितं). D7 G1.2 M5.8.10 Cm -विगर्हितं; Cg.k.t as above (for -विवर्जितम्). Ñ2 B इहामु(B3 °न्य)त्र च गर्हितं; V1 इह चामुत्र गर्हितं (for the post. half). ❀ Cv: उत्तरं हीत्यादिना पूर्वोक्तं विशदयति । अत्राप्युत्तरशब्दः परवचनः ।; so also Cm.g.k.t. ❀ —V1 ins. l. 6 after 2^{cd}. —(l. 6) Ś D8.12 यदि (for सोऽहं). V3 यद्वितीयं च (for सोऽहं द्वितीयं). M6 तद् (for न). V3 पश्यामि (for वक्ष्यामि). Ś B1 D8.12 T1 तथोत्तरं; D6.7.10.11 [इ]ति चोत्तरं (for तवोत्तरम्).]

—Then Ś Ñ1 V1.3 B2.4 D1–5.8.12 further cont.:

974* दण्डो द्वितीयो नेदानीमेतन्मयि परंतप ।

[Ñ1 V1 B4 D5 पतेन् (for एतन्). B4 D1.4 मम (for मयि). B2 यत्नश्राम; L (ed.) हीयते मे (for एतन्मयि).];

while, Ñ2 B1.3 D6.7.9–11 S further cont. after 973*; B2 cont. after 974*:

975* मा द्वितीयो हि दण्डो वै निपतेन्मयि राघव ।

[M1.2 मद् (for मा). D6 T3.4 M8 द्वितीयस्तु; D7.10.11 द्वितीयेन(D7 °ये तु); T1.2 द्वितीयो न (for द्वितीयो हि). Ñ2 द्वितीयो व्याहृतो दंडो; B1.3 द्वितीयोयं च ते दंडो; B2 द्वितीये चापि दंडो वै; D9 द्वितीये व्याहृते दंडो (for the prior half). M8 om. निपतेन्. Ñ2 B1–3 D9 मम (for मयि). D6.7.10.11 मानद (for राघव).]

—For 2^{cd}, B2 subst.; Ñ2 B1.3.4 T2 M2.4.6.7 ins. after 2^{ab}; D6.7.10.11 T4 M1(after first occurrence).5.9 ins. after 2^{cd}; M3 cont. after 971*:

976* त्वत्तो मया श्रुतं वीर श्रुतिभ्यश्च मया श्रुतम् ।

[T4 कृतं (for श्रुतं). T2 सर्व (for वीर). M5 (both times) श्रुतयश्च. T2 M2.3.7 तथा; M1.5(both times).9 यथा (for मया). T4 कृतं (for श्रुतम्). Ñ2 illeg.; B1.3 श्रुतिमद्भ्यस्तथा श्रुतं; B2 श्रुतिमत्तस्तथापि च; B4 श्रुतेरर्थस्तथा श्रुतं (for the post. half).]

—^{e}) Ś Ñ V1.3 B D1–9.12 T G3 M1.3 अहं (for अयं). Ś Ñ1 V1.3 B4 D1–5.8.9.12 कर्मकरो; Ñ2 B1–3 आज्ञाकरो; D6.7 T3.4 M5 हि(M5 वै) किंकरो (for कामकरो). D10.11 Cg.k.t कामकारो ह्यहं (for अयं कामकरो). B4 ते हि; D2 राज्ञस्; G1 नित्यं; Ck.t as in text (for राजंस्). —^{f}) V3 सर्व- (for तव). D5.10.11 [अ]स्य; Cg as in text (for [अ]स्मि). Ñ2 रघुनंदन; G2 पुरुषोत्तम (for पुरुषर्षभ). Ś Ñ1 V1.3 D1–4.8.9.12 धर्मज्ञ सर्वदा (for [अ]स्मि पुरुषर्षभ). B4 सर्वधर्मभृतां वर. —After 2, Ś Ñ V1.3 B D S (except M1) ins.:

977* अधर्मं जहि काकुत्स्थ मत्कृते रघुनन्दन ।

[Ś Ñ1 V1.3 D1–5.8.9.12 M6 मद्गतं; Cg.k.t as above (for °त्कृते). Ñ2 B1.3.4 पुरुषोत्तम; B2 पुरुषर्षभ (for रघुनन्दन).]

3 Ñ1 damaged for ^{a}. —^{a}) B G1 M6 उक्तस् (for उक्ते). —For 3^{ab}, Ś V1.3 D1–5.8.9.12 T3.4 subst.:

978* शत्रुघ्नस्य वचः श्रुत्वा राघवः प्रीतमानसः ।

[D5 शत्रुघ्नवचनं. D12 प्रीति- (for प्रीत-).]

—Thereafter V1 cont. 979*.

—Ś Ñ1 V3 D1–5.8.9.12 om. 3^{cd}. —^{c}) M3 राजा (for रामः). —^{d}) D6.7.10.11 transp. लक्ष्मणं and भरतं. Ñ2 B2 T1.2 M3 तदा; Cv.g as in text (for तथा).

4 Note hiatus between ^{a} and ^{b}. —^{a}) D6 अभिषेकाय (for अभिषेकस्य). —^{b}) T3 चानयध्वं. M5 ह्यानयेथां समाहितौ. ❀ Cm: आनयध्वमिति बहुवचनेन सुमन्त्रादीन्प्रत्याहेति द्रष्टव्यम्. ❀ —For 4^{ab}, Ś Ñ1 V3 D1–5.8.9.12 subst.; V1 cont. after 978*; T3 ins. after 4:

979* आज्ञापयामास विभुराभिषेचनिकं विधिम् ।

[V1 D1–4 अ(D3 त्वा)भिषेचनकं; D9 चाभिषेचनिकं. V1 D1–4.9 T3 महत् (for विधिम्). Ñ1 अभिषेकाय मानदः; D5 अभिषेचनिकं परं (for the post. half).];

while, Ñ2 V1 B M6 subst. for 4^{ab}:

980* अभिषेकस्य संभारा आनीयन्तां ममाज्ञया ।

[B4 संभारान्. B4 आनयंतु त्वरान्विताः (for the post. half).]

—Ś Ñ1 V1.3 D1–5.8.9.12 om. 4^{cd}. —^{d}) Ñ2 B D6.7.10.11 T4 M6 राघवं (for दुर्जयम्).

5 ^{a}) B2.3 M6 पुरोहितं (for पुरोधसं). Ś Ñ1 V1.3 B4 D1–5.8.9.12 T3 वसिष्ठं च; Ñ2 B2.3 M6 च धर्मज्ञं; B1 च सर्वज्ञं; D6.7.10.11 G M1.3.8 च काकुत्स्थ; M2.7 च काकुत्स्था (for च काकुत्स्थौ). ❀ Cv: काकुत्स्था इति काकुत्स्थप्राधान्यात् अकाकुत्स्था अपि तथा संबोध्यन्ते । एकस्मादन्यत्सर्वमनेकम् ।

G. 7. 68. 12
B. 7. 63. 12
L. 7. 66. 9

राज्ञः शासनमाज्ञाय तथाकुर्वन्महारथाः ।
अभिषेकसमारम्भं पुरस्कृत्य पुरोधसम् ।
प्रविष्टा राजभवनं पुरंदरगृहोपमम् ॥ ६

ततोऽभिषेको ववृधे शत्रुघ्नस्य महात्मनः ।
संप्रहर्षकरः श्रीमान्राघवस्य पुरस्य च ॥ ७

ततोऽभिषिक्तं शत्रुघ्नमङ्कमारोप्य राघवः ।
उवाच मधुरां वाणीं तेजस्तस्याभिपूरयन् ॥ ८
अयं शरस्त्वमोघस्ते दिव्यः परपुरंजयः ।
अनेन लवणं सौम्य हन्तासि रघुनन्दन ॥ ९
सृष्टः शरोऽयं काकुत्स्थ यदा शेते महार्णवे ।
स्वयंभूरजितो देवो यं नापश्यन्सुरासुराः ॥ १०

अतो द्वयोरपि बहुवचनं प्रयोक्तव्यमिति भगवतोऽभिप्राय इति केचित्. ❀ —b) Ś D8.12 च द्विजांस्; M8.9 ऋत्विजांस् (for ऋत्विजस्). Ñ2 B1–3 M6 transp. नैगमान् and ऋत्विजस्. —c) Ś Ñ1 V1.3 D1–5.8.9.12 T3 तथा; D6 [ए]व ये; D7.10.11 G2 [ए]व तान्; T2 [ए]व मा; T4 [ए]व नः; M6 [अ]पि मे (for [ए]व मे). Ñ2 B नरव्याघ्र (for [ए]व मे सर्वान्). —d) M5 आनयेथा. Ś V3 D8.12 त्वरितो नृपसत्तमः; Ñ1 V1 D1–5.9 T3 शीघ्रं नृपतिसत्तमः; Ñ2 B2.4 शीघ्रं सर्वान्समानय; B1 शीघ्रं सर्वानुपानय; B3 सर्वान्शीघ्रं समानय.

6 b) M5 कृत्वा; M6 [अ]कार्षुर् (for [अ]कुर्वन्). M5 महारथौ. Ś Ñ1 V1.3 D1.2.4.5.8.9.12 T3 चक्रुः (Ś Ñ1 V3 D2.4.8.12 वक्रुं) सर्वमशेषतः; Ñ2 B चक्रुस्तूर्णमशेषतः; D3 चक्रुः सर्वं विशेषतः. —Ñ1 damaged for 6c. —c) V1 D2.5.9 T3 -समाहारं; D1.3.4 M1 -समाचारं; Ck.t as in text (for -समारम्भं). Ñ2 B1–3 M6 ते(B2 अ)भिषेकं पुरस्कृत्य. —d) Ñ2 B1–3 M6 वसिष्ठं च; D9 ब्राह्मणैश्च; T1 पुराकृत्य; Ck.t as in text (for पुरस्कृत्य). Ñ2 पुरोहितं; D9 पुरस्कृतं; G3 पुरोधसः; Ck.t as in text (for पुरोधसम्). —Ñ1 V1 D1.2.4.5.9 T3 om. ef. —e) B1.2 D3 G2 प्रविष्टो; D6 वसिष्ठो; M5 प्रविष्टौ; Ck.t as in text (for प्रविष्टा). M5 राम- (for राज-). —f) Ñ2 D3 M6 -पुरोपमं (for -गृहोपमम्). D10.11 Ck.t राजानो ब्राह्मणास्तथा.

7 a) K (ed.) तथा (for ततो). Ś V3 D8.12 [ऽ]वधृतः; Ñ2 M8.9 ववृते; G2 विवृतः; M6 निर्वृत्तः (for ववृधे). Ñ1 V1 D1.2.4.9 अभिषेकस्तु स(D2 °स्तु सु; D9 °श्च सु) श्रीमान्; D3.5 T3 अभिषिक्तस्तु स श्रीमान्. —b) D3 शत्रुघ्नश्च महात्मनः; D5 शत्रुघ्नः सुमहामनाः; T3 शत्रुघ्नः सुसमाहितः. —D9 om. 7c–8b. —c) T2.4 G1.3 M4.8 -हर्षंकर-; G2 -हर्षपर- (for -हर्षकरः). Ś Ñ1 V1.3 D1–5.8.12 T3 प्रहर्षमतुलं चक्रे (Ñ1 V1.3 T3 लेभे). —d) Ś Ñ1 V1.3 B4 D1–5.8.12 भ्रातॄणां च(Ñ1 स्व-) (for राघवस्य). T3 भ्रातॄणां संनिधौ तदा. —After 7, Ś Ñ2 V3 B D3.6–8.10–12 T1.2.4 G M ins.:

981* अभिषिक्तस्तु शत्रुघ्नो बभूवादित्यसंनिभः ।
अभिषिक्तः पुरा स्कन्दः सेन्द्रैरिव मरुद्गणैः ।
अभिषिक्ते तु शत्रुघ्ने रामेणाक्लिष्टकर्मणा ।
पौराः प्रमुदिताश्चासन्ब्राह्मणाश्च बहुश्रुताः ।
कौसल्या च सुमित्रा च मङ्गलं कैकयी तथा ।
चक्रुस्ता राजभवने याश्चान्या राजयोषितः ।
ऋषयश्च महात्मानो यमुनातीरवासिनः ।
हतं लवणमाशंसुः शत्रुघ्नस्याभिषेचनात् ।

[M2.4.7 om. (hapl.) l. 1–2. L (ed.) transp. l. 1 and l. 2. —(l. 1) D6 च; G1 स (for तु). Ñ2 B D6.10.11 M1 काकुत्स्थो (for शत्रुघ्नो). Ś V3 D8.12 प्रभया; D3 T4 M6.8–10 बभाव्; D6.7.10.11 M3 बभौ च (for बभूव). Ñ2 B भ्रात्रा ज्येष्ठेन सादरं (for the post. half). —(l. 2) Ś Ñ2 V3 B1.3.4 D3.6–8.10–12 T4 M6.8–10 दिवौकसैः; M5 पुरामरैः (for मरुद्गणैः). B2 सेंद्रैरपि सुरासुरैः (for the post. half). —D3 om. l. 3. —(l. 3) Ñ2 B M2.7 काकुत्स्थे (for शत्रुघ्ने). —(l. 4) B1 समुदिताः (for प्रमुदिताश्). Ś Ñ2 V3 B D3.8.12 सर्वे; T1 M3 आसन् (for चासन्). —(l. 5) V3 D8.10.11 T4 केकयी. G2 तदा (for तथा). Ñ2 B कैकेयी चैव मंगलं (for the post. half). —(l. 6) G2 ते (for ता). M4 damaged for भवने याश्चा. Ś3 G1 M2 -योषिताः. —(l. 7) D3 कृते सति (for ऋषयश्च). V3 -तीरमाश्रिताः. —(l. 8) M6 तलं (for हतं). ❀ Ct: आशंसुराशशंसुर्निश्चितवन्तः. ❀ Ś Ñ2 V3 B D3.8.12 M1 [अ]भिषेचने.]

8 D9 om. 8ab (cf. v.l. 7). —a) D5 अभिषिक्तं च; M4 damaged (for ततोऽभिषिक्तं). Ś D8.12 T1.2 G3 M1.3.6 काकुत्स्थम् (for शत्रुघ्नम्). —c) B1–3 परमां (for मधुरां). —d) Ś1.3 V3 D8.12 M6 तेजश्चास्य; V1 तेजसश्च; D1–5.9 तेजसोस्य (for तेजस्तस्य). Ś विवर्धनं; Ñ1 वि*** (damaged); Ñ2 V3 B2 D8.12 M6 विवर्धयन्; V1 B4 D1–5.9 विवर्ध(B4 D3 °र्धि)नीं; B1 M1 [अ]भिवर्धयन्; B3 विमर्दयन् (for [अ]भिपूरयन्).

9 Ñ1 damaged for 9a. —a) Ñ2 B1.3 हि (for तु). M3 तु (for ते). V1 B2(*pr. m.* marg. also).4 D1–5.9 अमोघोयं शरो वीर; B2 अयं शरेश्वरो यस्ते. —b) T3 देयः (for दिव्यः). Ś2.3 D1.4 M2.7 -पुरंजय. —c) Ñ1 V1 D1–5.9 क्रूरं; B2 दैत्यं; B4 वीर (for सौम्य). —d) Ś V3 D8.12 मधुनः सुतं; B4 जयतां वर (for रघुनन्दन).

10 a) D4.6.8 स्पृष्टः (for सृष्टः). Ś Ñ V1.3 B D1–5.8.9.12 T3 M6 शत्रुघ्न (for काकुत्स्थ). —b) T1 M10 यथा (for यदा). M6 शिश्ये; M10 तेन (for शेते). Ñ V1 B D1–5.9 T3 जगत्येकार्णवे पुरा(B4 D2.9 °वीकृते). —c) Ś V3 D8.12 अच्युतो; G1.3 M3.5 अमितो; Cm.g.k.t as in text (for अजितो). D6.7.10.11 Cm दिव्यो (for देवो). —For 10cd, Ñ1 V1 D1–5.9 T3.4 subst.:

अदृश्यः सर्वभूतानां तेनायं हि शरोत्तमः ।
सृष्टः क्रोधाभिभूतेन विनाशार्थं दुरात्मनोः ।
मधुकैटभयोर्वीर विघाते वर्तमानयोः ॥ ११
स्रष्टुकामेन लोकाँस्त्रींस्तौ चानेन हतौ युधि ।
अनेन शरमुख्येन ततो लोकांश्चकार सः ॥ १२

नायं मया शरः पूर्वं रावणस्य वधार्थिना ।
मुक्तः शत्रुघ्न भूतानां महांस्त्रासो भवेदिति ॥ १३

यच्च तस्य महच्छूलं त्र्यम्बकेण महात्मना ।
दत्तं शत्रुविनाशाय मधोरायुधमुत्तमम् ॥ १४ G. 7. 69. 2 B. 7. 63. 25 L. 7. 66. 21

982* स्वयंभुवाथ देवेन वधार्थं हि सुरद्विषाम् ।

[D5 वै; D9 T3.4 च (for [अ]थ). D1.3-5 अमरद्विषां; D9 T3.4 सुरविद्विषां (for हि सुरद्विषाम्).] ;

while, Ñ2 B subst. :

983* स्वयंभुवा देवदेवेनाजितेन महात्मना ।

[B1 च देवेन याचितेन (for देवदेवेनाजितेन).]

11 a) Ñ V1 B2.3 D1-4.9 अदृश्यः (D1.4 °ष्टः) (for अदृश्यः). —b) Ś V3 D1.3.4.8.12 M6 येनायं; B2 सृष्टोयं (for तेनायं). Ñ V1 B D1-5.9 T3 शर उत्तमः (for हि शरोत्तमः). ❀ Cv : अदृश्यः सर्वभूतानां तथा(तेना ?)यं हि शरोत्तम इति पाठः. ❀ —c) B2 तेन; D4 स्पृष्टः; G2 एष (for सृष्टः). B2 क्रोधाभिहतेन; B3 °भूतानां; T1.2 G3 M1.5.10 कोपाभिभूतेन; G1 क्रोधेन महता; G2 क्रोधाभिघातेन; Cm.g.k.t as in text (for क्रोधाभिभूतेन). —Ñ1 damaged from र्थं in d up to ता in 984*. —d) Ñ2 B D5 विनाशाय (for विनाशार्थं). Ś V1.3 D3.8.12 सुरद्विषां (D3 °षोः); B2.3 D1.2.4.5.9 T3 दुरात्मनां; Ct as in text (for दुरात्मनोः). T1.2 G2.3 M1.3 Cg विनाशे सर्वरक्षसां. ❀ Cm : सृष्ट इत्यादि सार्धश्लोकमेकं वाक्यम् ; Ct : ' सृष्टः क्रोधाभिभूतेन प्रभो सर्वदुरात्मनोः ' इति पाठेऽभिविक्तत्वाच्छत्रुघ्नसंबोधनं प्रभो इति. ❀ —e) T4 एव (for वीर). —f) G1 M2.4.7.10 विनाशे(G1 °शो). D10.11 सर्वरक्षसां; T1.2 G2.3 M1.10 वर्तते प्रभो (for वर्तमानयोः). ❀ Cg : मधुकैटभयोर्वीर विघाते सर्वरक्षसामिति च पाठः. ❀ —For 11ef, Ñ1 V1 D1-5.9 T3 subst.; B2 ins. after 984*.

12 a) V3 M1 -कामस्तु; D12 -कामस्य (for -कामेन). M4 damaged for लोकांस्त्रींस् . Ś V3 B2 D3.12 G1 M5.6 transp. लोकांस् and त्रींस् . —b) Ś Ñ2 V3 B2.3 D8 तौ च तेन; B4 तेन तौ च (for तौ चानेन). B1 तौ हतौ हरिणा युधि. —For 11e–12b, Ñ1 V1 D1-5.9 T3 subst.; B2 ins. after 11 :

984* जगदर्थे विनिहतावसुरौ मधुकैटभौ ।

[Ñ1 damaged up to ता (cf. v.l. 11). B3 D5 जगत्यर्थे ; D4 जगदर्थं. V1 D9 हि निहताव (V1 °तौ with hiatus); B2 निहत्यैताव् ; D1.3.4 निहत्योग्राव् ; D5 निहत्याजाव् (for विनिहताव्).]

—After 12ab, D6.7.10.11 T1.2.4 G M1-5.7-10 ins. :

985* तौ हत्वा जगतो ह्यर्थे कैटभं च मधुं तथा ।

[T1.2 G2.3 हत्वा तु; G1 तौ गत्वा; M3 हत्वा तौ (by transp.); M9 तौ हित्वा (for तौ हत्वा). G2 [ऽ]पि; Ck as above (for हि). D6.7.10.11 T4 K (ed.) जनभोगार्थे(K [ed.]°र्थं) (for जगतो ह्यर्थे). D6.7.10.11 G1 M8-10 तु (for च). G3 M4 मधुनं (for च मधुं). T1 G2 M5 तदा (for तथा).]

—d) M10 तथा (for ततो). D6 लोकश् (for लोकांश्). Ñ2 B1 ह (for सः). G2 ततो लोकान्स राक्षसः (sic).

13 a) V3 श्रुतः (for शरः). B4 transp. मया and शरः. —b) B4 जिघांसया (for वधार्थिना). Ñ1 V1 D1-5.9 T3 दशग्रीवजिघांसया. —c) B4 सृष्टः; D3 युक्तः (for मुक्तः). Ñ1 V1 B4 D1-5.9 मा त्रासो; T3 मा नाशो; M3 लोकानां (for भूतानां). G3 न मुक्तः शत्रुभूतानां. —d) Ñ1 V1 D2.9 T3 भूतानां तु; D6 महात्रासो; D7.10.11 Cgp.t महान्त्रासो; Cg.k.t as in text (for महांस्त्रासो). Ñ1 [इ]ह (for [इ]ति). Ś Ñ2 V3 B1-3 D3.12 M6 त्रासो मा भून्महानिति; B4 लोकानां स्वत्वभूदिति (sic); D1.3-5 भूतानां भवितेति ह(D1 सः). —After 13, Ñ2 B ins. :

986* अनेन तं सुरगणशत्रुमाहवे
हनिष्यसे रघुवर नात्र संशयः ।
निहत्य तं पुरवरमेव च स्वयं
निवेशय त्रिदशपुरोपमं लघु ।

Colophon

शरं दत्त्वाथ शत्रुघ्ने राघवः परवीरहा । [5]
पुनश्चैवमुवाचेदं वचनं वाक्यकोविदः ।

[(l. 1) G (ed.) मुनि- (for सुर-). — (l. 2) B1.3 हनिष्यसि. — (l. 3) B3 रिपुवरम् (for पुरवरम्). Ñ2 तु (for च). B2 उत्तमं (for एव च). B1 द्वयं (for स्वयं).

—*Sarga name* : Ñ2 B शत्रुघ्नाभिषेकः. —*Sarga no.* (figures, words or both) : Ñ2 om.; B1 68 ; B2 53 ; B3 66 ; B4 69. — (l. 5) Ñ2 B2-4 तु (for [अ]थ). B2.3 शत्रुघ्नं.]

14 a) Ś Ñ1 V3 B4 D1-5.8.9 T3 तु; M6 तत् (for च). Ñ2 B1-3 यत्तस्य सु-(Ñ2 तु); V1 यस्य तच्च; D6.7 T4 M1 तस्य तच्च; G2 यस्य तस्य; Cg.k.t as in text (for यच्च तस्य). —b) D5 शंकरस्य महात्मनः. —c) D3 -विघाताय (for -विनाशाय). —d) V1 (with hiatus) राघव (for आयुधम्). Ś1.2 D3 मध्ये * * *; Ñ2 B1-3 पितुरायुधम् ; (for मधोरायुधम्). —Ñ1 damaged from त्तमम् up to पूज्य in 15b.

G. 7. 69. 3
B. 7. 63. 26
L. 7. 66. 22

तत्संनिक्षिप्य भवने पूज्यमानं पुनः पुनः ।
दिशः सर्वाः समालोक्य प्राप्नोत्याहारमात्मनः ॥ १५
यदा तु युद्धमाकाङ्क्षन्कश्चिदेनं समाह्वयेत् ।
तदा शूलं गृहीत्वा तद्भस्म रक्षः करोति तम् ॥ १६
स त्वं पुरुषशार्दूल तमायुधविवर्जितम् ।
अप्रविष्टपुरं पूर्वं द्वारि तिष्ठ धृतायुधः ॥ १७
अप्रविष्टं च भवनं युद्धाय पुरुषर्षभ ।
आह्वयेथा महाबाहो ततो हन्तासि राक्षसम् ॥ १८
अन्यथा क्रियमाणे तु अवध्यः स भविष्यति ।
यदि त्वेवं कृते वीर विनाशमुपयास्यति ॥ १९
एतत्ते सर्वमाख्यातं शूलस्य च विपर्ययम् ।
श्रीमतः शितिकण्ठस्य कृत्यं हि दुरतिक्रमम् ॥ २०

इति श्रीरामायणे उत्तरकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

---

15 Ñ1 damaged up to पूज्य in ^{b} (cf. v.l. 14). —^{a}) Ñ2 M10 तं; G2 यच्; M1.2.7 स (for तत्). Ś Ñ2 B2.3 D8.12 तु; B1 तु वि- (hypm.); T1.2 G2.3 च; T3 M3–5.8–10 स; M1.2.7 तं (for सं-). B1 भुवने. —^{b}) V1 D2 पूज्यमाने; G2 M5 °मान: (for °मानं). M5 om. (hapl.) second पुन:. Ś Ñ V1.3 B D1–5.8.9.12 T3 M6 मुहुर्मुहु: (for पुन: पुन:). —^{c}) D6.7.10.11 T4 M3 समासाद्य (for समालोक्य). —^{d}) D6.7.10.11 T4 M1.3.9 उत्तमं (for आत्मन:). T1.2 G2.3 (all with hiatus) आहारमुपपा(T2 °सा)दयन्. —For 15^{cd}, Ś Ñ V1 B D1–5.8.9.12 T3 subst.:

987* दिशो विलोकयन्सर्वाश्चरत्याहारकर्मवान् ।

[Ñ1 B1.3.4 विलोभयन्; B2 विमोहयन्; D1–4.9 विलोडयन् (for विलोकयन्). B2 [अ]धम- (for [आ]हार-). Ś D8.12 -कर्म तत्; Ñ2 B1.4 -धर्मतां; B3 -धर्मत:; T3 -कांक्षया (for -कर्मवान्).]

16 ^{a}) Ś D8.12 सु- (for तु). Ñ2 B2–4 युद्ध(B3 °द्धा)-कांक्षी तं(B2.3 सन्); B1 स पुराकांक्षी तं (hypm.); D2.9 T1.2 G2.3 M1.2.4.5.7 Ck युद्धमाकांक्षी; G1 कश्चिदेनं वै; M6 योद्धुमाकांक्षेत्; Cg.k as in text (for युद्धमाकाङ्क्षन्). —^{b}) D6.7.10.11 यदि कश्चित्; G1 युद्धाय हि; M4 क * * नं (for कश्चिदेनं). T1 G2.3 M9 समाह्वयत्; M6 महाबलं (for समाह्वयेत्). Ñ V1 B1.2.4 D1–5.9 कश्चि(Ñ V1 कश्चि)दाह्वयते रिपु:(Ñ1 V1 स्वयं; D1–5.9 स तं); B3 किंचिदागच्छते रिपु:. —^{c}) Ś Ñ1 V1 B4 D1–4.6–12 T3 G3 M5.6 तु; Ñ2 B1 D5 स; V3 [ए]वं; B2.3 सु-; T1.2.4 G1.2 M3.8–10 तं (for तद्). M1 ततो गृहीत्वा तं शूलं. —^{d}) D6.7.10.11 हि; T3 स:; T4 M9 तत् (for तम्). Ś Ñ1 V1 D1–4.8.9.12 शत्रुं(Ñ1 V1 °त्रून्) भस्मीकरोति स:; Ñ2 B3 भस्मसात्कुरुते रिपुं(B3 युधि); B1.2.4 भस्म तं (B1 प्र)कुरुते युधि; D5 भस्मी शत्रुन्करोति स:; T1.2 G2.3 M3.8.10 भस्म कुर्यात्स(M8.10 कुर्वीत) राक्षस:; M1 तं भस्म कुरुते च स:.

17 ^{a}) T4 तत् (for स). —^{b}) Ś V3 D8.12 आहार- (for आयुध-). Ś D8.12 -विनिर्गतं; V3 D6.7.10.11 Cg.t -विनाकृतं; Cv.m as in text (for -विवर्जितम्). —For 17^{ab}, Ñ V1 B D1–5.9 T3 subst.:

988* स त्वं निवर्तमानं तं दृष्ट्वाहारप्रचारत: ।

[V1 D1.3.4 निर्धावमानं; D5 निर्गच्छमानं; D9 निर्धार्यमानं; (for निवर्तमानं). Ñ V1 B1.3 D2.9 तु; D5 च (for तं). B2 स त्वं दुर्वारमायांतं; T3 स त्वं तं दानवं क्रूरं (for the prior half). V1 [आ]चार- (for [आ]हार-). Ñ1 damaged from रत: up to ^{c}. D1–4.9 T3 -प्रचारिणं (for -प्रचारत:). D5 तं दृष्ट्वाहारकर्मणि (for the post. half).]

—M5 om. 17^{c}–19^{b}. —^{c}) Ś Ñ2 V3 B D6–8.10–12 अप्रविष्टं(Ś3 °ष्ट; D8 °ष्टे) पुरं(Ś V3 D8.12 °रे). T2 -पुरद्वारं (for -पुरं पूर्वं). V1 D1–5.9 T3 प्रविष्ट:(T3 °ष्य) प्रथमं क्षिप्रं; G1 M2.4.6.7.10 गृहीत्वा सर्वशस्त्राणि. —^{d}) M4 damaged for द्वारि तिष्ठ. Ś D8.12 करे; D6 T2 द्वारे (for द्वारि). B1 तिष्ठेर्; B2 D9 T3 तिष्ठन् (for तिष्ठ). T4 द्वारि तिष्ठायुधैर्वृत:.

18 M5 om. 18 (cf. v.l. 17). —^{a}) Ś Ñ V1.3 B D1–5.8.9.12 अगृहीता(Ś2.3 D8 अगृह्यता; B2 प्रगृहीत्वा; D2 अगृहीत्वा)युधं चैव. —^{b}) Ñ1 V1 D1–5.9 T3 रघुनंदन; D11 M6 भरतर्षभ (for पुरुषर्षभ). —D1.3(after 989*).4 repeat 18^{cd} after 56. 1. —^{c}) V1 आह्वयेस्त्वं. V3 महात्मानं; G1 महाभाग (for महाबाहो). —^{d}) V3 T1.2 G M2–4.7 तदा (for ततो).

19 M5 om. 19^{ab} (cf. v.l. 17). Note hiatus between ^{a} and ^{b}. —^{a}) G2 युध्यमाने (for क्रियमाणे). —^{b}) Ś Ñ1 V1.3 D1–5.8.9.12 न वध्य:; B1 वध्यश्च (for अवध्य:). Ś Ñ1 V1 D1–5.8.9.12 T3 स्यात्स(Ś V1 D12 °त्सु; D8 °त्सु) वीर्यवान् (for स भविष्यति). —^{c}) Ś V3 D8.12 सद्यस्त्वेवं; Ñ2 B सत्यं चैव; M1 damaged; M6 यद्यप्येवं; Cg.k.t as in text (for यदि त्वेवं). B2 D7.10.11 T1 Ct कृतं; M8 भवेद्; Cg.k as in text (for कृते). Ñ1 V1 D1–5.9 सद्यश्च(V1 सद्य: स) पुरुषव्याघ्र; D6 यस्त्वेवं कुरुते वीर.

20 B2 reads 20 twice. —^{ab}) V3 B3 T G2.3 एवं; Cg.k.t as in text (for एतत्). M5 तु (for ते). Ñ1 damaged for र्वमाख्यातं शू. D10.11 T2 M1 Cg.k.t विपर्यय:; Cm as in text (for विपर्ययम्). Ś Ñ1 V1 B2 (both times).4 D1–5.8.9.12 T3 शूलहस्त: सु(B2 D1.3–5.8.9.12 T3 स)दुर्जय:; Ñ2 शूलं तस्य सुदुर्जयं. —^{c}) Ś Ñ2 V3

५६

एवमुक्त्वा तु काकुत्स्थं प्रशस्य च पुनः पुनः ।
पुनरेवापरं वाक्यमुवाच रघुनन्दनः ॥ १
इमान्यश्वसहस्राणि चत्वारि पुरुषर्षभ ।
रथानां च सहस्रे द्वे गजानां शतमेव च ॥ २
अन्तरापणवीथ्यश्च नानापण्योपशोभिताः ।
अनुगच्छन्तु शत्रुघ्न तथैव नटनर्तकाः ॥ ३
हिरण्यस्य सुवर्णस्य अयुतं पुरुषर्षभ ।
गृहीत्वा गच्छ शत्रुघ्न पर्याप्तधनवाहनः ॥ ४
बलं च सुभृतं वीर हृष्टपुष्टमनुत्तमम् ।
संभाष्य संप्रदानेन रञ्जयस्व नरोत्तम ॥ ५ G. 7.70.5 B. 7.64.5 E. 7.67.5

$B_{1.3}$ $D_{8.12}$ M_6 श्रीमता शितिकंठेन. —^{d}) Ś $D_{8.12}$ कृतो; Ñ$_1$ V_1 B_2(first time).$_4$ $D_{1.3-5.9}$ कीर्तिर्; Ñ$_2$ $B_{1.2}$ (second time).$_3$ $M_{6.8}$ कृतं; G_1 सत्यं; Cg.k.t as in text (for कृत्यं). V_3 न कृतं; D_2 कीर्तिश्च (for कृत्यं हि). Ś $D_{8.12}$ दुरतिक्रमः; Ñ$_1$ V_1 B_2(first time).$_4$ $D_{1-5.9}$ °क्रमा (for °क्रमम्). —After 20, Ś Ñ$_1$ V_1 $D_{1-5.8.9.12}$ T_3 ins.:

989* तस्मादनेन विधिना युध्येथा सुनिकण्टकम् ।

—Thereafter, D_3 repeats 18^{cd}.

Colophon: Ñ$_2$ V_1 $D_{1-5.9}$ T_3 om. colophon. —*Sarga name*: Ś $D_{8.12}$ शरप्रदानिकः; Ñ$_1$ V_3 शरप्रदानं; B भेदकथनं(B_1 °नो). —*Sarga no.* (figures, words or both): Ś Ñ$_1$ V_3 D_{12} om.; B_1 69; B_2 54; B_3 67; B_4 70; $D_{6.7.10.11}$ $T_{1.2}$ G $M_{1-5.7.9.10}$ 63; D_8 60; T_4 71; M_6 61; M_8 62. —After colophon, T_4 concludes with श्रीरामार्पणमस्तु । श्रीरामाय नमो नमः; G $M_{1.2.5.8}$ with श्रीरामाय नमः; M_{10} with श्रीरामचन्द्राय नमः.

56

☞ V_2 missing for Sarga 56 (cf. v.l. 952*). Ñ$_2$ V_1 $D_{1-5.9}$ T_3 cont. the previous Sarga.

1 ^{a}) V_3 $D_{6.7.10.11}$ च; $D_{1.3-5}$ स; G(ed.) [अ]थ (for तु). B_{1-3} इति संदिश्य (for एवमुक्त्वा तु). Ś Ñ V_1 B_4 $D_{1-5.8.9.12}$ T_3 शत्रुघ्नं; V_3 B_{1-3} $T_{1.2}$ G_3 $M_{3.9.10}$ काकुत्स्थः (for काकुत्स्थं). —^{b}) $Ś_{1.3}$ D_4 प्रशंस्य; Ñ$_1$ V_1 प्रशास्य; B_4 संदिश्य; M_1 प्रविश्य; Ct as in text (for प्रशस्य). D_{12} om. (hapl.) second पुनः. B_{1-3} शत्रुघ्नं सु(B_1 स) महायशाः. —^{c}) Ñ$_1$ damaged from रे up to क्य. B_4 अपि (for एव). —^{d}) Ś V_3 $D_{8.12}$ वदतां वरः; $T_{1.2}$ $G_{2.3}$ $M_{8.9}$ रघुनंदनं; M_1 रघु *** (for रघुनन्दनः). B_2 प्रत्युवाच च राघवः. —After 1, $D_{1.4}$ repeat 55. 18^{cd}; while D_6 T_4 read 4 after 1.

2 ^{b}) Ś Ñ V_3 $D_{8.12}$ M_5 रघुनंदन (for पुरुषर्षभ). —^{c}) Ś Ñ$_1$ V_3 $D_{1.3-5.8.12}$ M_6 द्वे (for च). D_4 सहस्रं. Ś Ñ$_1$ V_3 $D_{1.3-5.8.12}$ M_6 तु; M_3 च (for द्वे). Ñ$_2$ V_1 B $D_{2.6.7.9-11}$ $T_{3.4}$ transp. द्वे and च. T_1 $G_{2.3}$ सहस्राणि (for सहस्रे द्वे). —^{d}) Ś Ñ$_1$ $V_{1.3}$ $D_{2.5.8.9.12}$ द्विपानां (for गजानां). Ñ$_2$ $B_{1.2.4}$ $D_{6.7.10.11}$ T_4 $M_{3.6}$ उत्तमं (for एव च). Ś Ñ$_1$ $V_{1.3}$ $D_{2.5.8.9.12}$ T_3 M_1 तु($V_{1.3}$ T_3 M_1 च; D_5 त्रि) शतं तथा; B_3 उत्तमं शतं; T_2 च सहस्रशः (for शतमेव च). $D_{1.3.4}$ द्विपोत्तमशतं तथा.

3 ^{a}) Ñ$_2$ B चत्वर- (for अन्तर-). M_8 -[अ]वर- (for -[आ]पण-). —^{b}) M_8 Ck नानावर्ण्य-(Ck °र्णो-); Cm.g.t नानापण्य- (as in text). —^{c}) Ś Ñ$_1$ $V_{1.3}$ D $T_{3.4}$ $M_{3.6}$ काकुत्स्थं(Ñ$_1$ D_{11} °त्स्थ; D_9 °*); $T_{1.2}$ G_3 $M_{1.2.4-10}$ शत्रुघ्नं (for शत्रुघ्न). —G_1 om. (hapl.) 3^d–4^c. —^{d}) D_1 तव; D_4 तं च (for तथा). D_5 [ए]ते (for [ए]व). ❀ Cg: नानावर्णोपशोभिता इति पाठे वर्णा ब्राह्मणादयः ।; Ct: 'नानावर्णोपशोभिताः' इति पाठे नानावर्णैर्ब्राह्मणादिभिरुपशोभिता इत्यर्थ इति कतकः । 'पण्य' इति पाठ एव युक्तः. ❀ —After 3, B_2 (marg.) ins.:

990* अन्ये च बहुशो यान्तु नानाकार्यविशारदाः ।

4 G_1 om. 4^{a-c} (cf. v.l. 3). D_6 T_4 read 4 after 1. Note hiatus between ^{a} and ^{b}. —^{a}) D_5 हैरण्यस्य. Ñ$_1$ damaged from second स्य in ^{a} up to तं in ^{b}. Ś V_3 $D_{8.12}$ हिरण्यं च सुवर्णं च; Ñ$_2$ B_{1-3} D_6 T_4 M_6 अयुतं च (D_6 T_4 M_6 अ[D_6 प्र]युतानि) हिरण्यं च (Ñ$_2$ B_2 T_4 °ण्यस्य). —^{b}) Ś V_3 $D_{8.12}$ अमितं; V_1 $D_{1-5.7.9-11}$ T_3 M_3 Ct नियु(V_1 °य)तं; $M_{2.4.5.7.8.10}$ प्र(M_5 [to avoid hiatus] ह्य)युतं (for अयुतं). Ñ$_2$ $B_{1.2}$ सुवर्णं(B_1 °र्ण-; B_2 तथैव) नियुतं तथा; B_3 सुवर्णस्यायुतं तथा; B_4 नियुतं प्रयुतं तथा; D_6 T_4 M_6 धनधान्यं च पुष्कलं(M_6 वीर्यवान्). —^{c}) Ś Ñ$_1$ $V_{1.3}$ B_4 $D_{1-5.7-12}$ T_3 आदाय (for गृहीत्वा). D_6 सौमित्रे; $T_{1.2}$ $G_{2.3}$ वस्त्राणि (for शत्रुघ्न). —^{d}) V_3 प्रवृद्ध- (for पर्याप्त-). Ś Ñ$_1$ $V_{1.3}$ B $D_{1-5.8.9.12}$ T_3 M_1 -बल-; Cm.g.t as in text (for -धन-). $D_{2.9}$ -वाहनं.

5 ^{a}) M_8 त्वं (for च). B_2 D_9 सु(D_9 सं)वृतं; T_3 सुमहद्; G_2 $M_{5.6}$ सुभृशं; M_8 सुहृदं; Cg.t as in text (for सुभृतं). D_5 चतुर्विधं (for च सुभृतं). B_1 चैव; B_3 वीरं (for वीर). Ś V_3 $D_{8.12}$ सुप्रभूतं च (for सुभृतं वीर). —^{b}) Ś Ñ$_1$ V_3 $D_{1-5.8.9.12}$ M_6 तुष्ट-; D_7 हृष्टं (for हृष्ट-). Ś V_3 $D_{8.12}$ M_6 -पुष्ट-; $D_{1.6.7.10.11}$ T_4 Ct -तुष्टम् (for -पुष्टम्). Ś V_3 $D_{8.12}$ M_6 -जनाकुलं(V_3 M_6 °वृतं); Ñ$_1$ $D_{1-5.7.9-11}$

G. 7.70.6
B. 7.64.6
L. 7.67.6

न ह्यर्थास्तत्र तिष्ठन्ति न दारा न च बान्धवाः ।
सुप्रीतो भृत्यवर्गस्तु यत्र तिष्ठति राघव ॥ ६
अतो हृष्टजनाकीर्णां प्रस्थाप्य महतीं चमूम् ।
एक एव धनुष्पाणिस्तद्गच्छ त्वं मधोर्वनम् ॥ ७
यथा त्वां न प्रजानाति गच्छन्तं युद्धकाङ्क्षिणम् ।
लवणस्तु मधोः पुत्रस्तथा गच्छेरशङ्कितः ॥ ८
न तस्य मृत्युरन्योऽस्ति कश्चिद्धि पुरुषर्षभ ।
दर्शनं योऽभिगच्छेत स वध्यो लवणेन हि ॥ ९
स ग्रीष्मे व्यपयाते तु वर्षरात्र उपस्थिते ।
हन्यास्त्वं लवणं सौम्य स हि कालोऽस्य दुर्मतेः ॥ १०

T4 G2.3 M2.4.5.7.9 Ct अनुद्ध(D5 °ब्र; M9 °द्यु)तं(D4 °द्वयं); Ñ2 B अनिंदितं (for अनुत्तमम्). —^{c}) D7.10.11 T1.2 G2.3 M2.4.5.7.8 Cg.t संभाषा-(M2.7 °ष्य) (for संभाष्य). M6 संभाषण- (for संभाष्य सं-). T1 moth-eaten from न up to रो in ^{d}. D6 संविधानेन (for संप्रदानेन). —For 5^{cd}, Ś Ñ V1.3 B D1–5.8.9.12 T3 subst.:

991* वश्यं सान्त्वप्रदानाभ्यां कुरुष्व रघुनन्दन ।

[D1.4 रम्यं; T3 पश्य (for वश्यं). Ś D8.12 साम-; Ñ2 B1.2.4 मान- (for सान्त्व-). B2 D3 -प्रसादाभ्यां (for -प्रदानाभ्यां). B3 संयुक्तं दानमानाभ्यां (for the prior half). Ñ2 B कुर्यास्त्वं (for कुरुष्व).]

6 ^{a}) Ś3 D2.8.12 तव; M3 यत्र (for तत्र). D5 सिध्यंति; T2 तिष्ठंते (for तिष्ठन्ति). M6 न ह्यर्थस्तिष्ठते यत्र. —^{b}) D6 दासा (for दारा). G2 तु (for च). M2.7 च दारा न (for दारा न च). T3.4 पर्याप्तधन(T3 °सं बल)वाहनः (T4 °नाः). —^{c}) B1 न सुतो; B2 सुप्रीता; B3.4 M1.4.5 सुभृतो; D6.7 T1.2.4 G M2.3.7–10 सुहृदो; M6 न सुहृद् (for सुप्रीतो). D3 वधु- (for भृत्य-). B2 D6.7 G1 -वर्गास् (for -वर्गस्). Ś V1 B1.4 D6.8.12 T1.2 G1.3 M1.2.5.6.8 च; B2 *; G(ed.) न (for तु). —^{d}) M3.6 तत्र (for यत्र). D7 तिष्ठसि; G1 M6 तिष्ठंति; M5 नैव तु (for तिष्ठति). B1 M1 राघवः; D6 M2.4.7–10 राक्षसः; Cm as in text (for राघव). D1.3.4 नास्ति वदान्यता(D3 °था) (for तिष्ठति राघव).

7 ^{a}) Ś Ñ V1.3 B D1.3–5.8.12 M6 स त्वं; D9 संप्र-; T1.2.4 G M3 Cg ततो; T3 सत्वां; Cv.m.k.t as in text (for अतो). M1 बहु- (for हृष्ट-). D2 स प्रहृष्ट- (for अतो हृष्ट-). V3 -सम- (for -जन-). Ñ1 D2.4.8 -[आ]कीर्णं(Ñ1 °र्णां) (for -[आ]कीर्णां). —^{b}) Ñ1 B2.3 D1–5.9 T3 संस्था(D2.9 °प्रा)प्य; Cv.m.g.t as in text (for प्रस्थाप्य). —^{d}) D10.11 Ct गच्छ त्वं (for तद्गच्छ). Ś Ñ V1 B3.4 D1–5.8.9.12 उप(Ñ1 V1 D2.9 अनु) गच्छ (D8 °च्छन्); V3 उपगम्य; B1.2 T3 उप(T3 अनु) गच्छेर् (for तद्गच्छ त्वं). D10.11 T1.2 G M2.4–7.10 Cm.k.t मधुनो (for त्वं मधोर्). Ś V2 B2 D8.12 वने; Ñ V1 D1–5.9 T3 सुतं; D11 बलं (for वनम्).

8 ^{a}) T1 त्वा; M1 स (for त्वां). Ś2.3 तु (for न). Ñ B D1–5.9 T3 च(B3 स) त्वां; V1 न त्वां (by transp.) (for त्वां न). Ś Ñ1 V1 D2.8.9.12 T3 प्र(Ś1 V1 वि; Ñ1 D2.9 T3 न)जानीयाद्; N2 B D1.3–5 न जानाति; M5 प्रजानंति; M6 प्रजानीते (for प्रजानाति). —^{b}) Ś Ñ1 V1 D2.8.9.12 आयांतं; T2 गच्छ त्वं; T3 आगतं; M1 भवंतं (for गच्छन्तं). M2 युद्धकांक्षिणं तं (hypm.). —^{c}) M5 लवणं. Ś1.2 Ñ V1.3 B D1.2.4.5.8.9.12 स (for तु). D3 स लवणः (for लवणस्तु). Ś1 मधु- (for मधोः). T1.2 G2 M1.2.4.5.7 मधुनः (for तु मधोः). G3 मधुनो लवणः (for लवणस्तु मधोः). M5 पुत्रं (for पुत्रस्). M6 मधुपुत्रस्तु (for तु मधोः पुत्रस्). —^{d}) M5 तदा (for तथा). D6 M5 गच्छेद्; T4 न स्याद् (for गच्छेर्). D10.11 Cg.k.t अशंकितं (for अशङ्कितः). Ś Ñ1 V1.3 D1–5.8.9.12 T3 निशंकितो व्रज(Ñ1 °जन्); Ñ2 B त्वं गच्छ राघव; M1 त्वमविशंकितः (for गच्छेरशङ्कितः).

9 ^{b}) T2 वा (for हि). G1 पुरुषोत्तम (for पुरुषर्षभ). —For 9^{ab}, Ś V3 B D8.12 M3 subst.:

992* न ह्यन्यथा भवेन्मृत्युस्तस्य घोरस्य रक्षसः ।

[V3 * * * रस्य (lacuna) (for तस्य घोरस्य). B1 (marg. also as above) सर्वशः (for रक्षसः).];

while Ñ V1 D1–5.9 subst. for 9^{ab}; whereas Ś V3 B2.4 D8.12 cont. after 992*:

993* आख्याता न हि तस्यास्ति कश्चिन्मृत्युभयात्किल ।

[B4 तु (for हि). Ñ V1 B2.4 D2.9 -भयान्वितः (for -भयात्किल).]

—(l. 133) Ś$_{2.3}$ नृत्यंत (for नृत्यन्ति). Ś $D_{8.12}$ दूतास्; Ñ$_1$ $V_{1.3}$ $D_{1-5.9}$ सुतास्; D_6 नरास् (for सुरास्). V_1 तस्य च; D_5 ते तत्र (for ते तस्य). —(l. 134) V_1 तस्य (for तुल्य-). $D_{2.9}$ उच्यते यः (for तुल्यतेजः-). Ś$_{1.2}$ Ñ$_1$ D_2 -प्रभावस् (Ñ$_1$ °श्); M_3 -प्रतापास् (for -प्रभावास्). Ñ$_1$ च (for ते). Ś $D_{8.12}$ ऋषेस्तस्य (for कपिलस्य). Ñ$_1$ च; D_5 ते (for वै). —(l. 135) V_3 योसौ; M_3 नाति- (for नासौ). B_4 शसम् (for दृष्टस्). —(l. 136) M_3 ततो (for तदा). V_3 T_4 M_3 राम (for तेन). Ñ$_1$ रावणस्तदा; V_3 T_4 M_3 रावणः प्रभो; B_4 राम राक्षसः (for राम रावणः). —(l. 137) Ś Ñ$_1$ $V_{1.3}$ $D_{2.8.12}$ छिन्न-; M_3 भिन्न- (for खिन्न-). $D_{1.4}$ स्निग्धरोमा (for खिन्नगात्रो). V_3 नरव्याघ्र (for नगप्रख्यो). B_4 स्पृष्टगात्रं हि तद्रक्षो (for the prior half). $D_{1.4}$ पातितो (for पतितो). —Ś $D_{8.12}$ om. l. 138. —(l. 138) V_3 वासरे सं- (for वाक्शरैस्तं). $B_{3.4}$ स्तंभितो (B_4 °ते)वाशु (B_4 °थ); D_6 तं विभेदश्च (for तं बिभेदाशु). Ñ$_2$ B_4 पिशुने (for पिशुनो). Ñ$_1$ वृक्षं परशुना यथा (for the

आजगाम महातेजा यत्र ते सचिवाः स्थिताः ।

Colophon

श्रुत्वैतत्तु ततो राम आश्चर्यमिति चाब्रवीत् ।
पूज्यमानाः स्थितास्तत्र ये रामस्य समीपतः ।
तेऽप्याश्चर्यमिति प्राहुर्वानरा राक्षसास्तथा ।
विभीषणश्च धर्मात्मा पार्श्वस्थो वाक्यमब्रवीत् ।
आश्चर्यं स्मारितोऽस्म्यद्य यत्तद्वृत्तं पुरातनम् ।
अगस्त्योऽथाब्रवीद्रामं सर्वमेतच्छ्रुतं त्वया ।
दृष्टः सभाजितश्चासि राम गच्छामहे वयम् ।

3

V3 ins. after 35.53ab; D9 ins. after Sarga 36; D7.10.11 cont. after colophon read after l. 46 of App. I No. 4; T4 M3 ins. after l. 2 of 736* (T4 after addl. colophon):

एतच्छ्रुत्वा तु निखिलं राघवोऽगस्त्यमब्रवीत् ।
य एषऋक्षरजा नाम वालिसुग्रीवयोः पिता ।
जननी का च भगवन् त्वया परिकीर्तिता ।
वालिसुग्रीवयोर्ब्रह्मन्माता नाम च तत्कृता ।
एतद्ब्रह्मन्समाचक्ष्व कौतूहलमिदं हि नः ।
स प्रोक्तो राघवेणैवमगस्त्यो वाक्यमब्रवीत् ।
शृणु राम कथामेतां यथापूर्वं समासतः ।
नारदः कथयामास ममाश्रममुपागतः ।
कदाचिद्दटमानोऽसावतिथिर्मामुपागतः ।
अर्चितस्तु यथान्यायं विधिदृष्टेन कर्मणा ।
सुखासीनः कथामेतां मया पृष्टः स कौतुकात् ।
कथयामास धर्मात्मा महर्षे श्रूयतामिति ।
मेरुर्नगवरः श्रीमाञ्जाम्बूनदमयः शुभः ।
तस्य यन्मध्यमं शृङ्गं सर्वदैवतपूजितम् ।
तस्मिन्दिव्या सभा रम्या ब्रह्मणः शतयोजना ।
तस्यामास्ते सदा देवः पद्मयोनिश्चतुर्मुखः ।

---

post. half). —(l. 139) Ś D8.12 शीघ्रेण; D2 [अ]दीर्घेण (for दीर्घेण). V1 B4 रावणः (for राक्षसः). —(l. 140) B3 जगाम च (for आजगाम). Ñ1 V1.3 D5 M3 हतौजाश्च (M3 °स्तु); B1 D2.9 महौजाश्च (for महातेजा). Ñ1 गताः (for स्थिताः). —After l. 140, V3 T4 M3 ins.:

11* तैरेव सहितो लङ्कां जगामाशु दशाननः ।

Colophon. V1 M3 om. Ñ1 reads colophon after l. 141; while D3.5 read after l. 145. —*Sarga name*: Ś1 Ñ B1.3.4 D1.3.4.6-8 महापुरुषदर्शनं (D1 °नो); Ś2.3 पुरुषदर्शनं (Ś3 °नः); V3 D12 पुरुषोत्तमदर्शनं; D5 अगस्त्यरामसंवादे महापुरुषवर्णनो. —*Sarga no.* (figures, words or both): Ś Ñ1 V3 B1.3 D7.12 om.; Ñ2 31; B4 20; D1.4.5 38; D3 T4 37; D6 4; D8 36; D9 32; D10.11 50. —After colophon, T4 concludes with श्रीरामार्पणमस्तु.

—Ñ2 B1.3.4 D6.7.10.11 T4 ins. l. 141–147 after 7.30 (for var. in B1.3 D6.7.10.11 T4 cf. 643*). —D12 ins. ॐ before l. 141. —(l. 141) D1.4 [ए]व; D2.5.9 [ए]वं; D3 [ए]नं (for [ए]तत्). D6 स (for तु). V3 दृष्ट्वैनं तु. Ñ1 V1 M3 श्रुत्वैतद्वचनं प्राह (M3 सर्वं) (for the prior half). Ñ1 V1 M3 राघवः (for चाब्रवीत्). V3 इदमब्रवीत्. —(l. 142) V3 D1.3-5 समीपगाः. —(l. 143) D2 तथा (for तेऽपि). D2.9 राक्षसैः सह (for राक्षसास्तथा). Ñ1 V1.3 D1.3-5 M3 आश्चर्यमिति ते (V3 सं; M3 तत्) प्राहुर्वानरा (V3 °हू राघवा) राक्षसैः सह. —For l. 141–143, Ñ2 B4 subst.; while D3 ins. l. 2 only after l. 141:

12* आश्चर्यमिति तद्रामो लक्ष्मणश्चाब्रवीत्तदा ।
अगस्त्यवचनं श्रुत्वा वानरा राक्षसास्तथा ।

[Cf. l. 1–2 of 643*. —(l. 2) D3 °स्य वचः. Ñ2 तदा (for तथा).]

—(l. 144) Ñ V1.3 B4 D1–5.9 M3 तु (Ñ2 च) रामस्य (for च धर्मात्मा). V3 रामम् (for वाक्यम्). —(l. 145) V3 ह्यस्य (for ऽस्म्यद्य). Ñ1 श्रावितो मेद्य; B4 श्रावितोस्म्यद्य (for स्मारितोऽस्म्यद्य). Ñ1 D8 वस्तु; V3 यत्र (for यत्तद्). V3 भुक्तं; D2 भूतं; D9 रूपं (for वृत्तं). —(l. 146) Ñ2 V1.3 B4 D2.3.5.9 M3 अथागस्त्यो (by transp.) (for अगस्त्योऽथ). M3 सर्वम् (for रामं). V3 D1.2.4 एतत्सर्वं (by transp.); M3 एतद्राम (for सर्वमेतच्). Ś D8.12 कृतं त्वया; D2 मया श्रुतं (for श्रुतं त्वया). Ñ V1 B4 D3.5.9 एतत्सर्वं श्रुतं मया (for the post. half). —(l. 147) Ś D8.9.12 [अ]स्मि; Ñ2 V1.3 D2 [अ]पि (for [अ]सि). Ñ1 सभाजितस्यापि (for °तश्चासि). M3 दृष्टा सभाजिताश्चापि (for the prior half). Ñ V1.3 B4 D1–5.9 M3 यास्यामहे (for गच्छा°). —After l. 147, M3 ins.:

13* तस्य तद्वचनं श्रुत्वा रामो रमयतां वरः ।

3

V3 om. l. 1–8. —(l. 2) D9 एषऋक्षराजो. —(l. 3) M3 हि (for च). D10.11 भवनं (for भगवन्). D9 T4 कास्य भवनं (T4 °*) (for का च भगवन्). D10.11 सा; T4 damaged (for न). —(l. 4) T4 damaged for सुग्रीव. T4 नाम्नी; B (ed.) चापि (for ब्रह्मन्). D9 T4 M3 माता का नामतः स्मृता (T4 °तस्त्विह); D10.11 K (ed.) माता मे नाम तत्कृता (K [ed.] °मतः कृतः); B (ed.) नामनी केन हेतुना (for the post. half). —(l. 5) T4 damaged for the prior half. —(l. 6) D9 संप्रोक्तो (for स प्रोक्तो). —(l. 7) M3 समाहितः (for समासतः). —(l. 9) D7.10.11 अतिधर्मम्; T4 damaged; K (ed.) अतिथिरवम् (for अतिथिर्माम्). —(l. 10) V3 T4 च (for तु). D7 T4 M3 यथान्याय्यं. —(l. 11) V3 D9 T4 एतां; K (ed.) तेनां (for एतां). M3 तु (for स). —(l. 13) V3 सुमेरुर्नगः (subm.) (for मेरुर्नगवरः). —(l. 15) V3 दिव्याश्रमे; M3 दिव्यसभा (for दिव्या सभा). K (ed.) ब्राह्मी या (for ब्रह्मणः). —(l. 16) T4 damaged for तस्यामास्ते. V3 महादेवः; D9 यदा ** (lacuna)

योगमभ्यसतस्तस्य नेत्राभ्यां यद्रसोऽस्रवत् ।
तद्गृहीतं भगवता पाणिना चर्चितं तु तत् ।
निक्षिप्तमात्रं तद्भूमौ ब्रह्मणा लोककर्तृणा ।
तस्मिन्नश्रुकणे राम वानरः संबभूव ह ।
उत्पन्नमात्रस्तु तदा वानरश्च नरोत्तम ।
समाश्वास्य प्रियैर्वाक्यैरुक्तः किल महात्मना ।
पश्य शैलं सुविस्तीर्णं सुरैरध्युषितं सदा ।
तस्मिन्रम्ये गिरिवरे बहुमूलफलाशनः ।
ममान्तिकचरो नित्यं भव वानरपुंगव ।
कंचित्कालमिहास्व त्वं ततः श्रेयो भविष्यति ।
एवमुक्तः स चैतेन ब्रह्मणा वानरोत्तमः ।
प्रणम्य शिरसा पादौ देवदेवस्य राघव ।
उक्तवाँल्लोककर्तारमादिदेवं जगत्पतिम् ।
यथाज्ञापयसे देव स्थितोऽहं तव शासने ।
एवमुक्त्वा हरिर्देवं ययौ हृष्टमनास्तदा ।
स तदा द्रुमखण्डेषु फलपुष्पघनेषु च ।
ब्रह्मन्प्रतिबलः शीघ्रं वने फलकृताशनः ।
चिन्वन्मधूनि मुख्यानि चिन्वन्पुष्पाण्यनेकशः ।
दिने दिने च सायाह्ने ब्रह्मणोऽन्तिकमागमत् ।
गृहीत्वा राम मुख्यानि पुष्पाणि च फलानि च ।
ब्रह्मणो देवदेवस्य पादमूले न्यवेदयत् ।
एवं तस्य गतः कालो बहु पर्यटतो गिरिम् ।
कस्यचित्त्वथ कालस्य समतीतस्य राघव ।
ऋक्षराड्वानरश्रेष्ठस्तृषया परिपीडितः ।
उत्तरं मेरुशिखरं गतस्तत्र च दृष्टवान् ।
नानाविहगसंघुष्टं प्रसन्नसलिलं सरः ।
चलत्केसरमात्मानं कृत्वा तस्य तटे स्थितः ।
ददर्श तस्मिन्सरसि वक्त्रच्छायामथात्मनः ।
कोऽयमस्मिन्मम रिपुर्वसत्यन्तर्जले महान् ।
रूपं चान्तर्गतं तत्र वीक्ष्य तत्पश्यतो हरिः ।
क्रोधाविष्टमना ह्येष नियतं मावमन्यते ।
तदस्य दुष्टभावस्य पुष्कलं कुमतेर्गृहम् ।
एवं संचिन्त्य मनसा स वै वानरचापलात् ।
आप्लुत्य चापतत्तस्मिन्ह्रदे वानरसत्तमः ।
उत्प्लुत्य तस्मात्स ह्रदादुत्थितः प्लवगः पुनः ।
तस्मिन्नेव क्षणे राम स्त्रीत्वं प्राप स वानरः ।
मनोज्ञरूपा सा नारी लावण्यललिता शुभा ।
विस्तीर्णजघना सुभ्रूर्नीलकुन्तलमूर्धजा ।
मुग्धसस्मितवक्त्रा च पीनस्तनतटा शुभा ।
ह्रदतीरे च सा भाति ऋजुयष्टिर्लता यथा ।
त्रैलोक्यसुन्दरी कान्ता सर्वचित्तप्रमाथिनी ।
लक्ष्मीव पद्मरहिता चन्द्रज्योत्स्नेव निर्मला ।

(for सदा देवः). —(l. 17) T_4 damaged for सतस्तस्य. V_3 D_9 M_3 नेत्रेभ्यो. M_3 [अ]द्रवत् (for ऽस्रवत्). $D_{7.10.11}$ यदश्रु स्र(D_{11} °सुस्र)वत्; T_4 अश्रु चापतत्. —(l. 18) V_3 गृहीत्वा (for °तं). V_3 मर्दितं; D_9 चार्चितं (for चर्चितं). V_3 M_3 च (for तु). —(l. 19) V_3 निक्षिप्यमानं. M_3 लोकधारिणा (for °कर्तृणा). —(l. 20) V_3 वैरप्लुतो (corrupt) (for अश्रुकणे). T_4 हि (for ह). —(l. 21) V_3 D_9 T_4 M_3 स (for च). —(l. 22) V_3 तुष्टः (for उक्तः). —(l. 23) V_3 पुरा; K (ed.) तदा (for सदा). —(l. 24) V_3 D_9 अस्मिन् (for त°). V_3 T_4 गिरिवरे रम्ये (by transp.). —(l. 25) T_4 [अं]तिकपरो (for °चरो). —(l. 26) V_3 $D_{7.10}$ किञ्चित्. V_3 [आ]स्थित्वा (for [आ]स्व त्वं). M_3 तव (for ततः). —(l. 27) V_3 D_9 वै तेन (for चैतेन). —(l. 28) T_4 damaged from दौ up to लोक in l. 29. —(l. 29) V_3 देवदेवं (for आदिदेवं). V_3 D_9 T_4 M_3 प्रजापतिं; K (ed.) जगद्गुरुं (for जगत्पतिम्). —(l. 32) V_3 T_4 ततो (for तदा). M_3 रमणीये तु (for द्रुमखण्डेषु). V_3 T_4 -वनेषु (for -घनेषु). M_3 फलपुष्पोपशोभिते (for the post. half). —(l. 33) V_3 D_9 T_4 M_3 भ्रमन्न (T_4 °न्प्र)तिबलः; D_7 ब्रह्मन्नतिबलः. K (ed.) ब्रह्मप्रतिबलः शैघ्र्ये (for the prior half). V_3 फलरसाशनः. —(l. 34) K (ed.) कचिन् (for चिन्वन्). T_4 damaged after मु up to दिने च in l. 35. —V_3 om. (hapl.) from the post. half up to the prior half of l. 36. —(l. 35) D_9 om. (hapl.) दिने. T_4 आययौ (for आगमत्). —(l. 36) V_3 om. first च (subm.). —(l. 37) M_3 न्यवेशयत् (for न्यवेद°). —(l. 38) V_3 गिरेः. —(l. 40) V_3 जगाम (for ऋक्षराड्). D_9 T_4 वानरवृषस; M_3 वानरस्तत्र (for °श्रेष्ठस्). V_3 D_9 T_4 M_3 तृष्णया (for तृषया). —T_4 damaged after प up to ग in l. 41. —(l. 41) V_3 ददर्श तत्र दृष्टवान् (for the post. half). —(l. 42) $D_{7.9}$ M_3 -विहंग- (for -विहग-). V_3 शुचिम्; T_4 शुभं (for सरः). D_9 प्र** सलिलाशयं (for the post. half). —(l. 44) T_4 damaged for सरसि. D_{10} वक्र- (for वक्त्र-). —(l. 45) V_3 कोयमात्मविपर्जने मन्तर्जं * गते महान् (corrupt). —(l. 46) D_9 चांतर्जलं (for °र्गतं). V_3 तस्य (for तत्र). K (ed.) पाथसो (for पश्यतो). D_9 हरेः. V_3 विकृतं कुरुते हरिः; T_4 damaged; M_3 वीक्षतो धीरजायत (for the post. half). —(l. 47) T_4 damaged for क्रोधा. T_4 न (for मा). V_3 यतो मामवमन्यते (for the post. half). —(l. 48) V_3 वयं कुर्मो विनिग्रहं; D_9 करिष्यामि विनिग्रहं; T_4 M_3 कर्तव्यो निग्रहो मया (for the post. half). —(l. 49) D_9 om. (hapl.) from वानर up to स in l. 52. —(l. 50) V_3 न्यपतत् (for चा°). V_3 स वै वानरपुंगवः (for the post. half). —(l. 51) V_3 चैव देवेश; M_3 °त्संह्रादो; K (ed.) °त्सरस (for तस्मात्स ह्रदाद्). M_3 मुदितः (for उत्थितः). —T_4 damaged from पुनः up to the prior half of l. 52. —(l. 52) D_7 चाप; M_3 आप (for प्राप). —(l. 53) D_9 लावण्ये (for °ण्य-). —(l. 54) V_3 $D_{7.9}$ M_3 -कुंचित- (for -कुन्तल-). —(l. 55) V_3 वरा; K (ed.) मुग्धा (for मुग्ध-). V_3 च सा (for शुभा). —(l. 56) V_3 D_9 T_4 M_3 स्थिता (for च सा). K (ed.) ह्रदतीरस्थिता. V_3 शुभा; K (ed.) तथा (for यथा). —(l. 57) T_4 damaged from क्य up to सर्व-. V_3 नर- (for सर्व-). T_4 -प्रमर्दिनी (for -प्रमाथिनी). —(l. 58) D_9 पद्म- (for

रूपेणाप्यभवत्सा तु श्रियं देवीमुमां यथा।
द्योतयन्ती दिशः सर्वास्तत्राभूत्सा वराङ्गना।
एतस्मिन्नन्तरे देवो निवृत्तः सुरनायकः।
पादावुपास्य देवस्य ब्रह्मणस्तेन वै पथा।
तस्यामेव च वेलायामादित्योऽपि परिभ्रमन्।
तस्मिन्नेव पदे सोऽभूद्यस्मिन्सा तनुमध्यमा।
युगपत्सा तदा दृष्टा देवाभ्यां सुरसुन्दरी।
कन्दर्पवशगौ तौ तु दृष्ट्वा तां संबभूवतुः।
ततः क्षुभितसर्वाङ्गौ सुरेन्द्रौ पन्नगाविव।
तद्रूपमद्भुतं दृष्ट्वा त्याजितौ धैर्यमात्मनः।
ततस्तस्यां सुरेन्द्रेण स्कन्नं शिरसि पातितम्।
अनासाद्यैव तां नारीं संनिवृत्तमथाभवत्।
ततः सा वानरपतिं जज्ञे वानरमीश्वरम्।
अमोघरेतसस्तस्य वासवस्य महात्मनः।
वालेषु पतितं बीजं वाली नाम बभूव सः।
भास्करेणापि तस्यां वै कन्दर्पवशवर्तिना।
बीजं निषिक्तं ग्रीवायां विधानमनुवर्तत।
तेनापि सा वरतनुर्नोक्ता किंचिद्वचः शुभम्।
निवृत्तमदनश्चाथ सूर्योऽपि समपद्यत।
ग्रीवायां पतिते बीजे सुग्रीवः समजायत।
एवमुत्पाद्य तौ वीरौ वानरेन्द्रौ महाबलौ।
दत्त्वा तु कांचनीं मालां वानरेन्द्रस्य वालिनः।
अक्षय्यां गुणसंपूर्णां शक्रस्तु त्रिदिवं ययौ।
सूर्योऽपि स्वसुतस्यैव निरूप्य पवनात्मजम्।
कृत्येषु व्यवसायेषु जगाम सवितम्बरम्।
तस्यां निशायां व्युष्टायामुदिते च दिवाकरे।
स तद्वानररूपं तु प्रतिपेदे पुनर्नृप।
स एव वानरो भूत्वा पुत्रौ स्वस्य प्लवंगमौ।
पिङ्गेक्षणौ हरिवरौ बलिनौ कामरूपिणौ।
मधून्यमृतकल्पानि पायितौ तेन तौ तदा।
गृह्य ऋक्षरजास्तौ तु ब्रह्मणोऽन्तिकमागमत्।
दृष्ट्वर्क्षरजसं पुत्रं ब्रह्मा लोकपितामहः।
बहुशः सान्त्वयामास पुत्राभ्यां सहितं हरिम्।
सान्त्वयित्वा ततः पश्चाद्देवदूतमथादिशत्।
गच्छ मद्वचनाद्दूत किष्किन्धां नाम वै शुभाम्।
सा ह्यस्य गुणसंपन्ना महती च पुरी शुभा।
तत्र वानरयूथानि सुबहूनि वसन्ति च।
बहुरत्नसमाकीर्णा वानरैः कामरूपिभिः।
पुण्या पुण्यवती दुर्गा चातुर्वर्ण्यपुरस्कृता।
विश्वकर्मकृता दिव्या मन्नियोगाच्च शोभना।
तत्रर्क्षरजसं दृष्ट्वा सपुत्रं वानरर्षभम्।
यूथपालान्समाह्वाय यांश्चान्यान्प्राकृतान्हरीन्।
तेषां संभाष्य सर्वेषां मदीयं जनसंसदि।
अभिषेचय राजानमारोप्य महदासने।

चन्द्र-).—(l. 59) D_9 M_3 [अ]भ्यमवत्; T_4 [अ]ध्यवसत्. D_7 नु (for तु). D_{9-11} उमा. T_4 M_3 तथा (for यथा). V_3 गौरीव प्रतिमा तथा; K (ed., with hiatus) श्रीर्गौर्देवी उमा यथा (for the post. half).—(l. 60) B (ed.) तथा (for तत्र).—(l. 62) T_4 damaged from ण up to त in l. 63. V_3 तदा (for पथा).—(l. 63) M_3 तस्मिन् (for तस्याम्). V_3 मध्याह्न-; $D_{7.9}$ T_4 अथ च; M_3 मध्ये च (for एव च).—(l. 64) K (ed.) वने (for पदे). V_3 एव प्रदेशे तु; M_3 प्रदेशे सोप्यायाद् (for एव पदे सोऽभूद्). V_3 ह्यस्मिन् (for यस्मिन्).—(l. 66) V_3 च (for तु).—(l. 67) V_3 M_3 सुरेंद्रतपनावुभौ (for the post. half).—(l. 68) T_4 damaged after तद्रू up to त्याजि. V_3 D_9 T_4 धर्मम् (for धैर्यम्). M_3 त्यक्तवीर्यौ बभूवतुः (for the post. half).—(l. 69) M_3 रेतो वै विनिपातितं (for the post. half).—(l. 70) D_7 अथो (for अथ). D_7 M_3 स निवृत्तमदोभवत् (for the post. half).—For l. 69–70, V_3 subst.:

1* ततस्तस्याः सुरेन्द्रः स रूपं दृष्ट्वा मनोहरम्।
असंभाष्यैव तां नारीमतिप्रीतितरोऽभवत्।

—(l. 71) V_3 स वानरपतिर्जज्ञौ (for सा वानरपतिं जज्ञे). M_3 प्रासूत बलशालिनं (for the post. half).—(l. 72) K (ed.) अमोघरेतस्त्वात्तस्य (for the prior half).—(l. 73) V_3 D_9 T_4 नाम्ना (for नाम).—T_4 damaged from भूव up to तस्यां in l. 74. V_3 ह (for सः).—(l. 75) V_3 वीर्यं (for बीजं). K (ed.) तु सिक्तं (for निषिक्तं). D_9 M_3 अनुवर्तिना (for °र्तत).—(l. 76) T_4 [अ]थ (for [अ]पि). M_3 शोभन- (for सा वर-). D_9 प्रोक्ता (for नोक्ता). V_3 शुभा (for शुभम्).—(l. 77) D_9 समजायत (for °पद्यत).—(l. 78) V_3 वीर्ये (for बीजे). $D_{10.11}$ पतितं बीजं.—T_4 mostly damaged for l. 79.—(l. 79) V_3 उत्पादितौ वीर्यौ; D_9 उत्पाद्य ताभ्यां तौ; M_3 उत्पादितौ वीरौ.—(l. 80) V_3 च (for तु).—(l. 81) D_7 गुणसंपन्नां. V_3 M_3 अक्षयं गुणसंपूर्णं (for the prior half).—(l. 82) V_3 [अ]र्थं; D_9 T_4 [ए]वं; M_3 [ए]नं (for [ए]व). V_3 बलमात्मजं (for पवना°).—(l. 83) V_3 स्वयमंबरं (for सविताम्बरम्).—(l. 84) T_4 damaged from यां up to second दि. D_9 रजन्यां (for निशायां).—(l. 85) K (ed.) तु (for तद्). T_4 तत् (for तु).—(l. 86) V_3 चास्य महाबलौ (for स्वस्य प्लवंगमौ).—(l. 87) M_3 अपश्यत् (for बलिनौ).—D_9 om. l. 88–89.—(l. 89) V_3 गृहीत्वा तत्र तौ बालौ; M_3 गृहीत्वार्क्षरजास्तौ तु (for the prior half). K (ed.) आगतः (for आगमत्). T_4 गृहीत्वर्क्ष * * * * * * * * * *ययौ (damaged).—(l. 90) V_3 प्राप्तं (for पुत्रं). D_9 दृष्ट्वार्क्षराजं सपुत्रं (for the prior half).—(l. 91) V_3 तदा (for हरिम्).—(l. 92) V_3 तथा (for अथ).—(l. 94) M_3 सर्व- (for ह्यस्य).—(l. 95) V_3 -यूथा*. V_3 बहूनि तव संनिधौ; M_3 बहूनि निवसंति च (for the post. half).—(l. 97) V_3 D_7 पण्या पण्य(D_7 °ण)वती; D_{10} M_3 पुण्या पण्य(M_3 °ण)वती. K (ed.) -युता सदा (for -पुरस्कृता).—(l. 99) D_7 पृष्ट्वा; M_3 पुत्रं (for दृष्ट्वा). V_3 वानरोत्तमं (for °रर्षभम्).—(l. 100) M_3 समाहूय. V_3 यूथपान्स समाहूय (for the prior half). V_3 पश्चात्तान्; D_7 तांश्चान्यान् (for यांश्चान्यान्).—(l. 101) D_7 संभाष्य. M_3 मदीये; K (ed.) मदीय-.—(l. 102) V_3 महदासनं.—(l. 104) V_3 D_7 अथ

दृष्टमात्राश्च ते सर्वे वानरेण च धीमता।
अस्यर्क्षरजसो नित्यं भविष्यन्ति वशानुगाः।
इत्येवमुक्ते वचने ब्रह्मणा तं हरीश्वरम्।
पुरतःकृत्य दूतोऽसौ प्रययौ तां पुरीं शुभाम्।
स प्रविश्यानिलगतिस्तां गुहां वानरोत्तमः।
स्थापयामास राजानं पितामहनियोगतः।
राज्याभिषेकविधिना स्नातोऽथाभ्यर्चितस्तथा।
स बद्धमुकुटः श्रीमानभिषिक्तः स्वलंकृतः।
आज्ञापयामास हरीन्सर्वान्मुदितमानसः।
सप्तद्वीपसमुद्रायां पृथिव्यां ये प्लवंगमाः।
वालिसुग्रीवयोरेष एष चर्क्षरजः पिता।
जननी चैष तु हरिरित्येतद्भद्रमस्तु ते।
यश्चैतच्छ्रावयेद्विद्वान्यश्चैतच्छृणुयान्नरः।
सिद्ध्यन्ति तस्य कार्यार्था मनसो हर्षवर्धनाः।
एतच्च सर्वं कथितं मया विभो
प्रविस्तरेणेह यथार्थतस्तत्।
उत्पत्तिरेषा रजनीचराणा-
मुक्ता तथैवेह हरीश्वराणाम्।

Colophon

एतां श्रुत्वा कथां दिव्यां पौराणीं राघवस्तदा।
भ्रातृभिः सहितो वीरो विस्मयं परमं ययौ।
राघवोऽथ ऋषेर्वाक्यं श्रुत्वा वचनमब्रवीत्।
कथेयं महती पुण्या त्वत्प्रसादाच्छ्रुता मया।
बृहत्कौतूहलेनास्मि संवृतो मुनिपुंगव।
उत्पत्तिर्यादृशी दिव्या वालिसुग्रीवयोर्द्विज।
किं चित्रं मम ब्रह्मर्षे सुरेन्द्रतपनावुभौ।
जातौ वानरशार्दूलौ बलेन बलिनां वरौ।
एवमुक्ते तु रामेण कुम्भयोनिरभाषत।
एवमेतन्महाबाहो वृत्तमासीत्पुरा किल।
अथापरां कथां दिव्यां शृणु राजन्सनातनीम्।
यदर्थं राम वैदेही रावणेन पुरा हृता।
तत्तेऽहं कीर्तयिष्यामि समाधिं श्रवणे कुरु।
पुरा कृतयुगे राम प्रजापतिसुतं प्रभुम्।
सनत्कुमारमासीनं रावणो राक्षसाधिपः।
वपुषा सूर्यसंकाशं ज्वलन्तमिव तेजसा।
विनयावनतो भूत्वा ह्यभिवाद्य कृताञ्जलिः।
उक्तवान्रावणो राम तमृषिं सत्यवादिनम्।
को ह्यस्मिन्प्रवरो लोके देवानां बलवत्तरः।
यं समाश्रित्य विबुधा जयन्ति समरे रिपून्।
कं यजन्ति द्विजा नित्यं कं ध्यायन्ति च योगिनः।
एतन्मे शंस भगवन्विस्तरेण तपोधन।
विदित्वा हृद्गतं तस्य ध्यानदृष्टिर्महायशाः।
उवाच रावणं प्रेम्णा श्रूयतामिति पुत्रक।
यो वै भर्ता जगत्कृत्स्नं यस्योत्पत्तिं न विद्महे।
सुरासुरैर्नतो नित्यं हरिर्नारायणः प्रभुः।
यस्य नाभ्युद्भवो ब्रह्मा विश्वस्य जगतः पतिः।
येन सर्वमिदं सृष्टं विश्वं स्थावरजङ्गमम्।
तं समाश्रित्य विबुधा विधिना हरिमध्वरे।
पिबन्ति ह्यमृतं चैव मानिताश्च यजन्ति तम्।
पुराणैश्चैव वेदैश्च पञ्चरात्रैस्तथैव च।
ध्यायन्ति योगिनो नित्यं क्रतुभिश्च यजन्ति तम्।
दैत्यदानवरक्षांसि ये चान्ये चामरद्विषः।
सर्वाञ्जयति संग्रामे सदा सर्वैः स पूज्यते।
श्रुत्वा महर्षेस्तद्वाक्यं रावणो राक्षसाधिपः।
उवाच प्रणतो भूत्वा पुनरेव महामुनिम्।
दैत्यदानवरक्षांसि ये हताः समरेऽरयः।

(for अस्य). —V_3 om. l. 105–170. —(l. 105) K (ed.) तु (for तं). —(l. 106) $D_{7.9}$ T_4 M_3 गुहां (for पुरीं). —(l. 107) T_4 संप्रविश्य. —(l. 109) T_4 M_3 राजाभिषेक-. D_9 स्थापितो (for स्नातोऽथ). M_3 तदा (for तथा). —(l. 112) D_9 -स * द्रायां. —(l. 113) D_7 (with hiatus).$_9$ T_4 M_3 एव (for first एष). D_7 एकरत्वृक्षरजाः; D_9 त्वेषर्क्षरजसः; T_4 त्वेष त्वृक्षरजाः; M_3 ह्येष त्वृक्षरजः; K (ed.) ह्येव त्वृक्षरजाः. —(l. 114) $D_{7.9}$ M_3 [ए]व (for [ए]ष). —(l. 116) T_4 सर्वे- (for तस्य). D_7 M_3 कार्याणि (for कार्यार्था). T_4 हर्षवर्धकाः; M_3 हर्षदानि वै. —(l. 117) D_9 मयापि (for मया विभो). —(l. 118) T_4 [ए]व (for [इ]ह). D_7 T_4 M_3 तव (for तत्).

Colophon. V_3 M_3 om. —*Sarga no.* (figures, words or both): D_7 38; D_9 T_4 40; $D_{10.11}$ 1; K (ed.) 6 प्रक्षिप्त. —After colophon, T_4 concludes with श्रीरामार्पणमस्तु.

—(l. 121) M_3 पुराणां (for पौराणीं). K (ed.) ततः (for तदा). —(l. 122) D_9 धीरो (for वीरो). —(l. 123) D_9 M_3 वाक्याद्दृष्टो; T_4 वाक्याद्दृष्ट्वा (for वाक्यं श्रुत्वा). —(l. 125) $D_{10.11}$ °हले वास्मिन्; T_4 °हलाच्चास्मिन्; M_3 °हलश्चास्मि. D_7 M_3 संवृत्तो. —(l. 127) T_4 तु महाब्रह्मन् (for मम ब्रह्मर्षे). M_3 ब्रह्मर्षे मम किं चित्रं (for the prior half). D_9 -तनयाव् (for -तपनाव्). —(l. 128) D_9 बलिनौ (for बलेन). —(l. 129) M_3 च (for तु). —(l. 131) D_9 T_4 M_3 पुरातनीं (for सनातनीम्). —(l. 132) D_9 T_4 M_3 हृता पुरा (by transp.). —(l. 136) D_9 सदृशं; T_4 damaged; M_3 ददर्श (for वपुषा). —(l. 138) D_7 राम तमृषिं सर्वज्ञं (for रावणो राम तमृषिं). —(l. 139) D_9 यो (for को). —(l. 141) M_3 कथयंति; B (ed.) कं जयंति (for कं यजन्ति). D_9 *जा; K (ed.) जना (for द्विजा). —(l. 142) M_3 भगवान्. —(l. 143) M_3 ध्यानदृष्ट्या (for °दृष्टिर्). —(l. 144) D_9 प्रेक्ष्य (for प्रेम्णा). —(l. 145) K (ed.) बिभर्ति (for वै भर्ता). T_4 damaged for जगत्. D_9 [उ]त्पत्तिर्. —(l. 149) M_3 विधिना विबुधा (by transp.). —(l. 150) T_4 damaged for पिबन्ति ह्य. D_9 M_3 मानवाश्च (for मानिताश्च). —T_4 damaged from जन्ति up to l. 151. D_7 जयंति (for यजन्ति). —(l. 151) D_{10} पौराणैश्च. M_3 देवैश्च (meta.) (for वेदैश्च). M_3 पांचरात्रैस्. D_9 पंचरात्रागमैरपि (for the post. half). —(l. 154) M_3 जयंति. M_3 तं स्मृत्वानन्यचेतसः (for the post. half). —(l. 155) T_4 damaged for महर्षे and from धिपः up to पुन in l. 156. —(l. 157) D_9 T_4 पुरा (for ऽरयः). —(l. 158)

कां गतिं प्रतिपद्यन्ते किं च ते हरिणा हताः।
रावणस्य वचः श्रुत्वा प्रत्युवाच महामुनिः।
दैवतैर्निहता नित्यं प्राप्नुवन्ति दिवःस्थलम्।
पुनस्तस्मात्परिभ्रष्टा जायन्ते वसुधातले।
पूर्वार्जितैः सुखैर्दुःखैर्जायन्ते च म्रियन्ति च।
ये ये हताश्चक्रधरेण राजं-
    स्त्रैलोक्यनाथेन जनार्दनेन।
ते ते गतास्तन्निलयं नरेन्द्राः
    क्रोधोऽपि देवस्य वरेण तुल्यः।
श्रुत्वा ततस्तद्वचनं निशाचरः
    सनत्कुमारस्य मुखाद्विनिर्गतम्।
तथा प्रहृष्टः स बभूव विस्मितः
    कथं नु यास्यामि हरिं महाहवे।

Colophon

एवं चिन्तयतस्तस्य रावणस्य दुरात्मनः।
पुनरेवापरं वाक्यं व्याजहार महामुनिः।
मनसश्चेप्सितं यत्तद्भविष्यति महाहवे।
सुखी भव महाबाहो कंचित्कालमुदीक्षय।
एवं श्रुत्वा महाबाहुस्तमृषिं प्रत्युवाच सः।
कीदृशं लक्षणं तस्य ब्रूहि सर्वमशेषतः।
राक्षसेशवचः श्रुत्वा स मुनिः प्रत्यभाषत।
श्रूयतां सर्वमाख्यास्ये तव राक्षसपुंगव।
स हि सर्वगतो देवः सूक्ष्मोऽव्यक्तः सनातनः।
तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम्।
स भूमौ दिवि पाताले पर्वतेषु वनेषु च।
स्थावरेषु च सर्वेषु नदीषु नगरीषु च।
ओंकारश्चैव सत्यं च सावित्री पृथिवी च सः।
धराधरधरो देवो ह्यनन्त इति विश्रुतः।
अहश्च रात्रिश्च उभे च संध्ये
    दिवाकरश्चैव यमश्च सोमः।
स एव कालो ह्यनिलोऽनलश्च
    स ब्रह्मरुद्रेन्द्र स एव चापः।
विद्योतति ज्वलति भाति लोका-
    न्सृजत्ययं संहरति प्रशास्ति।
क्रीडां करोत्यव्ययलोकनाथो
    विष्णुः पुराणो भवनाशकैकः।
अथवा बहुनानेन किमुक्तेन दशानन।
तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम्।
नीलोत्पलदलश्यामः किञ्जल्कारुणवाससा।
प्रावृट्काले यथा व्योम्नि सतडित्तोयदो यथा।
श्रीमान्मेघवपुः श्यामः शुभः पङ्कजलोचनः।
श्रीवत्सेनोरसा युक्तः शशाङ्ककृतलक्षणः।
तस्य नित्यं शरीरस्था मेघस्येव शतह्रदाः।

T4 समपद्यंते. K (ed.) के (for किं). D9 T4 वा (for च). —(l. 160) T4 damaged from लम् up to the prior half of l. 161. D9 नभस्तलं (for दिवःस्थलम्). —(l. 164) K (ed.) त्रिलोक- (for त्रैलोक्य-). —(l. 165) D9 तन्निलये; K (ed.) तत्र लयं (for तन्निलयं). D7 नरेंद्र. —(l. 167) T4 damaged for श्रुत्वा तत. —(l. 170) D7 प्रयास्यामि; B (ed.) न यास्यामि (for नु यास्यामि).

Colophon : V3 M3 om. —*Sarga no.* (figures, words or both): D7 om.; D9 T4 41; D10.11 2; K (ed.) 7 प्रक्षिप्त. —After colophon, T4 concludes with श्रीरामार्पणमस्तु.

—(l. 171) T4 damaged up to रा in रावणस्य. —(l. 172) V3 प्रत्युवाच (for व्याजहार). —(l. 173) V3 ते वै; D9 यत्तु; K (ed.) यत्ते (for यत्तद्). M3 तवाहवे. —(l. 174) D11 महा * * (for महाबाहो). V3 D9 किंचित्. T4 उदीक्षयन्. —(l. 175) T4 एतच्च् (for एवं). V3 उक्तो (for श्रुत्वा). —(l. 176) T4 damaged from स up to चः in l. 177. V3 स त्वम् (for सर्वम्). —(l. 177) V3 रावणस्य; K (ed.) राक्षसस्य (for राक्षसेश-). D7.9 T4 M3 प्रत्युवाच तं (for प्रत्यभाषत). V3 प्रत्युवाच महामुनिः (for the post. half). —(l. 178) V3 त्वयि (for तव). —(l. 179) V3 सूक्ष्मो (for देवः). T4 सर्वगुणोपेतः (for °गतो देवः). V3 व्यक्ताव्यक्तः (for सूक्ष्मोऽव्यक्तः). —(l. 180) K (ed.) प्रोतं (for व्याप्तं). —D9 om. (hapl.); T4 damaged for l. 182. —(l. 182) V3 सागरेषु (for स्थावरेषु). K (ed.) वनेषु (for नदीषु). V3 नगरेषु. —(l. 183) V3 कारणं (for ओंकारश्). D10.11 सत्यश् (for सत्यं). D7 -वसु (for च सः). —(l. 185) Note hiatus between रात्रिश्च and उभे. —(l. 186) V3 [अ]पि (for [ए]व). —(l. 187) M3 सर्पोतिकायो (for स एव कालो). K (ed.) ह्यनलश्च वायुः (for ह्यनिलोऽनलश्च). —T4 damaged for l. 188. —(l. 188) D9 ब्रह्मेंद्ररुद्राश्च. D7 -गणस्तथापः (for स एव चापः). V3 ब्रह्मा स रुद्रः सलिलं स एव; M3 (with hiatus) स ब्रह्मरुद्राश्च स एव आपः; K (ed.) स ब्रह्मरुद्रौ च स एव बालः. —(l. 189) V3 D7.9 M3 विद्योतति (V3 °ते) ज्वलति वर्षति वाति (D7 M3 भाति च पाति; D9 भाति ववाति) लोकान्; T4 * * * ति ज्वलति याति च * * लोकान् (damaged). —(l. 190) V3 प्रयाति तपति संहरति प्रशास्ति; D7 सर्वान्सृजत्यवति संहरति प्रशास्ति. —(l. 191) V3 विकरोति च लोकनाथो; D9 जगति प्रथितो महात्मा (for [अ]व्ययलोकनाथो). —(l. 192) D7 भवनाशनैकः; D9 पुरुषौघनाशनः; T4 पुरुषश्च नैकः; M3 भवनाशहेतुः. V3 विष्णु प्रधानपुरुषो भयनाशकश्च. —(l. 193) V3 T4 बहुनोक्तेन; D7 M3 बहुना तेन. V3 किमनेन; T4 damaged (for किमुक्तेन). —(l. 194) T4 damaged from मिदं up to नीलो in l. 195. —(l. 195) V3 -वस्त्रधानः (corrupt); D9 -वाससः; M3 -मेहनः; K (ed.) -वस्त्रकः (for -वाससा). —(l. 196) V3 जलदो (for तोयदो). D9 T4 तथा (for यथा). —(l. 197) D7.9 शुभ- (for शुभः). K (ed.) पंकजारुणलोचनः (for the post. half). V3 श्रीमानस्य महाबाहुः पुंडरीकनिभेक्षणः. —(l. 198) T4 समायुक्तः (for [उ]-रसा युक्तः). T4 damaged for कृतलक्षणः. D9 -[अ]ङ्कुत- (for -कृत-). —(l. 199) T4 damaged from शत up to

संग्रामरूपिणी लक्ष्मीर्देहमावृत्य तिष्ठति ।
न शक्यः स सुरैर्द्रष्टुं नासुरैर्न च पन्नगैः ।
यस्य प्रसादं कुरुते स वै तं द्रष्टुमर्हति ।
न हि यज्ञफलैस्तात न तपोभिस्तु संचितैः ।
शक्यते भगवान्द्रष्टुं न दानेन न चेज्यया ।
तद्भक्तैस्तद्गतप्राणैस्तच्चित्तैस्तत्परायणैः ।
शक्यते भगवान्द्रष्टुं ज्ञाननिर्दग्धकिल्बिषैः ।
अथवा पृच्छय रक्षेन्द्र यदि तं द्रष्टुमिच्छसि ।
कथयिष्यामि ते सर्वं श्रूयतां यदि रोचते ।
कृते युगे व्यतीते वै मुखे त्रेतायुगस्य तु ।
हितार्थं देवमर्त्यानां भविता नृपविग्रहः ।
इक्ष्वाकूणां च यो राजा भाव्यो दशरथो भुवि ।
तस्य सूनुर्महातेजा रामो नाम भविष्यति ।
महातेजा महाबुद्धिर्महाबलपराक्रमः ।
महाबाहुर्महासत्त्वः क्षमया पृथिवीसमः ।
आदित्य इव दुष्प्रेक्ष्यः समरे शत्रुभिस्तदा ।
भविता हि तदा रामो नरो नारायणः प्रभुः ।
पितुर्नियोगात्स विभुर्दण्डके विविधे वने ।
विचरिष्यति धर्मात्मा सह भ्रात्रा महामनाः ।
तस्य पत्नी महाभागा लक्ष्मी सीतेति विश्रुता ।
दुहिता जनकस्यैषा उत्थिता वसुधातलात् ।
रूपेणाप्रतिमा लोके सर्वलक्षणलक्षिता ।
छायेवानुगता रामं निशाकरमिव प्रभा ।
शीलाचारगुणोपेता साध्वी धैर्यसमन्विता ।
सहस्रांशो रश्मिरिव ह्येका मूर्तिरिव स्थिता ।
एवं ते सर्वमाख्यातं मया रावण विस्तरात् ।
महतो देवदेवस्य शाश्वतस्याव्ययस्य च ।
एवं श्रुत्वा महाबाहू राक्षसेन्द्रः प्रतापवान् ।
त्वया सह विरोधेच्छुश्चिन्तयामास राघव ।
सनत्कुमारात्तद्वाक्यं चिन्तयानो मुहुर्मुहुः ।
रावणो मुमुदे श्रीमान्युद्धार्थं विचचार ह ।
श्रुत्वा च तां कथां रामो विस्मयोत्फुल्ललोचनः ।
शिरसश्चालनं कृत्वा विस्मयं परमं गतः ।
श्रुत्वा तु वाक्यं स नरेश्वरस्तदा
मुदा युतो विस्मयमानचक्षुः ।
पुनश्च तं ज्ञानवतां प्रधान-
मुवाच वाक्यं वद मे पुरातनम् ।

Colophon

ततः पुनर्महातेजाः कुम्भयोनिर्महायशाः ।
उवाच रामं प्रणतं पितामह इवेश्वरम् ।
श्रूयतामिति चोवाच रामं सत्यपराक्रमम् ।
कथाशेषं महातेजाः कथयामास स प्रभुः ।
यथाख्यानं श्रुतं चैव यथावृत्तं यथा तथा ।

संग्रा in l. 200. V3 गिरेरिव महानदी (for the post. half). —(l. 200) D9 समग्रा रूपिणी. V3 दिवम् (for देहम्). —(l. 201) V3 स न शक्यः (by transp.); D7 न च शक्यः; D9 T4 न स शक्यः (by transp.); M3 स शक्यो न (by transp.) (for न शक्यः स). D10 [ऽ]मरैर् (for सुरैर्). V3 अपि (for न च). —(l. 202) V3 भयप्रसादं कुरुते तमेवं द्रष्टुमर्हसि. —(l. 203) V3 स्यातुं (for तात). V3 सुसंचितैः; D9 T4 च संचितैः. —D9 om. (hapl.) from the post. half of l. 204 up to the prior half of l. 206. —T4 damaged from यणैः in l. 205 up to भ in l. 206. —(l. 206) D11 -निर्दिग्ध-. T4 M3 -कल्मषैः. —(l. 207) V3 देवेंद्र; D9 राजेंद्र (for रक्षेन्द्र). D7 अथापृच्छे राक्षसेंद्र; M3 अथवा राक्षसेंद्र त्वं (for the prior half). V3 यदिदं (for यदि तं). —(l. 208) T4 तत् (for ते). —(l. 209) V3 D9 T4 M3 तु (for वै). V3 मुख्ये and च (for मुखे and तु respy.). —(l. 210) V3 देवमुख्यानां. —T4 damaged from हः up to the prior half of l. 211. V3 नरविग्रहः. —(l. 211) V3 भावी (for भाव्यो). —M3 om. (hapl.) l. 214. —(l. 215) T4 damaged from the post. half up to हि in l. 216. V3 D9 M3 सदा (for तदा). —(l. 216) M3 तथा (for तदा). —(l. 217) V3 विष्णुर् (for विभुर्). V3 विपिने; M3 विजने (for विविधे). —(l. 218) B (ed.) भ्रात्रा सह (by transp.). V3 महात्मना; T4 M3 महायशाः (for °मनाः). D10.11 स भ्रात्रा स महामनाः (for the post. half). —T4 mostly damaged for l. 220. —(l. 220) Note hiatus between two halves. V3 [ए]व; M3 [इ]श (for [ए]षा). —(l. 223) M3 चारुशील- (for शीलाचार-). —(l. 224) V3 रश्मिर्यथा सहस्रांशोर् (for the prior half). V3 एक-; M3 ह्येक- (for ह्येका). —(l. 225) T4 damaged after माख्या up to मह in l. 226. —(l. 227) V3 उक्तो (for श्रुत्वा). —(l. 228) V3 स (subm.) (for सह). V3 विरोधं तु; M3 विरोधेप्सुश्च. —After l. 228, V3 ins.:

2* सनत्कुमारात्तद्वाक्यं श्रुत्वा राक्षसपुंगवः ।
अनुज्ञातः पुरीं प्रायात्प्रतिपद्य महात्मने ।

—(l. 229) V3 वाक्यं सनत्कुमारस्य; M3 सनत्कुमारवाक्यं तु (for the prior half). V3 पुनः पुनः (for मुहुर्मुहुः). —(l. 230) T4 damaged after मुमु. V3 M3 युद्धार्थी. —(l. 231) V3 D9 T4 तु (for च). —(l. 232) V3 ह्यादौ कथय मे कथां; K (ed.) तमर्थं परिचिंतयन् (for the post. half). —(l. 233) V3 स नरेश्वरस्य; T4 भुवनेश्वरस्तदा. —T4 damaged for l. 236. —(l. 236) V3 स्वभाववाक्यं (for उवाच वाक्यं). V3 ते (for मे).

Colophon: M3 om. —*Sarga name*: V3 रावणचिंताकरणो. —*Sarga no.* (figures, words or both): V3 D7 om.; D9 T4 42; D10.11 3; K (ed.) 8 (प्रक्षिप्त). —After colophon, T4 concludes with श्रीरामार्पणमस्तु.

—(l. 237) V3 महातपाः (for °यशाः). —(l. 239) T4 damaged from ति up to स. V3 होवाच; M3 चामंत्र्य (for चोवाच). —(l. 241) T4 तथावृत्तं; M3 यथाख्यानं (for यथावृत्तं). V3 कृतं तथा; D7 तथा तथा; D9 T4 M3 च तत्तथा (for यथा

प्रीतात्मा कथयामास राघवाय महामतिः।
एतदर्थं महाबाहो रावणेन दुरात्मना।
सुता जनकराजस्य हृता राम महामते।
एतां कथां महाबाहो नारदः सुमहायशाः।
कथयामास दुर्धर्ष मेरौ गिरिवरोत्तमे।
देवगन्धर्वसिद्धानामृषीणां च महात्मनाम्।
कथाशेषं पुनः सोऽथ कथयामास राघव।
नारदः सुमहातेजाः प्रहसन्निव मानद।
तां कथां शृणु राजेन्द्र महापापप्रणाशिनीम्।
यां तु श्रुत्वा महाबाहो ऋषयो दैवतैः सह।
ऊचुस्तं नारदं सर्वे हर्षपर्याकुलेक्षणम्।
यश्चेमां श्रावयेन्नित्यं शृणुयाद्वापि भक्तितः।
स पुत्रपौत्रवान्राम स्वर्गलोके महीयते।

Colophon

ततः स राक्षसो राम पर्यटन्पृथिवीमिमाम्।
विजयार्थी महाशूरै राक्षसैः परिवारितः।
दैत्यदानवरक्षःसु यं शृणोति बलाधिकम्।
तमाह्वयति युद्धार्थी रावणो बलदर्पितः।
एवं स पर्यटन्सर्वां पृथिवीं पृथिवीपते।
ब्रह्मलोकान्निवर्तन्तं समासाद्याथ रावणः।
व्रजन्तं मेघपृष्ठस्थमंशुमन्तमिवापरम्।
तमभिसृत्य प्रीतात्मा ह्यभिवाद्य कृताञ्जलिः।
उवाच हृष्टमनसा नारदं रावणस्तदा।
आब्रह्मभवनाल्लोकास्त्वया दृष्टा ह्यनेकशः।
कस्मिँल्लोके महाभाग मानवा बलवत्तराः।
योद्धुमिच्छामि तैः सार्धं यथाकामं यदृच्छया।
चिन्तयित्वा मुहूर्तं तु नारदः प्रत्युवाच तम्।
अस्ति राजन्महाद्वीपं क्षीरोदस्य समीपतः।
यत्र ते चन्द्रसंकाशा मानवाः सुमहाबलाः।
महाकाया महावीर्या मेघस्तनितनिःस्वनाः।
महामात्रा धैर्यवन्तो महापरिघबाहवः।
श्वेतद्वीपे मया दृष्टा मानवा राक्षसाधिप।
बलवीर्यसमोपेतान्यादृशांस्त्वमिहेच्छसि।
नारदस्य वचः श्रुत्वा रावणः प्रत्युवाच ह।
कथं नारद जायन्ते तस्मिन्द्वीपे महाबलाः।
श्वेतद्वीपे कथं वासः प्राप्तस्तैस्तु महात्मभिः।
एतन्मे सर्वमाख्याहि प्रभो नारद तत्त्वतः।
त्वया दृष्टं जगत्सर्वं हस्तामलकवत्सदा।
रावणस्य वचः श्रुत्वा नारदः प्रत्युवाच ह।
अनन्यमनसो नित्यं नारायणपरायणाः।
तदाराधनसक्ताश्च तच्चित्तास्तत्परायणाः।
एकान्तभावानुगतास्ते नरा राक्षसाधिप।
तच्चित्तास्तद्गतप्राणा नरा नारायणं सदा।
श्वेतद्वीपे तु तैर्वास अर्जितः सुमहात्मभिः।

तथा). —(l. 243) T_4 damaged from महा up to सुता in l. 244. D_7 महात्मना (for दुरा°). —(l. 244) V_3 श्रुत्वा (for सुता). V_3 कन्या मनोरमा; D_9 राम * * * ते (for राम महामते). —(l. 245) V_3 महाराज (for °बाहो). —D_9 om. from the post. half up to the prior half of l. 246. V_3 च महातपाः; M_3 स महायशाः. —(l. 249) V_3 तु; D_{11} स (for सु-). —(l. 250) B (ed.) -प्रणाशनीं. —(l. 251) V_3 मुनयो (for ऋषयो). —(l. 252) V_3 प्रेक्षंते; D_{11} ऊचुस्ते (for ऊचुस्तं). V_3 D_9 T_4 M_3 -कुलेक्षणाः. —(l. 253) V_3 [ए]नां (for [इ]मां). V_3 विद्वान् (for नित्यं). M_3 च (for वा).

Colophon : V_3 M_3 om. —*Sarga no.* (figures, words or both): D_7 om.; D_9 T_4 43; $D_{10.11}$ 4; K (ed.) 9 (प्रक्षिप्त). —After colophon, T_4 concludes with श्रीरामार्पणमस्तु.

—(l. 255) K (ed.) रावणो (for राक्षसो). $D_{7,10.11}$ पृथिवीतले (D_7 °तलं). —(l. 256) V_3 D_9 विजयार्थं. D_9 महाघोरै (for °शूरै). —T_4 damaged from परि up to दैत्य in l. 257. —(l. 257) V_3 -यक्षाणां and महाबलं (for -रक्षःसु and बलाधिकम् respy.). —(l. 258) T_4 युद्धाय (for °र्थी). D_9 तमाह्वयत युद्धार्थं (for the prior half). —(l. 259) $D_{10.11}$ संपर्यटन्. —(l. 260) K (ed.) निवृत्तं तम् (for निवर्तन्तं). D_9 स (for [अ]थ). K (ed.) आससादाथ नारदं (for the post. half). —(l. 261) T_4 damaged for मेघपृष्ठस्थ. D_9 इवांबुदः (for इवापरम्). V_3 सतोयमिव तोयदं (for the post. half). —(l. 262) V_3 D_9 तमभिद्रुत्य; M_3 तं चाभिपद्य; K (ed.) तं चाभिसृत्य (for तमभिसृत्य). D_9 ह्यभिद्रुत्य (for °वाद्य). —(l. 263) V_3 संहृष्टमना; $D_{10.11}$ हृष्टमनसो; M_3 °चित्तः स (for हृष्टमनसा). V_3 रावणो रक्षसां वरः; M_3 रावणो नारदं तथा (for the post. half). —(l. 264) $D_{10.11}$ -भवनं; B (ed.) -भुवनं (for -भवनाल्). V_3 सहस्रशः (for ह्यनेकशः). —(l. 265) V_3 महाबाहो (for °भाग). —(l. 266) K (ed.) यथासुखं (for यदृच्छया). —After l. 266, M_3 ins.:

3* तच्छ्रुत्वा नारदो वाक्यं रावणस्य दुरात्मनः।

—(l. 267) M_3 महात्मा (for नारदः). V_3 ह (for तम्). —(l. 268) V_3 M_3 -द्वीपः; D_9 -द्वीपे. —(l. 269) $D_{10.11}$ तत्र (for यत्र). V_3 om. ते (subm.). —T_4 mostly damaged for l. 270. —(l. 271) M_3 महात्मानो (for °मात्रा). V_3 महासत्त्वा महाधैर्या (for the prior half). —(l. 273) V_3 -मदोत्पेता; D_9 -बलोपेतान्; K (ed.) -समायुक्तान् (for -समोपेतान्). M_3 बलवीर्यैः सदोपेतान् (for the prior half). V_3 यादृशास्. —(l. 277) V_3 समस्तम् (for मे सर्वम्). V_3 वदतासुर (for प्रभो नारद). —(l. 278) M_3 कृत्स्नं (for सर्वं). V_3 क * द्दामलकं यथा (for the post. half). —(l. 279) K (ed.) तं (for ह). —(l. 280) M_3 -मानसा (for -मनसो). —(l. 281) D_7 सदा (for तद्). —(l. 283) V_3 तद्गति- (for तद्गत-). K (ed.) श्रिताः (for सदा). V_3 D_9 M_3 रावण (D_9 °क्षस) ते त(M_3 स)दा; T_4 रावण सर्वदा (for नारायणं सदा). —(l. 284) Metri causa. V_3 M_3 यैर् (for तैर्). V_3 वासम्. T_4 M_3 आर्जितः. D_9 M_3 तु (for सु-). K (ed.) पुण्यकर्मभिः (for सुमहात्मभिः). V_3 अर्जितं सुकृतात्मभिः (for the post.

ये हता लोकनाथेन शार्ङ्गमानम्य संयुगे ।
चक्रायुधेन देवेन तेषां वासस्त्रिविष्टपे ।
न हि यज्ञफलैस्तात न तपोभिर्न संयमैः ।
न च दानफलैर्मुख्यैः स लोकः प्राप्यते सुखम् ।
नारदस्य वचः श्रुत्वा दशग्रीवः सुविस्मितः ।
ध्यात्वा तु सुचिरं कालं तेन योत्स्यामि संयुगे ।
आपृच्छ्य नारदं प्रायाच्छ्वेतद्वीपाय रावणः ।
नारदोऽपि चिरं ध्यात्वा कौतूहलसमन्वितः ।
दिदृक्षुः परमाश्चर्यं तत्रैव त्वरितं ययौ ।
स हि केलिकरो विप्रो नित्यं च समरप्रियः ।
रावणोऽपि ययौ तत्र राक्षसैः सह राघव ।
महता सिंहनादेन दारयन्स दिशो दश ।
गते तु नारदे तत्र रावणोऽपि महायशाः ।
प्राप्य श्वेतं महाद्वीपं दुर्लभं यत्सुरैरपि ।
तेजसा तस्य द्वीपस्य रावणस्य बलीयसः ।
तत्तस्य पुष्पकं यानं वातवेगसमाहतम् ।
अवस्थातुं न शक्नोति वाताहत इवाम्बुदः ।
सचिवा राक्षसेन्द्रस्य द्वीपमासाद्य दुर्दृशम् ।
अब्रुवन्रावणं भीता राक्षसा जातसाध्वसाः ।
राक्षसेन्द्र वयं मूढा भ्रष्टसंज्ञा विचेतसः ।
अवस्थातुं न शक्ष्यामो युद्धं कर्तुं कथंचन ।
एवमुक्त्वा दुद्रुवुस्ते सर्व एव निशाचराः ।
रावणोऽपि हि तद्यानं पुष्पकं हेमभूषितम् ।
विसर्जयामास तदा सह तैः क्षणदाचरैः ।
गते तु पुष्पके राम रावणो राक्षसाधिपः ।
कृत्वा रूपं महाभीमं सर्वराक्षसवर्जितः ।
प्रविवेश तदा तस्मिञ्छ्वेतद्वीपे स रावणः ।
प्रविशन्नेव तत्राशु नारीभिरुपलक्षितः ।
एकया स स्मितं कृत्वा हस्ते गृह्य दशाननः ।
पृष्टश्चागमनं ब्रूहि किमर्थमिह चागतः ।
को वा त्वं कस्य वा पुत्रः केन वा प्रहितो वद ।
इत्युक्तो रावणो राजन्क्रुद्धो वचनमब्रवीत् ।
अहं विश्रवसः पुत्रो रावणो नाम राक्षसः ।
युद्धार्थमिह संप्राप्तो न च पश्यामि कंचन ।
एवं कथयतस्तस्य रावणस्य दुरात्मनः ।
प्राहसंस्ते ततः सर्वे सुस्वनं युवतीजनाः ।
तासामेका ततः क्रुद्धा बालवद्गृह्य लीलया ।
भ्रामितस्तु सखीमध्ये मध्ये गृह्य दशाननम् ।
सखीमन्यां समाहूय पश्य त्वं कीटकं धृतम् ।
दशास्यं विंशतिभुजं कृष्णाञ्जनसमप्रभम् ।
हस्ताद्धस्तं स च क्षिप्तो भ्राम्यते भ्रमलालसः ।
भ्राम्यमाणेन बलिना राक्षसेन विपश्चिता ।
पाणावेकाथ संदष्टा रोषेण वनिता शुभा ।
मुक्तस्तयाशुभः कीटो धुन्वन्त्या हस्तवेदनात् ।
गृहीत्वान्या तु रक्षेन्द्रमुत्पपात विहायसा ।

half). —(l. 285) M_3 आयम्य (for आनम्य). —(l. 286) V_3 चक्रे युद्धेन देवस्य (corrupt) (for the prior half). —(l. 287) V_3 नान्यैस्तपोभिर्नैव (for तात न तपोभिर्न). —(l. 288) D_9 संख्यैः (for मुख्यैः). V_3 स्वयं (for सुखम्). —(l. 290) V_3 हरिं (for तेन). —(l. 291) D_7 आपृच्छन्. V_3 श्वेतद्वीपं स; D_7 श्वेतद्वीपस्य. —V_3 lacuna for l. 292. —(l. 296) V_3 D_9 M_3 नादयन् (for दारयन्). —(l. 297) T_4 रावणे and नारदो (for नारदे and रावणो). —(l. 298) M_3 प्राप (for प्राप्य). V_3 महद्वीपं. —(l. 299) D_9 T_4 द्वीपस्य तेजसा राम (for the prior half). —(l. 300) V_3 तत्रास्य (for तत्तस्य). V_3 -समं महत्; T_4 M_3 -गतं(T_4 °मं) हतं (for -समाहतम्). —(l. 301) V_3 om. from the post. half up to the prior half of l. 305. —(l. 302) M_3 दुद्रुवुः (for दुर्दृशम्). —(l. 304) M_3 विचेतनाः (for °तसः). —(l. 305) D_9 om. कर्तुं. V_3 किं पुनर्योद्धुमाहवे (for the post. half). —(l. 307) D_9 M_3 च (for हि). —(l. 308) D_9 सहितैः. —(l. 309) D_{9-11} गतं तु पुष्पकं. —(l. 310) V_3 -संयुतः; K (ed.) -वर्जितं (for -वर्जितः). —(l. 311) V_3 रम्यं (for तस्मिन्). D_9 T_4 M_3 राक्षसः (for रावणः). V_3 श्वेतद्वीपं स राक्षसः (for the post. half). —After l. 311, V_3 ins.:

4* सर्वत्र कुसुमामोदं सर्वमोषधिसंयुतम् ।
पुण्यगन्धावरुद्धं तद्वायुना द्वीपमावृतम् ।

—(l. 312) V_3 [अ]सौ (for [आ]शु). —After l. 312, V_3 wrongly ins.:

5* विश्रमेकाभिर्देवस्य विष्णोः क्षीरोदशायिभिः ।

—After l. 312, D_{11} repeats l. 293–l. 298. —(l. 313) M_3 सुस्मितं. $D_{10.11}$ दशाननं; K (ed.) स रावणः (for दशाननः). V_3 स ताभिः सहसाश्रित्य परिवार्य समंततः. —(l. 314) V_3 त्वं समागतः (for इह चागतः). —(l. 315) K (ed.) हि (for first वा). —(l. 316) D_{11} [उ]क्त्वा (for [उ]क्तो). V_3 राम (for राजन्). —(l. 317) V_3 राक्षसेश्वरः; D_9 राक्षसाधिपः (for नाम राक्षसः). —(l. 318) M_3 किंचन. —(l. 319) V_3 नामगोत्र- (for रावणस्य). —(l. 320) D_9 प्रहसंस्तास; $D_{10.11}$ प्रहसंते; T_4 प्रहसंत्यस. D_9 T_4 सर्वाः. M_3 सुस्वरं; K (ed.) सस्वनं. V_3 युद्धायागमनं सर्वा जहसुः संघशः स्त्रियः. —(l. 321) M_3 तासामेव ततः क्रुद्धो; K (ed.) एकया क्रुद्धया तासां (for the prior half). V_3 बालगृह्याग्रलीलया; M_3 बालया गृह्य चान्यया (for the post. half). —(l. 322) V_3 भ्रामयित्वा. V_3 सा निक्षिप्य तमब्रवीत्; M_3 विक्षिप्तः स दशाननः (for the post. half). —(l. 323) D_9 T_4 M_3 समागृह्य (for °हूय). M_3 कीटमागतं. V_3 सखे गच्छत पश्यध्वं दशास्यं कीटमागतं. —(l. 324) V_3 तमेवं (for दशास्यं). —(l. 325) $D_{7.11}$ च सं(D_{11} *)क्षिप्तो. M_3 श्रमलालसः (for भ्रम°). —(l. 327) D_9 पाणावेकांगसंदष्टा (for the prior half). —(l. 328) D_7 तया * भः; D_9 तस्याः शुभः; T_4 K (ed.) तया ततः (K [ed.] शुभः) (for तयाशुभः). D_9 धुनत्या. —(l. 329) M_3 तु लंकेशम्; K (ed.) राक्षसेंद्रम् (for तु रक्षेन्द्रम्). —For lines 325–329, V_3 subst.:

6* कौतूहलं मे सुमहद्येन युद्धस्य कार्मुकम् ।
एवमुक्त्वा तया क्षिप्तो हस्ताद्धस्तं दशाननः ।

ततस्तामपि संक्रुद्धो विददार नखैर्भृशम् ।
तया स ह विनिर्धूतः सहसैव निशाचरः ।
पपात सोऽम्भसो मध्ये सागरस्य भयातुरः ।
पर्वतस्येव शिखरं यथा वज्रविदारितम् ।
प्रापतत्सागरजले तथासौ विनिपातितः ।
एवं स रावणो राम श्वेतद्वीपनिवासिभिः ।
युवतीभिर्विनिगृह्याशु भ्रामितश्च ततस्ततः ।

आक्षिप्यमाणो ह्यबलैः समाकुलितविग्रहः ।
ततस्ताः सोऽदशत्पार्श्वे करजे रघुनन्दन ।
मुमोच साशुभं क्रुद्धा दृष्ट्वैनं विकृताननम् ।
विकृतां सुमुखीं दृष्ट्वा ततो मोहसमन्विता ।
महामाया महावेगा देवी योगीश्वरी तथा ।
रावणं गृह्य सहसा गरुडा नित्यविक्रमा ।
करावतूलनं कृत्वा खं जगाम मनोजवा ।

—(l. 330) D9 अभि- (for अपि). V3 स तामपि रुषाविष्टो (for the prior half). —(l. 331) D9 T4 M3 च; K (ed.) हि (for ह). V3 ततस्तया (for तया स ह). —(l. 332) V3 सहसा; M3 चांभसो (for सोऽम्भसो). —(l. 333) D9 शिखरे. V3 महाशनि-; (for यथा वज्र-). —V3 om. l. 334. —(l. 334) D9 प्रापयन्. D7 सागरतले. D7 तयासौ. M3 जले तस्यौ निपातितः (for the post. half). —(l. 335) V3 D9 नाम (for राम). —(l. 336) V3 निगृह्याशु. M3 स्त्रीजनैर्विनिगृह्याशु (for the post. half). —After l. 336, V3 ins.; while M3 K (ed.) ins. after l. 338:

7* ततः स सागरजलाज्जलक्लिन्नशिरोरुहः ।
दक्षिणं तीरमासाद्य चिन्तयामास विस्मितः ।
ये मया निर्जिता लोका न तेषु भयमीदृशम् ।
स्वभावतोऽल्पवीर्याणां विरुद्धं योषितामिदम् ।
नूनमेतस्य लोकस्य मानवाः प्रभविष्णवः ।
स्त्रीरूपविग्रहधरा यान्ममाचष्ट नारदः ।
बलवद्भिस्तु संधेयमिति संचिन्त्य निश्चितम् ।
भूयस्तासां प्रवृत्त्यर्थं तद्वनं समलोडयत् ।
अथापश्यन्महात्मानं पितामहसुतं प्रभुम् ।
सनत्कुमारमासीनं सर्वयोगभृतां वरम् ।
जाज्वल्यमानं तपसा समिद्भिरिव पावकम् ।
अपश्यद्दक्षिणे पार्श्वे विचरन्तं गुहाश्रयम् ।
स तं दृष्ट्वा तपोवृद्धमभिवाद्य कृताञ्जलिः ।
व्रीडितः परिपप्रच्छ ब्रह्मर्षिं सत्यवादिनम् ।
भगवन्केन लोकोऽयं कल्पितः सुमहात्मना ।
के वा लोके वसन्त्यस्मिन्सर्वज्ञानवतां वर ।
किं च त्वं ध्यायसे ब्रह्मञ्शंस मे सुसमाधिना ।
एतन्मे ब्रूहि तत्सर्वं सर्वज्ञो ह्यसि मे श्रुतः ।
एवमुक्तो महातेजा विदित्वा तस्य हृद्गतम् ।
उवाच वाक्यं प्रहसञ्श्रूयतामिति पुत्रक ।
यो हि वै सर्वमेवेदं बिभर्ति सचराचरम् ।
त्रैलोक्यं सर्वभूतात्मा यस्योत्पत्ति न विद्यते ।
यमाहुर्वेदविदुषः पुरुषं तमसः परम् ।
आदित्यरूपमजरं परमात्मानमीश्वरम् ।
यस्य नाभिभवो ब्रह्मा पिता मम पितामहः ।
कैलासनिलयः श्रीमान्भवश्च क्रोधसंभवः ।
यं समाश्रित्य विबुधा विधिना हविरध्वरे ।
पिबन्ति चामृतं हृष्टाः परिभूय दितेः सुतान् ।
यस्य श्वासानिलोद्भूताः स्त्रियस्त्वामपराजितम् ।
गृहीत्वा सुमहावेगाश्चिक्षिपुः सागराम्भसि ।
येन दैत्या महावीर्या दानवाश्च सनैर्ऋताः ।
निहता बहुरूपेण बहवो बाहुशालिनः ।
तेनायं लोकनाथेन कल्पितः सुमहात्मना ।
गोविन्देन निवासार्थं लोको वै सुमहात्मना ।
अर्चयन्ति जगन्नाथं नारायणपरायणाः ।
अद्वेष्टाः सर्वभूतेषु महायोगबलाश्रयाः ।
यजन्ति पञ्चभिर्यज्ञैः सततं मधुसूदनम् ।
एकान्तिनो महासत्त्वा वसन्ति सुसमाहिताः ।
यः पुराणे च वेदे च पाञ्चरात्रे च पठ्यते ।
सांख्ययोगे च मुनिभिर्ध्यायते चेज्यते च यः ।
मुनिभिर्देवसंघैश्च स्थाप्यते भगवान्हरिः ।
मधुकैटभयोर्हन्ता यस्तमन्वेष्टुमर्हसि ।
पितामहोऽपि तं देवं न च जानाति रावण ।
यस्तु नित्यं विजानाति हरिं नारायणं विभुम् ।
जगदावरणं पुण्यं तस्य मोक्षो न संशयः ।
एतच्छ्रुत्वा मुनेर्वाक्यं प्रसन्नेनान्तरात्मना ।
पुनरेव ततो रक्षः पप्रच्छ मुनिपुंगवम् ।
कथं च दृश्यते देव कथं च श्रूयते भुवि ।
कथं च क्रीडते लोके द्रष्टुं वा शक्यते कथम् ।
कियत्कालेन वा ब्रह्मँल्लोकोऽयं तपसा मया ।
शक्यः प्रवेष्टुं तद्ब्रूहि सर्वं हि विदितं तव ।
आकर्ण्य सस्पृहं तस्य वाक्यं वाक्यविशारदः ।
प्रत्युवाच मुनिर्धीमांस्तत्सर्वमनुपूर्वशः ।
स हि सर्वगतो देवः सूक्ष्मोऽव्यक्तः सनातनः ।
येन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरम् ।
स भूमौ दिवि पाताले पर्वतेषु वनेषु च ।
सागरेषु च सर्वेषु वसतीह सरित्सु च ।
अहश्च रात्रिश्च उभे च संध्ये
दिवाकरश्चैव यमश्च सोमः ।
स एव कालो वरुणः स एव
स ब्रह्मरुद्रेन्द्रमुखः स चाग्निः ।
ओंकारो भूर्भुवः स्वश्च गायत्री संध्य एव च ।
धराधरधरो देवः सोऽनन्त इति विश्रुतः ।
विद्योतति ज्वलति वर्षति वाति पाति
गर्जत्युपैति तपते दहते स चैव ।
लोकान्सृजत्यवति संहरते सदैव
दैत्यान्स एव दहते जगति प्रसह्य ।
स न शक्यः सुरैर्द्रष्टुं नासुरैर्न च पन्नगैः ।
प्रसादं कुरुते यस्य स वै तं द्रष्टुमर्हति ।

तद्भक्तैस्तद्गतप्राणैः शुचिभिस्तत्परायणैः ।
शक्यः प्रवेष्टुं लोकोऽयं ज्ञाननिर्धूतकिल्बिषैः ।
एवंविधैरयं लोकः प्राप्यते पुरुषोत्तमैः ।
अकामकारिभिर्देवैरक्रोधैर्दंभतामसैः ।
यश्चैव सुमहाकायः प्रविष्टो लोकमव्ययम् ।
आस्ते तथैव हरिणा कृता तेन महापुरी ।
अष्टाविंशे युगे प्राप्ते मनोरस्य विशेषतः ।
वैष्णवीं मूर्तिमाविश्य लोकमेनं प्रवेक्ष्यसि ।
नातः परतरं श्रोतुं मत्तो वै राक्षसेश्वर ।
उत्तिष्ठ गच्छ भद्रं ते प्राप्स्यसे गतिमीप्सिताम् ।
एवमुक्तस्तथेत्युक्त्वा तं प्रणम्याभिपूज्य च ।
समासाद्य महत्सैन्यं ययौ लङ्कामशङ्कितः ।
नारदोऽपि प्रहृष्टात्मा दृष्ट्वा सर्वमशेषतः ।
द्रुतं मेरुमुपागम्य विशते तां शुभां सभाम् ।
तस्यां ब्रह्माणमासीनमभिवाद्य कृताञ्जलिः ।
देवान्संश्रावयामास समीपे पद्मयोनिनः ।
निशम्य सुमहत्पुण्यमाख्यानं पद्मसंभवः ।
नारदं संपरिष्वज्य प्राह भूतभविष्यवित् ।
हिरण्यकशिपुः पूर्वं बभूवैष निशाचरः ।
अवध्यो बहुभिर्योगैर्वरदानान्महाबलः ।
स कदाचिन्महात्मानं पद्मनाभमधोक्षजम् ।
सभायां गर्वयन्दर्पान्नृसिंहवपुषं हरिम् ।
समुद्वह्य नखैस्तेन दीर्यमाणस्य संयुगे ।
रक्तसंस्पर्शजं दिव्यं चक्षुर्दैत्यपतेरभूत् ।
स तु तद्राक्षसं जन्म तस्मान्मानुष्यजन्मनः ।
भाविनीं निधनप्राप्तिं पश्यन्दिव्येन चक्षुषा ।
श्रीवत्साङ्कं तदङ्कस्थः प्राह दैत्यः शनैरिदम् ।
नखैर्विभिन्नहृदयः क्षणं दीनः कृताञ्जलिः ।
तप्तहाटककेशान्त ज्वलत्पावकलोचन ।
वज्रायुधनखस्पर्श दिव्यसिंह नमोऽस्तु ते ।
कैटभारे हरे देव विष्णो विपुलविक्रम ।
त्राहि मां भूतभव्येश शरणागतवत्सल ।
त्वद्धते राक्षसे भावे मानुषे च पदे विभो ।
प्राप्नुयां त्वन्मयो लोकं लोकनाथ प्रसीद मे ।
एवमुक्तस्तथेत्युक्त्वा ययौ दैत्यपतिं हरिः ।
हंसयुक्तविमानेन किङ्किणीजालमालिना ।
स एव च पुनस्तत्र राक्षसोऽभून्महासुरः ।
राक्षसेन विधानेन सदा तद्भावभावितः ।
मानुषत्वमुपागम्य लोकान्हन्तुं कृतोद्यमः ।
तृतीयं च हतं तेन श्वेतद्वीपं प्रवेक्ष्यति ।
वैष्णवं तेज आविश्य यथोक्तं ब्रह्मवादिना ।
मयापि चेहसंस्थेन दृष्टमेवाक्षदर्शनात् ।
मयावलम्बितं सर्वं देवस्य परमात्मनः ।
यस्त्विदं पठते नित्यं पुण्यमाख्यानमादितः ।
नारदोक्तं मनुष्यो वै स याति परमां गतिम् ।
वैष्णवं परमाख्यानं सर्वपापप्रणाशनम् ।
नित्यं च श्रृणुयाद्यश्च सोऽपि पापात्प्रमुच्यते ।
जातिस्मरत्वं विप्रत्वं कुले महति संभवम् ।
सर्वज्ञतां च लभते नात्र कार्या विचारणा ।
स च संस्तूय च हरिं प्रविष्टः कमलोद्भवः ।
अनुभाष्य सुरान्सर्वान्ययौ स्वं लोकमीश्वरः ।
नारदस्तु ततस्तस्मान्मेरुपृष्ठं परिभ्रमन् ।
स तु मामाजगामाशु दिदृक्षुर्द्वादशात्मकम् ।
स मया शाश्वतः सम्यगभिवाद्याभिपूजितः ।
आख्यानमिदमाचष्ट ममानुग्रहकाम्यया ।
मयाप्येतत्सदस्येत्य पावनार्थं मनोरमम् ।
भक्त्या तव महाबाहो कथामृतमुदाहृतम् ।

[Vs var. are as follows K (ed.) Var. are occasionally cited. —(l. 1) om. स (subm.). —(l. 3) बलम् (for भयम्). —(l. 6) था: समाचष्ट. —(l. 7) च (for तु). स * यम् (for संधेयम्). इति म * ह्यधिश्रितः (for the post. half). —(l. 8) तेषां (for तासां). प्रगृह्यर्थं (for प्रवृत्त्यर्थं). तत्र तं प्रविलोभयत् (for the post. half). —(l. 9) पितामहमजं. —(l. 10) सनत्कुमारभावार्थे (for the prior half). —(l. 12) द्वीपस्य (for अपश्यद्). वैजयन्तमहाभयम् (for the post. half). —(l. 15) तु (for सु-). —(l. 16) [अ]त्र (for [अ]स्मिन्). —(l. 17) वा (for च) ध्यायसि. परमेण समाधिना (for the post. half). —(l. 18) एतत्सर्वं प्रब्रूहि (subm.) (for the prior half). संमतः; K (ed.) विश्रुतः (for मे श्रुतः). —(l. 19) तद्गतं (for हृद्गतम्). —(l. 20) विप्रः (for वाक्यं). पुत्रक श्रूयतामिति (for the post. half). —(l. 21) [ए]ष (for वै). —(l. 23) प्रकृतेः (for तमसः). —(l. 24) अव्ययं (for ईश्वरम्). —(l. 25) वाक्य- (for नाभि-). —(l. 26) lacuna for कैलासनिलयः. —(l. 27) विविधा (for विधिना). —(l. 29) त्रिदिवस्त्वापराजिताः (for the post. half). —om. l. 30–31. —(l. 32) K (ed.) -शालिना. —(l. 33) तु (for सु-). —om. l. 34. —(l. 35) यैर्यजंति महात्मानं (for the prior half). —(l. 36) अद्वेषाः. —(l. 37) यजंतः. —(l. 39) पंचरात्रोपयाजते (for the post. half). —(l. 40) सांख्ययोगेन. जयते चेष्टते (for ध्यायते चेज्यते). —(l. 42) यस्तरेतुं त्वमर्हसि; K (ed.) कस्तमन्वेष्टुमर्हति (for the post. half). —(l. 43) विजानाति (for च जा°). —(l. 44) प्रभुं (for विभुम्). —(l. 45) यस्य (for तस्य). —(l. 47) राम (for रक्षः). -सत्तमं (for -पुंगवम्). —(l. 48) श्रूयते च कथं भुवि (for the post. half). —(l. 49) Vs om. च (subm.). —(l. 50) कथं (for कियत्). —(l. 53) श्रीमांस् (for धीमांस्). अथ सर्वशः (for अनुपूर्वशः). —For l. 54–66, cf. l. 179–190 of No. 3. —(l. 55) तेन (for येन). —(l. 57) वसते समविरतु च (for the post. half). —(l. 60) च वासवः (for second स एव). —(l. 61) -तनुः (for -मुखः). —(l. 64) उद्योतते (for विद्योतति). om. (hapl.) पाति. —For l. 65–67 subst. :

7(A)* जागर्ति उत्पाति तपति दहतेऽपि चैकः
लोकान्सृजन्स हर्षते सदैव ।
दैत्यार्दनो जगति यो भवति प्रसह्य

नारदोऽपि महातेजा रावणं प्राप्य धर्षितम् ।
विस्मयं सुचिरं गत्वा प्रजहास ननर्त च ।
एतदर्थं महाबाहो रावणेन दुरात्मना ।
विज्ञायापहृता सीता त्वत्तो मरणकाङ्क्षया ।
भवान्नारायणो देवः शङ्खचक्रगदाधरः ।
शार्ङ्गपद्मायुधो वज्री सर्वदेवनमस्कृतः ।
श्रीवत्साङ्को हृषीकेशः सर्वदेवाभिपूजितः ।
पद्मनाभो महायोगी भक्तानामभयप्रदः ।
वधार्थं रावणस्य त्वं प्रविष्टो मानुषीं तनुम् ।
किं न वेत्सि त्वमात्मानं यथा नारायणो ह्यहम् ।
मा मुह्यस्व महाभाग स्मर चात्मानमात्मना ।
गुह्याद्गुह्यतरस्त्वं हि ह्येवमाह पितामहः ।
त्रिगुणश्च त्रिवेदी च त्रिधामा त्रिपथात्मकः ।
त्रिकालकर्म त्रैविद्य त्रिदशारिप्रमर्दन ।
त्वयाक्रान्तास्त्रयो लोकाः पुराणैर्विक्रमैस्त्रिभिः ।
त्वं महेन्द्रानुजः श्रीमान्बलिबन्धनकारणात् ।
अदित्या गर्भसंभूतो विष्णुस्त्वं हि सनातनः ।
लोकाननुग्रहीतुं वै प्रविष्टो मानुषीं तनुम् ।
तदिदं साधितं कार्यं सुराणां सुरसत्तम ।
निहतो रावणः पापः सपुत्रगणबान्धवः ।
प्रहृष्टाश्च सुराः सर्वे ऋषयश्च तपोधनाः ।
प्रशान्तं च जगत्सर्वं त्वत्प्रसादात्सुरेश्वर ।
सीता लक्ष्मीर्महाभागा संभूता वसुधातलात् ।
त्वदर्थमियमुत्पन्ना जनकस्य गृहे प्रभो ।
लङ्कामानीय यत्नेन मातेव परिरक्षिता ।
एवमेतत्समाख्यातं तव राम महायशः ।
ममापि नारदेनोक्तमृषिणा दीर्घजीविना ।
यथा सनत्कुमारेण व्याख्यातं तस्य रक्षसः ।
तेनापि च तदेवाशु कृतं सर्वमशेषतः ।
यश्चैतच्छ्रावयेच्छ्राद्धे विद्वान्ब्राह्मणसंनिधौ ।

—For l. 68–69 and l. 70–71 cf. l. 201–202 and l. 205–206 of No. 3. —(l. 68) न शक्यः स (by transp.). नैव (for न च). —(l. 69) यस्य कुरुते (by transp.): चैनं (for वै तं). —(l. 70) तच्चित्तैस् (for तद्गतैस्). —(l. 71) -कल्मषैः (for -किल्बिषैः). —(l. 73) न काम- (for अकाम-). घोरैर् (for देवैर्). दृश्यते न चराचरैः (for the post. half). —(l. 75) तेन (for तथा). निर्मिते* (for कृता तेन). —(l. 76) पुरा (for युगे). —(l. 77) प्रवेक्ष्यति. —(l. 78) अहंस्त्वं (for मत्तो वै). —(l. 79) प्राप्स्यते. —(l. 81) महासैन्यं. स शंकितः (for अशङ्कितः). —After l. 82, V_3 ins. l. 338. —(l. 83) महामतिः (for शुभां सभाम्). —(l. 85) पद्मजन्मनः. —(l. 86) लोकसंभवः. —(l. 87) [अ]प्याह (for प्राह). -भविष्यकृत्. —(l. 89) वरदानं महात्मनः (for the post. half). —(l. 91) गर्जयद् ; K (ed.) गर्हयन् (for गर्व°). —(l. 92) समुत्पत्य नखैश्चैनं (for the prior half). —(l. 93) नखसंदर्शजं (for रक्तसंस्पर्शजं). —(l. 94) स तच्छंसक्षयं जन्म (corrupt) (for the prior half). मानुष- (for मानुष्य-). —(l. 95) मानुष्याद्धि नयप्राप्तिः (for the prior half). —(l. 99) वज्राधिक-. —(l. 100) बृहद्वक्षो (for हरे देव). —(l. 101) -वामन (for -वत्सल). —(l. 102) विधेर् (for पदे). —(l. 103) मद्भयं (for त्वन्मयो). —(l. 105) हंसयुक्तेन यानेन (for the prior half). -जालशालिना. —(l. 107) राक्षसेनापि बाणेन (for the prior half). —(l. 108) कृतोद्यमः. —(l. 110) ब्रह्मवादिनः. —(l. 111) राक्षस- (for पद्माक्ष-). —(l. 112) मया विना सुतं सर्वं (for the prior half). —(l. 113) * * ते मन्ये (for पठते नित्यं). उत्तमं (for आदितः). —(l. 116) तु (for first च). तु (for second च). —(l. 119) हि (for first च). —(l. 121) पश्चात् (for तस्मात्). —(l. 122) यात्वापगामाशु (for मामाजगमाशु). —(l. 123) शाश्वतः (for शाश्वतः). —(l. 124) आख्यातं (for आचष्ट). मया (for मम). —(l. 125) K (ed.) मनोहरं (for °रमम्). —(l. 126) इहेरितं (for उदाहृतम्).] —

